जटास्वटत् स्वस्तटिनी छलेना–रुरोह मौलिं हिमरश्मिमौलेः ॥ ६१ ॥

स्पर्धां विधित्सोः सह येन संख्ये स्वस्याविवेकत्वविलुप्तबुद्धेः ।
तृणानि दद्भिर्दधतः पशुत्व मनागसे स्मारिगणा गदंति ॥ ६२ ॥
ततोभजद्राज्यरमामनंता–नंतापति **गूयकनामधेयः** ।
येनानिशं धर्मतरूर्धरित्र्या मुत्सर्गनीरैरभिषिच्यतेस्म ॥ ६३ ॥
उद्दामधाराजलवालिकं य–त्करांतराले करवालमेघं ।
अभ्युन्नतं वीक्ष्य विपक्षमान–हंसोद्गुतं मानसतोप्यनेशत् ॥ ६४ ॥
उच्चारयन्वैरिपशूँस्तृणानि निस्त्रिंशदंडं च करे दधानः ।
निरंतरं भूषितसर्वदेहः सत्यां वितेने निजगोपतां यः ॥ ६५ ॥
पलायितानां रिपुभूपतीनां पिबन् कणेहत्य यशःपयांसि ।
तत्स्त्रैणनिश्वाससमीरपुष्टो यस्यासिदंडो भुजगायतेस्म ॥ ६६ ॥
तन्नंदनश्चंदनवज्जनाना मानंदनो **नंदननामधेयः** ।
निहत्य शत्रून्समरे समग्रान् स्वसाच्चकारावनिमा समुद्रं ॥ ६७ ॥
आलोकमात्रेण शुभानि पुष्णँ स्तत्वार्थदृष्ट्या च तमांस्यपास्यन् ।
प्रजा विवस्वानिव वृत्तरम्यः संवर्धयामास निरंतरं यः ॥ ६८ ॥
पुरः परेषां किल पक्षपातं विहाय के नाधिकमाहुरेनं ।
नाजौ यथादीदृशदेष पृष्ठं निजं तथा वक्त्रमहो परेपि ॥ ६९ ॥
पुरः परेषां किल पक्षपातं विहाय केनाधिकमाहुरेनं ।
यथा स्वकोशादयमाचकर्ष खड्गं तथाजौ वसु वैरिणोपि ॥ ७० ॥
यस्य प्रतापो भुवि वाडवाधिक्षेपाद्यदंहः कलयांबभूव ।
तत्संप्रमार्ष्टुं किमसौ प्रविष्टः पारेबुधेस्तीरतपोवनानि ॥ ७१ ॥
भयार्त्तवप्रायितबाहुदंडः सर्वास्त्रविद्योपनिषत्करंडः ।
लीलापराभूतसुपर्वराजः क्ष्माभृत्ततो राजत **वप्रराजः** ॥ ७२ ॥
ज्वलत्प्रतापज्वलनोपतप्ता प्रत्यर्थिभूभोगजुषां जयश्रीः ।
यदीयनिस्त्रिंशनिशातधारा–पाते व्यधान्मज्जनसज्जलीलां ॥ ७३ ॥
सरीसृपस्यास्य च खड्गयष्टे राकारमात्राद्यदि साम्यमासीत् ।
दंष्ट्रा हरेत्प्राणगणान्यदाद्यः परो द्विषां वीक्षितमात्र एव ॥ ७४ ॥

सर्वातिशायिद्युतिनी विधात्रा विधित्सितौजो यशसी यदीये ।
अवश्यमेतौ रचितौ प्रशस्या–भ्यासाय तिग्मद्युतिशीतरश्मी ॥ ७५ ॥
शंके प्रतिक्ष्मापतिकीर्तिलोप पापोपशांत्यै विदधेस्य कीर्तिः ।
स्नानं मुहुर्नाकनदीप्रवाहे शुभ्रत्वमासी त्कथमन्यथा स्यां ॥ ७६ ॥
अप्यस्तदोषस्य बभूव तस्य दोषद्वयं कामवशित्वलोभौ ।
सेनां कुमारीं बुभुजे मृधे य ल्लौ तथैको विजयश्रियं च ॥ ७७ ॥
यत्कीर्तिगानं विनिशम्य शंके हरः प्रनृत्यन्प्रसरत्प्रमोदः ।
छुटज्जटानिर्यदमर्त्यसिंधु–पयःप्रवाहैरिव शुभ्र आसीत् ॥ ७८ ॥
खेलत्सु भूरिष्वपि याचकेषु दानैकलीलारसिकस्य यस्य ।
दा पृष्ठचारी किल यो नकारो यदि प्रियोसौ न परः कदाचित् ॥ ७९ ॥
अनल्पसंकल्पनकल्पवल्लीं विपक्षपक्षव्रजभेदभल्लीं ।
त्रैलोक्यलोकावलिवंद्यपादां सेवापरप्रत्तमहाप्रसादां ॥ ८० ॥
शाकंभरीस्थानकृताधिवासां शाकंभरीं नाम सुरीं प्रसाद्य ।
विश्वापतिर्विश्वहिताय शाकं–भर्यां रुमां यः प्रकटीचकार ॥ ८१ ॥
ततो धराभारमुरीचकार जितारिचक्रो **हरिराज**भूपः ।
शकाधिराजस्य रणे निहत्य तन्मानवन्मुग्धपुरं ललौ यः ॥ ८२ ॥
रणाजिरे वैरभृतां भटाना मेकोपि यो ऽनेकतया चकासे ।
प्रपश्यतां निर्मलनीरपूर्ण–पात्रेषु तारापतिवज्जनानां ॥ ८३ ॥
भ्रांत्वाप्यदभ्रेषु धराधरेषु कुत्राप्यनासादितयोग्ययोगाः ।
पौरा इवौदार्यमुखा गुणाःस्म दिवानिशं यस्य पुरे वसंति ॥ ८४ ॥
अनेन पेठे पठताक्षराणि किं नो वृथा बोध्यथवा निदानं ।
निषेधतो स्मान्विशतो निषेद्धु मेवेति यस्मिन्कविवाग्वितर्कः ॥ ८५ ॥
अस्याऽवनीमघवतोऽसिलतांबुराशे-
रश्लाघता सुमहतीति किमद्भुतं नः ।
अस्याद्भुताद्भुतमिदं तु सनीरतायां
सत्यामपि स्फुरति यज्जडता स्म नैव ॥ ८६ ॥

[दंतपृष्ठफणचक्रसहस्रैः] क्रोडकूर्मभुजगाधिपा दधुः ।
क्ष्मां सुखेन भुजयैकया दधत्तामसा वतत कं न विस्मयं ॥ ८७ ॥
उद्यच्छौर्यविनिर्जितोर्जितरिपुस्तंबेरमौघोनघ-
स्त्रीसंचालितचारुचामरयुगव्याजोल्लसत्केसरः ।
आत्मीयासनमाश्रितो वनजुषा मीशस्वभावं दधत्
जज्ञे सिंह इवोन्नतक्रमगतिः श्री**सिंहराज** स्ततः ॥ ८८ ॥
एतेनोत्त्रासितानां प्रतिधरणिभुजामुल्लसद्दुर्यशस्सु
स्फूर्जत्पर्जन्यमालाललितमुपगतेष्वाजिभूमौ समंतात् ॥
किन्न स्थाने तदेतत्प्रवसितमचिरान्मानहंसैर्यदेषा
मस्तैर्यद्वा प्रवृत्तं विरहविधुरिमालिंगनात्तद्वधूनां ॥ ८९ ॥
क्षारोप्यंबुनिधिः शितिद्युतिरपि प्रासूत यस्मात्कथं
शुभ्रांशुश्च सुधामयश्च सविधुस्तुल्योहि पुत्रः पितुः ।
आसीदुत्तरमस्य नो ऽद्य नृपते र्यस्य प्रसर्पद्यशः
पीयूषैः परिपुष्ट एष उदधिस्तादृग्भवँ स्तज्जनौ ॥ ९० ॥
लक्ष्मीमेषपराश्रिता मपिबला दाकृष्यभोगास्पदं
प्रीत्या स्वस्य तनोति मां च जननादप्येकपत्नीव्रतां ।
स्वस्माद्दूरयति स्तुतां कविजनै र्न श्रोतुमुत्कंठते
क्रुद्धेतीव विपक्षभूमिमभजत्कीर्ति र्यदीयोच्चकैः ॥ ९१ ॥
बाणे महीमघवतोस्य तथा कृपाणे
पाणौ स्थितेप्युभयमद्भुतमेतदासीत् ।
एको दधाव समरे परलक्ष्यहेतो
रन्यः स्वकोशमपि दूरमुदोज्झदेव ॥ ९२ ॥
अगाधं पाथोधिं गुरुगरिमसारं सुरगिरिं
पृथक्कृत्वा वेधा न खलु कृतकृत्यो मम मते ।
द्वयं निर्मायास्मिन् पुनरपि किलैकत्र भगवान्
तथा प्रीतः सृष्टिं व्यधित न यथा तत्प्रणयने ॥ ९३ ॥

यत्सौंदर्यवशीकृतेव विजयश्रीकन्यका संगरे
सर्वानप्यपहाय राजतनुजान् दौर्भाग्यदग्धानिव ।
उद्वोढुं यमुपागता करतलं स्पृष्ट्वापि सद्यो महः
सूनुं कीर्तिसुतामसूत तदिदं लोके महत्कौतुकं ॥ ९४ ॥
कर्णाटश्चटुपाटवप्रकटनो लाटः कपाटप्रद-
श्चोलस्त्रासविलोलहृत् परिगलद्वीजर्जरो गुर्जरः ।
अंगः संगररंगभंगुरमतिः संपद्यते स्म क्षणात्
दिक्कुक्षिंभरि यत्प्रयाणपटहध्वाने समुत्सर्पति ॥ ९५ ॥
"गांभीर्येण विनिर्जितोहममुने" त्वंभोनिधे त्वं वृथा
खेदं मास्म कृथा जनः किल जनं दृष्ट्वा समाश्वासयेत् ।
सत्त्वाधारतया तथोन्नततया पश्यैष देवाऽचलो
जिग्ये ऽनेन तथा यथा नयनयो र्हित्वा गतो गोचरं ॥ ९६ ॥
यावत्कर्तु मयं ववांछ विलसत्कोदंड माजौ करे
तावद्वैरिनृपः पुरैव विलसत्कोदंडमाधात्पुरः ।
एतस्मात्कथमन्यथा प्रकुपितात्साक्षात्कृतांतादिव
प्राणत्राणविधिर्दिगंतबलिभूः स्वर्गं गतानामपि ॥ ९७ ॥
निर्विण्णोयमरीन्निहत्य गणशोप्याजावुवाह क्षमां
इत्याकर्ण्य निधत्त दर्पिततमान् रे भूभुजो मा भुजान् ।
दुर्लक्ष्यं किमु वेधसापि चरितं जानीथ नास्याखिलं
बाह्यामेव वहत्यसौ सुमहतीमेनां न चांतर्गतां ॥ ९८ ॥
पंचाप्यस्य करेण दानविधिना कल्पद्रुमा निर्जिता
एकैकां कलिकां बलिव्यतिकराद्दत्त्वांगुलीं स्वामिव ।
आसन्नांगुलिकाः स चाभिरभवत्पंचांगुलिः पप्रथे
लोकेपि व्यवहार एष न भवेत्प्राग्भिः किमंगीकृतं ॥ ९९ ॥
उज्झत्येष विपक्षवृत्तिमपि नो खड्गं करात्कर्हिचित्
नांगुल्यापि यदि स्पृशेद्गुणवतोप्यस्मान्सपक्षानपि ।

बिभ्राणा इषवो विशन्क्षितितलं दूरे यदीया रणे ॥ १०० ॥
हाहा केयमनौचिती जलनिधेरद्यापि हृष्यत्यसौ
यं दृष्ट्वा जितमप्यमुष्य यशसा चंद्रं मुहुः स्वांगजं ।
प्राप्यैतन्महसा तथैव वडवावह्निं च शुष्यत्यहो
सर्वः कोपि परस्य पश्यति जनो दोषं न च स्वस्य तं ॥ १०१ ॥
उत्सर्पद्गुरुदर्पदर्पितभुजादंडारिदंतावल-
व्रातावग्रहनिग्रहाग्रहमहानागेंद्रसांद्रप्रभः ।
हत्वा यो युधि **हेतिमं** शकपतिं निर्व्याजवीरव्रतो
मत्तेभाँश्चतुरोऽग्रहीद्बलकरान्मूर्तानुपायानिव ॥ १०२ ॥
इति श्री**जयसिंह**सूरिशिष्यमहाकविश्री**नयचंद्र**सूरिविरचिते
श्रीहम्मीरमहाकाव्ये वीरांके तदीयपूर्वजवर्णनो नाम प्रथमः सर्गः ॥ १ ॥

---

## अथ द्वितीयः सर्गः

अथो अभावात्तनुजस्य **भीमं** भ्रात्रेयमात्मीयपदे निवेश्य ।
कृतारिषड्वर्गजयः स **सिंह–राजो** हरेर्धाम जगाम नाम ॥ १ ॥
तद्राज्यमासाद्य स **भीमदेवः** सद्यस्तथा विक्रममाततान ।
न वास्तवी क्वापि यथा धरायां बभूवुषी शत्रुरिति प्रवृत्तिः ॥ २ ॥
कौक्षेक्षाग्रक्षतकुंभिकुंभो—च्छलद्दलन्मौक्तिककैतवेन ।
अपातयद्यो रिपुशौर्यवल्ले र्यशःप्रसूनानि चिरार्जितानि ॥ ३ ॥
स्वप्नेपि यद्दर्शनतो भयार्त्ता निद्रां प्रियामप्यजहुर्विपक्षाः ।
क्रियेत किं शर्करया तया वा या भक्ष्यमाणाऽशु दतो भनक्ति ॥ ४ ॥
श्रेयस्तरं हंत गुणाऽगुणानां परीक्षणं यद्यपि नो तथापि ।
चकार यः प्रार्थिषु नेयतापि गर्वोद्धुराः संतु सुरद्रुमाद्याः ॥ ५ ॥
अथोद्दिदीपेऽन्यनिग्रहाय बद्धाग्रहो **विग्रहराज**भूपः ।
द्विधापि यो विग्रहमाजिभूमा वभंजयद्वैरिमहीपतीनां ॥ ६ ॥

संकोचयन्वैरिमुखांबुजानि प्रवर्द्धयन् कौमुदमासमुद्रं ।
संपीडयन् दुर्नयसैंहिकेयं नवो विवस्वान् भुवि यत्प्रतापः ॥ ७ ॥
पुरा निजैः प्रौढतरैः प्रतापै रतापयद्यः कुपितो धरित्रीं ।
ततो दयार्द्रीकृतचित्तवृत्ति र्यशःसुधाभिर्नितरामसिंचत् ॥ ८ ॥
अप्युग्रवीरव्रतवीरवीर-संसेव्यमानक्रमपद्मयुग्मं ।
**श्रीमूलराजं** समरे निहत्य यो गुर्जरं जर्जरतामनैषीत् ॥ ९ ॥
कृतारिषड्वर्गजयो नयज्ञः **श्रीगुंददेवोथ** बभौ नृदेवः ।
कवींद्रबद्धापि यदीयकीर्त्ति र्जगत्समस्तं भ्रमतिस्म चित्रं ॥ १० ॥
चकार निर्विघ्नविधित्सितस्य यदोजसो द्रव्यलवेन वेधाः ।
गौरीपतेर्यं तिलकं खमूर्त्ते श्चकास्ति सोद्यापि सहस्ररश्मिः ॥ ११ ॥
महीमृगांकोहमिति प्रजानां न्यधत्त यो नैव करान् कठोरान् ।
युक्तं स ईदृग्न चकोरहर्ष—दायी परं चित्रमिदं न कस्य ॥ १२ ॥
कल्पांतकालज्वलनोपमाने यस्य प्रतापे ज्वलितेभितोपि ।
यन्नीतिवल्ली क्वच नापि नागा न्म्लानिं तदेतद्गुरुविस्मयाय ॥ १३ ॥
त्रस्तः समंतादपि यत्प्रतापात् द्विषोभिगच्छन् शरणं जलस्य ।
अकृत्यमप्याद्रियतौर्ववन्हि रहो दुरंता बत जीविताशा ॥ १४ ॥
प्रत्यर्थिनां वेश्मसु यत्प्रताप—ज्वालावलीढेषु समंततो यत् ।
उज्जंगमामास तृणोच्चयस्त द्युक्तं जनेप्यस्य तथैव सिद्धेः ॥ १५ ॥
भूवल्लभो **वल्लभराज**नामा ततोभवद्वास्वदनर्घधामा ।
लीलावतीलोचनलोभनीय—लावण्यलीलाद्भुतरूपसंपत् ॥ १६ ॥
हित्वा वपुर्मानुषमाजिभूमौ धृतत्वरा देवभुवं व्रजंतः ।
प्रत्यर्थिभूपाः स्मृतयत्प्रतापा श्चकंपिरे वीक्ष्य सहस्ररश्मिं ॥ १७ ॥
स्वर्गश्रियां वैभवजित्वरीणां श्रियामपारत्वमवेक्ष्य यस्य ।
तत्स्पर्धयेवाऽशु यशांस्यपारी—भूय व्यजृंभंत जगत्यशंकं ॥ १८ ॥
विश्वंभराभारधुरीणबाहु **रामस्ततो** ऽजायत बाहुजेशः ।
विमर्दितोद्यत्खरदूषणेन येन त्रिलोकी वशमाशु निन्ये ॥ १९ ॥

जयश्रियं स्वामिशयांबुजेन संयोजयन् शत्रुतमांस्यपास्यन् ।
ज्वलत्प्रतापावलिदीप्तकांती रणे कृपाणो ख्वयद्यदीयः ॥ २० ॥
छिंदन् शिरांसि प्रतिपक्षभूमी—भृतामसिर्यस्य विशुद्धधारः ।
पस्पर्श रक्तं न यतो विशुद्धाः परस्य केनापि न संसृजंति ॥
ततो महीक्षित्तमतां दधार **चामुंडराज**स्तरसा प्रचंडः ।
यत्पाणिपद्मे करवालवल्ली जयश्रियो वेणिरिव व्यराजत् ॥ २२ ॥
यस्य प्रतापः प्रसृतः पृथिव्यां बिभेद शंके दृषदोपि नूनं ।
अद्यापि नोचेत्स्फटिकोपलेभ्यो हिरण्यरेताः प्रकटः कुतोस्तु ॥ २३ ॥
कृतांतकांताकुचकुंभपत्र—लतापिधाने विधृतावधानं ।
यः संगरे **हेजमदीन**संज्ञं शकाधिराजं तरसा व्यधत्त ॥ २४ ॥
नृपोथ दध्रे वसुधां सुधांशु–भाजिद्यशा **दुर्लभराज**संज्ञः ।
भ्रुवैव संगान्समरांगणे यः प्रापीपठद्वैरिगणान्निकामं ॥ २५ ॥
जितं स्वमालोक्य यदीयकीर्त्या शंके त्रिनेत्रो ग्रहिलत्वमाप ।
महेश्वरस्यापि कुतोन्यथास्य कौपीनवासो वसनेनुरागः ॥ २६ ॥
यत्खड्गधाराभिररिव्रजानां प्रतापवह्निः शमितः समंतात् ।
तदंगनाबाष्पभरैरथास्य चित्रं न कुत्रापि निरस्यते स्म ॥ २७ ॥
**सहाबदीनं** समरे विजित्य जग्राह यो बाहुबलेन मानी ।
असंख्यसंख्यार्ज्जितशारदीन—शशिप्रभाभेतृ तदीयकीर्तिं ॥ २८ ॥
ततो भवद्दुःशलदेवनामा भूमानऽरिव्रातविजितृधामा ।
यन्मानसं प्राप्य न धर्महंसः काँस्कान् विलासान् कलयांचकार २९ ॥
पलायमाना दरतो द्विषंतो बुंबारवान् यान् समरेष्वकार्षुः ।
जयश्रियः पाणिमहाय यस्य त एव वेदध्वनयो बभूवुः ॥ ३० ॥
नाकेशनारीजनगीयमान–गीतामृतास्वादवितीर्णकर्णं ।
**श्रीकर्णदेवं** समरे विधाय तद्राज्यलक्ष्मीं परिणीतवान् यः ॥ ३१ ॥
हस्ते लगित्वास्य जगत्समक्षं कंठे लुठंत्याः प्रतिभूपतीनां ।
यत्खड्गवल्लेरसतीव्रतायाः किमौचितीं नांचति कालिका स्म ॥ ३२ ॥

महीं महीं भूषयतिस्म तस्मात् श्री**विश्वलो** विश्वविलासिकीर्तिः ।
समूलमुन्मूल्य कुलं रिपूणा मेकाधिपत्यं भुवि यश्चकार ॥ ३३ ॥
प्रस्त्वराऽनीतिलतावितान–कुठारकल्पेपि यदीयराज्ये ।
ललास लेके यदनीतितैव तत्कस्य नो विस्मयमाततान ॥ ३४ ॥
यस्यारिनारीगिरिगह्वरेषु सुहृन्मृगाक्षीरतिमंदिरेषु ।
स्थिता सुखं भूषणभूषितांगी विवेद नैवोदितमस्तमर्कं ॥ ३५ ॥
हताऽहितानां सकलेवराणां स्पर्शोल्लसत्सुप्तिभराप्तदोषे ।
तल्लोलदृग्लोचनवारिपूरैः क्षोणीतलेऽबूक्षणमक्षिपद्यः ॥ ३६ ॥
अहीनधामानमदीनसेनं **सहाबदीनं** समरे निहत्य ।
अमूमुचन्म्लेच्छकुलैर्द्विधापि यो मालवस्यापि विभुर्विभुत्वं ॥ ३७ ॥
ततो भुवं भूषयतिस्म **पृथ्वी—राजः** स्वकीयैर्विशदैर्यशोभिः ।
प्रकंपमाने युधि यत्कृपाणे चित्रं निपेतुर्द्विषतां वतंसाः ॥ ३८ ॥
मूर्ध्न्युह्यमाना सततं जनानां मनोरथानाशु समर्थयंती ।
आज्ञा यदीया हरपादपद्म–सेवेव कल्याणकरी बभूव ॥ ३९ ॥
गंधर्ववृंदैर्दिवि गीयमानां सौभाग्यभंगीं विनिशम्य यस्य ॥
सा का सुरी स्वस्य न या ववांछ तत्संगमावाप्तिकरं नरत्वं ॥ ४० ॥
ततो बभा**वाल्हण**देवसंज्ञो भूभृद्भटं मन्यशिरोवतंसः ॥
वने द्विषंतः स्मृतयद्गजेंद्रा श्चकंपिरे वीक्ष्य महीभृतोपि ॥ ४१ ॥
देहीति जल्पन्नपि याचकेन दानप्रियो यो न जजल्प नेति ॥
दावन्नकिं दानपदेस्ति नोपि बलीयसी केवलमीश्वरेच्छा ॥ ४२ ॥
छिन्नद्विषच्छोणितशोणशोची रणेषु यस्यासिलता चकासे ।
या स्पर्द्धिनीं वाचमुवाच तेन कृष्टेव जिह्वा युधि सैव तेषां ॥ ४३ ॥
यद्रूपगानं भुवि गीयमानं निपीय कर्णांजलिभिर्निकामं ।
स्वप्नप्रसंगाप्ततदीयसंगा बभूव का नो धृतकामरंगा ॥ ४४ ॥
**आनल्लदेवो** भटमौलिमौलिरथोपयेमे नृपतित्वलक्ष्मीं ।
यः संगरे दारितवैरिवार–पाणिंधमं स्वर्गपथं चकार ॥ ४५ ॥

जेगीयमानं निजकामिनीभि राकर्ण्य यं शेष इति प्रदध्यौ ।
कोप्यस्ति धत्ते वसुधां क्षणं यां गत्वा यथैनं प्रविलोकयामि ॥ ४६ ॥
स्वकालिमानं वितरन्नरीणां तेषां च जीवं च यशांसि गृह्णन् ।
रणे यदीयः करवालदंडो वणिक्कलाकौशलकेलिरासीत् ॥ ४७ ॥
गिरीशकैलाससुधासुधांशु–श्रियं समाकृष्य यशः किमस्य ।
वेधा व्यधत्तास्य पुरो यदेते निःश्रीकतामाकलयांबभूवुः ॥ ४८ ॥
प्रोदंच्यपाणिं कनकाद्रिदंभा दिदं जगादेव वसुंधरेयं ।
दाता विवेकी विनयी नयी वा विहाय नैनं सुषुवे मयान्यः ॥ ४९ ॥
त्रस्तेन पत्याऽर्धपथे विमुक्ता स्थितापि यद्वैरिवधः स्वदेशे ।
शीतद्युतेस्तीव्रतया नवं स्वं द्वीपांतरं प्राप्तममंस्त किंचित् ॥ ५० ॥
पर्यंतशैलप्रतिबिंबदंभात् क्रीडारसक्रोडितदिग्द्विपं यः ।
अचीखनत् पुष्करपुण्यपारं कासारसारं शुचि वारिवारं ॥ ५१ ॥
विस्मापकश्रीर्भवति स्म तस्मा द्भूभृत् **जगद्देव** इति प्रतीतः ।
दानं समानं समवाप्य यस्य वनीपकाः [के धनिनो नचोर्व्यां] ॥ ५२ ॥
सशोकधूमाश्रुजलैर्मिलित्वा निश्वासवातैरिपुकामिनीनां ।
सद्यो घनीभूय न दुर्दिनानि तेने यदोजो ज्वलनः किमासां ॥ ५३ ॥
त्यागेतिविश्वस्य विधेर्विधित्सो र्यस्यांगुलीः पाणितलं नखाँश्च ।
स्वर्गोस्तनाः स्वर्द्रुमपल्लवाः स्व—र्मणिः किलाभ्यासकृतेग्रसृष्टिः ॥ ५४ ॥
गुणान् यदीयान् गणयन् विधाता परिश्रमं तं कलयांचकार ।
त्रिलोक्य सृष्टावपि नानुभूते र्यल्लेशमात्रं विषयीबभूव ॥ ५५ ॥
ततो भवद्विश्वल**देव**नामा विश्वापतिर्विश्वविकासिधामा ।
यत्पाणिपाथोरुहि कर्णिकायाः पुपोष भावं ननु भूतधात्री ॥ ५६ ॥
विदारिताऽरातिकरींद्रकुंभा द्यान्यत्र पेतुर्युधि मौक्तिकानि ।
तान्येव पुष्पाणि विकस्वराणि यदीयकीर्तिव्रततेर्बभूवुः ॥ ५७ ॥
यदीयकीर्त्या विजितो हिमाद्रि रद्यापि नाश्रूणि विमुंचते किं ।
भृशं तपत् तापनतापनेन द्रवीभवद्धेमशिलाछलेन ॥ ५८ ॥

गुणान् कणेहत्य निपीय यस्य भृशं प्रहृष्टोपि सुपर्ववर्गः ।
कष्टं [सचित्राहत एव तस्थौ न देवभूपं] श्रितवान् यदेषः ॥ ५९ ॥
तस्मादशोभिष्ट महिष्ठधामा महीमहेंद्रो **जयपाल**नामा ।
स्रवद्भिरस्रैरिपुकामिनीनां यशस्तरुः पल्लवितो यदीयः ॥ ६० ॥
वृंदानि संख्ये बलिनामरीणां वीक्ष्यावरोधे च तनूदरीणां ।
यो विश्वविख्यातयशः प्रकाशो भृशं न कंदर्पमुरीचकार ॥ ६१ ॥
दुग्धोदधिस्फीततरत्तरंग—श्रेणिश्रियां वैभवजेतृभासः ।
जगूरणद्वेणुरवाभिरामं गुणान् यदीयानुरगेंद्रकन्याः ॥ ६२ ॥
गांगेयवद्गेयगुणस्ततोऽभात् **श्रीगंगदेवो** वसुधासुधांशुः ।
निश्वासवातै रिपुकामिनीनां प्रतापसप्तार्चिरदीपि यस्य ॥ ६३ ॥
दोषाकरो यद्यशसो महस्त्वं विलोक्य मात्सर्यभरं दधानः ॥
यदर्जयामास तमःकलंक—च्छलात्तदद्यापि न मुंचतेऽसौ ॥ ६४ ॥
परः शतेभ्योपि रिपुव्रजेभ्यो यच्छन्न तुच्छां सुरलोकलक्ष्मीं ।
उद्दामसंग्राममवाप्य मात्रा हीनः कृपाणोऽजनि यस्य नैव ॥ ६५ ॥
गतेषु कर्णादिषु दानशौंडे—ष्वयं जनो मा जनि दौस्थ्यपात्रं ।
ध्यात्वेति यं दायकचक्रशक्रं मन्ये दयालुर्विदधे विधाता ॥ ६६ ॥
त्रैलोक्यलोकावलिकर्णकर्ण—पूरीकृतानंतगुणैकधाम ।
इलाविलासी जयतिस्म तस्मात् **सोमेश्वरो**ऽनश्वरनीतिरीतिः ॥ ६७ ॥
रणेषु येन स्वकरांबुजेन प्रोल्लास्यमानासिलता चकासे ।
अंतः स्फुरत्क्रोधकृशानुजात—धूम्येव साक्षाद्बहिरुल्लसंती ॥ ६८ ॥
उक्तेन गोत्रस्खलनाद्यदीय—नाम्ना विलक्षं रमणं विधाय ।
चिराय संभोगरसप्रसंगि चेतो निजं प्रीणयतिस्म का न ॥ ६९ ॥
वह्नेर्द्विषन्नंब्विति यत्प्रतापा ऽग्निमभ्यवर्धन्नरियोषितो ऽस्रैः ।
हविर्विदेभिर्ववृधे सकामं वामे विधौ वाममशेषमेव ॥ ७० ॥
अनेन राज्ञा सममेकभावं कथं समायातु भुजंगराजः ॥
अधात्सहस्रेण स गां शिरोभि रयं पुनस्तां भुजयैकयैव ॥ ७१ ॥

**कर्पूरदेवी**ति बभूव तस्य प्रिया [प्रिया] राधनसावधाना ।
जितं यदास्येन जले निलीया द्याप्यम्बुजं किन्न तपस्तनोति ॥ ७२ ॥
इहस्थितोऽसौ रमणः कदाचित् विलोक्य लुब्धो भविता बतैताः ।
इतीव या नो हृदये प्रवेष्टु मेणीदृशामप्यदितावकाशं ॥ ७३ ॥
पत्या भुवो वैषयिकं विनोदं सा निर्विशंकं किल निर्विशंती ।
अमानधामानमसूत सूनुं हरेरिवाशा तुहिनांशुबिंबं ॥ ७४ ॥
अतुच्छवात्सल्यभरं दधानो वितत्य तज्जन्ममहं महांतं ॥
जगज्जनाल्हादकरस्य **पृथ्वी—राजे**तिनामाऽधित तस्य भूपः ॥ ७५ ॥
तनुत्विषानिर्द्दलितांधकार—जालः स बालोऽन्वहमेधमानः ।
भृशं प्रजानां नयनांबुजानां भद्रंकरो भानुरिवाजनिष्ट ॥ ७६ ॥
शस्त्रेषु शास्त्रेषु च लब्धपारं विलोक्य भूमानथ तं कुमारं ।
साम्राज्यभारं प्रवितीर्य तस्मै योगेन मार्त्तं वपुरुत्ससर्ज्ज ॥ ७७ ॥
पित्रा प्रदत्तं समवाप्य काले राज्यं स भूभृन्नितरां चकासे ।
अहर्मुखे हर्पति नोदयाद्रिं यथा तमोव्रातविनाशि रोचिः ॥ ७८ ॥
गुणाभिघातं प्रसभं प्रकुर्व न्नप्येष चक्रे न गुणाभिघातं ।
अपि प्रतन्वन् परलोकबाधां न च प्रतेने परलोकबाधां ॥ ७९ ॥
निषेवमाणोप्यसितांसवृत्तिं नैवासितां वृत्तिमुपाददितैषः ।
तेनेति तेने परलोकपीडा न तेन तेने परलोकपीडा ॥ ८० ॥

द्विट्कुंभिकुंभतटदत्तदृढप्रहार-
प्रत्यंगलग्ननवमौक्तिककैतवेन ।
क्ष्मामंडलं फलितुमुन्मिषितप्रसून
राजीव यस्य युधि खड्गलता विरेजे ॥ ८१ ॥

कीर्तिर्यस्य सतीव्रतेति मृदुरप्याधत्त न प्रत्ययं
चित्ते कस्य न योज्झतिस्म तमहो कल्पांतमप्यास्थितं ।
अन्येषां तु सतीव्रतापि न सती वेश्येव तान् जीविता
वध्येवोज्झति चेन्नयास्म कतिचित्तान् जीवतोप्युज्झति ॥ ८२ ॥

वाग्देवीं चिकुरे शशांक मुदरे शंभुं गले तद्वृषं
प्रोथाग्रे बलमंबरे मदकलं स्वःकुंभिनं कुंभयोः ।
जग्राहास्य यशोभ्रमेण भुवने भ्राम्यद्विषां दुर्यशो
धिग्वैरस्य दुरंततां स्फुरति या तत्संततावप्यहो ॥ ८३ ॥
भेजे यस्य शयालुतां शयपयोजन्मन्यसा विंदिरा ।
तद्रागेण समेदसिच्छलमलंकृत्य स्वयं श्रीपतिः ।
नैवं चेत् बलिवैरिविक्रमभरध्वंसेऽस्यकौतस्कुती
शक्तिः संयति संबभूव नितमामुल्लासिनीलद्युतेः ॥ ८४ ॥
दिक्शैलद्विपकूर्मभोगिविभवः प्रोद्धृत्य सर्वंसहां
तद्भुयो भरभंगुराः परिमुमुक्षंतोपि कंपच्छलात् ।
दृष्ट्वा यं प्रतिपन्नसूरमनिशं भूपालचूडामणिं
लज्जाकीलककीलिता इव न तां शंके त्यजंति स्म ते ॥ ८५ ॥
औन्नत्येन यशोभरेण च पराभूतिं परां लंभितो-
ऽस्योच्चैर्लंभयितुं पराभवपदं वांछन् स्वयं तौ पुनः ।
ईशाराधनमाततान हिमवान् कन्याप्रदानादिभि
र्व्यर्थं किं यशसैककेन न तयोस्तं वेदमूढोजित ॥ ८६ ॥
चिंतारत्नावनद्धेऽनवरतममृता सिक्तकल्पद्रुसांद्र-
च्छायाच्छन्ने निषण्णाः श्रमविगमकृते चत्वरे चत्वरेपि ।
तीरे सिद्धापगायाः सुरसुरभिगणांश्चारयंत्योस्यदानं
जेगीयंतेस्म देव्यः करकमलमिलद्वेणुवीणाविलासाः ॥ ८७ ॥
शश्वद्येन निरीतितां गमयता क्षोणीतलं क्ष्माभृता
दिष्टा अप्यतिवृष्टयो जलनिधेः पारं प्रयातुं परं ।
यत्प्रक्षिप्य ररक्षिरेऽक्षिषु निजेषूच्चैरिपुस्त्रीजनै-
स्तत्तेनैव हतप्रियेण पुपुषे साकं न किं वैरिता ॥ ८८ ॥
यत्खड्गक्षुण्णभूमीपतिविततिशिरःसंचरद्रक्तधारा-
वारां राशिः प्रसर्पन् क्षितितलमखिलं रक्तमेवाकरिष्यत् ।

एषा प्रोद्यच्छदच्छामृतकरकिरणक्षुब्धदुग्धाब्धिमुग्धा
यत्कीर्तिर्विस्फुरंती यदि सपदि न तत् श्वेततामापयिष्यत् ॥ ८९ ॥
वीरे यत्र रणे तथा वितरणे सन्मार्गणानां गणां-
स्तन्वाने प्रथमानमानविभवे संलब्धलक्षान् क्षणात् ।
पूर्वोपार्जितकीर्तिकर्त्तनभिया संभ्रांतचित्तश्चिरं
कश्चिन्न श्रयतिस्म दानपरतां नो वा भटंमन्यतां ॥ ९० ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीर-महाकाव्ये वीरांके श्रीभीमदेवप्रभृतिपूर्वजवर्णनो नाम द्वितीयः सर्गः समाप्तः ॥ छ

---

## अथ तृतीयः सर्गः

अथ प्रथीयस्तरसा रसायास्तलं शयालुं स्वशयं शकेन ।
**सहाबदीनेन** वितन्वतालमुपद्रुताः पश्चिमभूमिपालाः ॥ १ ॥
आल्हादनेनाखिलभूतधात्र्या यथार्थतां नाम निजं नयंतं ।
**गोपालचंद्रां**गवितीर्णरंगं **श्रीचंद्रराजं** पुरतो निधाय ॥ २ ॥
उपायनानीतमहेभकुंभ—गलन्मदार्द्रीकृतभूमिभागं ।
भेजुर्भुजोर्जाविजितारि **पृथ्वी—राजा** लयद्वारमुदारवेगाः ॥ ३ ॥
त्रिभिर्विशेषकं
प्रवेशिता नाथगिराथ वेत्र—करेण कांताभरणा नरेण ।
**पृथ्वीपतेः** पादसरोजयुग्मं नत्वा यथा स्थानमुपाविशंस्ते ॥ ४ ॥
दीनाननाँस्तान् प्रविलोक्य **पृथ्वी—राज**स्ततः पार्श्वचरानुवाच ।
पद्मा हिमासीव निदाघसंज्ञे श्रियं किमंते दधते न भूपाः ॥ ५ ॥
तं **चंद्रराजो**थ जगाद चंद्र—श्रीगर्वकूलंकषदंतदीप्त्या ।
हद्युल्लसद्धाङ्मयदुग्धसिंधो विंस्तारयंस्तारतरानिवोर्मीन् ॥ ६ ॥
तपःप्रभावार्जितवर्यवीर्यः **सहाबदीनः** शकमेदिनीनः ।
उपप्लवायाजनि धूमकेतु रिवावनौ बाहुजमंडलानां ॥ ७ ॥

देशानशेषान् जहि नागराणां हरेणनेत्रा दह मंदिराणि ।
विगृह्य यो बाहुजराजराजेः कुलानि चक्रे विपदाकुलानि ॥ ८ ॥
अशेषभूपालविशेषकाभ के नाम ते क्षोणिभुजः क्षमायां ।
स स्वौजसा त्रासितबाहुजानां वृंदैर्दरीः पूरितवान्न येषां ॥ ९ ॥
यः संगरे संगररंगवेदी क्षात्रं क्षणाद्वेश्म नयन् यमस्य ।
किं भार्गवोयं पुनरेव जात इत्याकुलैर्वैरिकुलैर्व्यतर्कि ॥ १० ॥
अयं समागादयमाः समागाज्जना इति स्फारितलोचनाब्जं ।
दिशो दशापि प्रविलोकयंतो यतो भयेनानिमिषीबभूवुः ॥ ११ ॥
उद्वास्य शस्यान्यपि भूपतीनां यस्त्रैपुराणीव पुराणि शंभुः ।
अतिष्ठिपत् द्विट्कुलशूल **मूल—स्थाने** प्रधानां निजराजधानीं ॥ १२ ॥
निःकारणं दारूणवैरभाजा तेनाभिभूता नृपभूभुजोमी ।
समैयरूस्त्वां शरणं शरण्य मतो भवानेव परं प्रमाणं ॥ १३ ॥
इत्येतदीयां विनिशम्य वाचं वाचंयमानामपि कोपकर्त्रीं ।
आकृष्य कूर्चं तरवारिमुष्टि—पटिष्टनाभात्करवारिजेन ॥ १४ ॥
मयूरबंधेन निबंध्य नैनं पादारविंदे यदि वः क्षिपामि ।
जातोन्वये तर्हि न चाहमाने इति प्रतिज्ञामकरोन्नरेशः ॥ १५ ॥
ततस्ततः श्रीः शुभकारिसर्व–ग्रहे विलग्ने विजये च योगे ।
चचाल चंचन् प्रतिपंथिमाथ चिकीर्षया व्याकुलचित्तवृत्तिः ॥ १६ ॥
पौरैणपोताभदृशः प्रयांतं प्रचिक्षिपुस्तं प्रति यान् कटाक्षान् ।
मांगल्यहेतोः स्म भवंति तस्य त एव दूर्वाक्षतकांतिभाजः ॥ १७ ॥
निरंतरप्राप्तमहाप्रसाद—विशुद्धये शुद्धधियः प्रकामं ।
करस्फुरत्स्फारतरासिदंड–स्फराः प्रचेलुर्वरवीरवाराः ॥ १८ ॥
द्यावापृथिव्योरूदरंभरीणि प्रोत्तुंगरंगद्गजगर्जितानि ।
अपि द्वयानां धरणीधराणां सत्वानि चक्रुर्विधृताधृतीनि ॥ १९ ॥
प्रतापसूर्येऽभ्युदितेदर्सायै साध्यं किमेतेन बतोद्यतेन ।
इतीव तीव्रद्युतिमुद्यतश्रि-सैन्योत्थरेणुस्तिरयांबभूव ॥ २० ॥

रजोव्रजै र्वाजिखुराभिघातो–त्थैर्जानुदघ्नत्वमपि प्रयाताः ।
मदोदकैः सैन्यमतंगजानां वंशद्वयस्यः सरितो बभूवुः ।। २१ ।।
इति प्रयाणैः कृतवैरिवारः प्राणप्रयाणैर्नृपतिः क्रियद्भिः ।
वसुंधरां भूरितरामतीत्याऽभ्यवेष्टयत्तच्छकराजदेशं ।। २२ ।।
आजग्मिवांसं तमुपस्वदेशं चैरैरथाकर्ण्य शकेश्वरोपि ।
संनह्य सैन्यं रिपुदत्तदैन्यं भेजेभ्यमित्रत्वमवार्यवीर्यः ।। २३ ।।
कोदंडदंडद्युतिमंडितांगाः कटीतटाबद्धबृहन्निषंगाः ।
सूक्ष्मासिरुक्षीकृतवैरिवीराः पृष्ठेनिरीयुर्यवनप्रवीराः ।। २४ ।।
प्राक् रेणुजालानि ततः करेणु–कुंभभ्रमत्षट्पदझंकृतानि ।
ततो भटानां स्फुटसिंहनादाः सैन्यद्वयस्याप्यमिलंस्तदानीं ।। २५ ।।
परस्परालोकनितांतजात–प्रसृत्वरायल्लकवेल्लदंगाः ।
नानास्फुरद्धेतिभृतः प्रवीराः प्रतेनिवांसो रणरंगलीलां ।। २६ ।।
मणीचकानीव महीरुहाणां क्षिपन् यशांसि द्रुतविद्रुतानां ।
ववौ मरुत्वान् भटराजराजि–करांबुजत्यक्तपृषत्कजन्मा ।। २७ ।।
मिथः समानाक्षिनिरीक्षणेन प्ररूढगूढप्रतिघा इवोच्चैः ।
घटैकदेशीयभटास्तुशोभा– श्चानामयुध्यंत हठात्तदानीं ।। २८ ।।
दंतावलस्य प्रषरं प्रविश्य कश्चित्तदाघातकलाविपश्चित् ।
क्षुर्या विदार्योदरमुग्रवीर्यो विलोठयामास तमाशु भूमौ ।। २९ ।।
उत्प्लुत्य कश्चित्तरसा रसाया आरूढवांस्तुंगकरींद्रकुंभं ।
लांगूललीलायितखड्गदंड एणारिलीलां कलयांबभूव ।। ३० ।।
काश्चित्स्पदात् स्यंदनमापतंतं धृत्वा करी काकमुखे सुखेन ।
अवाप्य सद्यो भ्रमिमंतरिक्षे प्रास्फालयत्संगरभूशिलायां ।। ३१ ।।
प्रक्षिप्य पश्चात्करमुग्रवेगात् उत्पाटितस्पंदनकैतवेन ।
योद्धुं स्वयं पट्टिशमादधान इवेतरोभात्पदगै रमेभः ।। ३२ ।।
चीत्कारमाकर्ण्य मतंगजानां वित्रस्यतः कोपि तुरंगमस्य ।
उष्णीषखंडेन पिधाय कर्णावपूपुरत्तैः सममाहवेच्छां ।। ३३ ।।

हंतुं क्रुधा दंतिनमापतंतं अरुंतुदाग्रैर्युधि दद्भिरेव ॥
प्रत्यर्थिना लूनभुजद्वयोन्यो दशन् प्रतेने नययुद्धमेव ॥ ३४ ॥
सन्नाहसंधात्वभिजातगात्र-प्रभेदने किं कुतुकं भटानां ।
मनोपि तेषां परमाणुरूप मभेदि यत्तैः करलाघवेन ॥ ३५ ॥
तदा विपत्तौ पितरः सुतानां प्रमोदपूरं युधि लेभिरे यं ।
अपुत्रिणामप्यजनिष्ट तेषा मेतच्छतांशोपि न जन्मकाले ॥ ३६ ॥
अथोद्भटैश्चारभटैस्तुरुष्का श्चंडासिदंडैरभिताड्यमानाः ।
नेशुः समंताल्लगुडप्रपाते यथा कुलान्येकविलोचनानां ॥ ३७ ॥
स्यात्त्वेष यंत्रांतरसंस्थितानां यादृश्यवस्था हरिमंथकानां ।
तादृश्यभूद्भूपतिचाहमान-रणाश्रयाणां यवनेश्वराणां ॥ ३८ ॥
दृष्ट्वा विशीर्णं युधिजीर्णकल्प मिवात्मनीनं शिबिरं शकेशः ।
क्रोधादधाविष्ट महिष्टमुष्टि-धृतासिदंडः स्वयमाशुचंडः ॥ ३९ ॥
तमापतंतं प्रसमीक्ष्य चाह-मानोप्यधावद्धृततीव्रवेगः ।
अंतःस्फुरत्क्रोधकृशानुकीला-नुकारिरागारुणदारुणाक्षः ॥ ४० ॥
करोदरोद्भासिमहासिदंड—छलोल्लसत्पुष्करदुर्निरीक्षौ ।
अभ्युद्यतौ वन्यगजौ किमेतौ वितर्क्यमाणाविति वीरवारैः ॥ ४१ ॥
प्रपूरयंतौ भुवनोदराणि पादाभिघातप्रतिजातशब्दैः ।
मिथः प्रहारप्रथनप्रवीणौ युद्धं चिरायातनुतां क्रुधा तौ ॥ ४२ ॥
एवं नृदेवो युधि युध्यमानः प्रसह्य किंचिच्छलमाकलय्य ।
शकाधिराजं विनियम्य सम्य गपूपुरत्स्वां विधिवत्प्रतिज्ञां ॥ ४३ ॥
महीमहेंद्रान् शरणागतांस्तान् स्वे स्वेधिकृत्वा विषये नयेन ।
ततः स मानी निजराजधानी मापद्विमानीकृतशत्रुजातः ॥ ४४ ॥
वासांसि दत्वा सुरलोकलोभिमहांसि तस्मा इति राड् मुमोच ।
हा तत्र को नाम पुनर्विधित्सु रमामया संगरमेवमुच्चैः ॥ ४५ ॥
पृथक् पृथक् संगररंगभंग्ये—त्थं सप्तकृत्वः क्षितिवासवेन ।
विनिर्जितोसौ यवनावनीशो मम्लौ च जग्लौ च भृशं नृशंसः ॥ ४६ ॥

अथासहस्तं स्वबलच्छलाभ्यां जेतुं शकेशः शकचक्रकेतुं ।
बलाभिलाषी प्रचचाल चंद्र इव ग्रहेशं प्रति षर्प्परेशं ॥ ४७ ॥
कांबोजलंगाहथभीमभिल्ल—बंगादिदेशाधिपपेशलश्रि ।
शिष्टाष्टलक्षप्रमितामिताहि—क्रांतत्वराजित्वरवाजिराजि ॥ ४८ ॥
संपादितारातिविपत्तिपत्ति—कोट्याकुलं शौर्यकलं बलं स्राक् ।
उक्तात्मवार्ताय नृपाय तस्मै घटैकदेशीयनृपो ददेऽथ ॥ ४९ ॥
सद्यस्ततोऽसौ प्रसरत् प्रसादात् साम्राज्यमासाद्य सहाबदीनः ।
न केनचित् ज्ञातचरः समेत्य जग्राह दिल्लीमतिविग्रहेण ॥ ५० ॥
ततो भियाभ्यस्तपलायनानां हताहता हेति कृतारवाणां ।
भग्नप्रभाणां मुखतो जनानां समागमं शत्रुपतेर्निशम्य ॥ ५१ ॥
रणे मयासौ शतशो जितेपि किं चापलं बाल इवातनोति ।
वहन्नहंकारमिति क्षितीशः प्रचेलिवांस्तुच्छपरिच्छदेपि ॥ ५२ ॥
युग्मं

प्राग्लग्नतद्धस्तभृशानुभूत—भीस्तं समीक्ष्येति शकः प्रदध्यौ ।
अस्माकमेकाक्यपि नैष जेतुं शक्यो मृगाणामिव पंचवक्त्रः ॥ ५३ ॥
ततो निशीथे निभृतांधकारे संप्रेषितैः प्रत्ययितैः शकेशः ।
अबीभिदत्पुष्कलनिष्कदानै स्तस्याश्वपालं सह तौर्यिकैः सः ॥ ५४ ॥
दिष्टया समेता ध्रुवमस्मदुक्ता यास्यंति वेश्मानि परं निजानि ।
हन्मो वितन्मोद्य दृढं स्वराज्य मित्युक्तियुक्तिप्रथका मिथोपि ॥ ५५ ॥
आकाशशेषे तुहिनांशुबिंबे प्रकाशकल्पेऽतुहिनद्युतौ च ।
शकाः समंतान्निभृतं समेत्य पृथ्वीपतीये शिबिरे निपेतुः ॥ ५६ ॥
युग्मं

गृहाण शस्त्रं निगृहाण शीघ्रं प्रयात एवैष शकोऽग्रतस्ते ।
आहन्म एतान्निहता बतैते रित्थं भटप्रोद्भटवाक्यचित्रे ॥ ५७ ॥
प्रवर्त्तमाने समरे समंता च्छकेशनुन्नेन तदाश्वपेन ।
तुरंगमस्तेन नृपाय नाटा—रंभाभिधानो श्वयते ददे सः ॥ ५८ ॥

तमश्वमारूढममुं विभाव्य शकात्तचित्ता अथ तौर्यिकास्ते ।
अवीवदन् वीरवरप्रियाणि मृदंगभेरीपटहादिकानि ॥ ५९ ॥
अभ्युन्नतांभोधरधीरगर्जि—वितर्जिनं तूर्यरवं निशम्य ।
प्रनर्त्तितुं बर्हणवत्प्रवृत्ते तार्क्ष्ये विलक्षः क्षणमास भूपः ॥ ६० ॥
भज स्थिरत्वं व्रज मा विषादं इत्युक्तिभाजो यवना जवेन ।
किं कार्यता मूढममुं तथास्थ मवेष्टयन् द्राक् चटका इवाहिं ॥ ६१ ॥
भुवं स्पृशन् दक्षिणपादजान्वं—गुष्ठेन चाकुंचितवामपादः ।
वहन् कृपाणावरणं च हस्ते ऽथोत्प्लुत्य सप्तेर्निषसाद भूमौ ॥ ६२ ॥
भंग्या भ्रुवः कांश्चन कांश्चिदुग्रा—सेर्वेल्लनैः कांश्चन सिंहनादैः ।
वित्रासयन् चित्रविधायि युद्धं चिराय चक्रे भटचक्रशक्रः ॥ ६३ ॥
पृष्ठे शकस्तावदुपेत्य कश्चित्प्रक्षिप्य कंठे धनुराततज्यं ।
अपीपतद्भूपतिमाशु पश्चात् संभूय सर्वे तरसा बबंधुः ॥ ६४ ॥
अथ स धरणिकांतः सद्गुणालीनिशांतः
प्रतिहतखलजातः प्रौढराढावदातः ॥
विधिविलसितयोगादाप्तबंधः शकेंद्रात्
द्विरपि रतिमहासीद्भोजने जीवने च ॥ ६५ ॥
यवनाधिपदेशमनुप्रहितं विभुने[व] पुरोदयराजभटं ।
समुपेतमवेक्ष्य तदा शकराट् प्रविवेश पुरीमुररीकृतभीः ॥ ६६ ॥
कष्टं निशम्योदयराज ईशितुः प्राप्तं तथा नाह मभूव मित्यथ ।
मूर्धानमुच्चैरधुनोन्मुहुर्मुहुः शल्यं तदुद्धर्तुमिव स्वतो हृदः ॥ ६७ ॥
संत्यज्यैनं व्यसनपतितं स्वामिनं चेद्व्रजामि
क्रीडां व्रीडा कलयति तदा गौडगोत्रे सुखं मे ।
इत्थं ध्यात्वा शकपतिपुरीं संनिरुध्याभितोसौ
तस्थौ पक्षद्वयमनुदिनं युध्यमानो हठेन ॥ ६८ ॥
म्लेच्छावनीपमिममेवमन्यदा कश्चिज्जगाद सविषादमानसः ।
त्वामेष कोऽमुचदनेकशो रणे त्वं नैकवेलमपि हा जहास्यमुम् ॥ ६९ ॥

धर्मोचितामपि तदेति तद्गिरं श्रुत्वा भृशं स कुपितो नृशंसधीः ।
उच्यंत एत इत एव विद्रव—द्राजज्ञकोपनिषदस्तमित्यवक् ॥ ७० ॥
वीरेंद्रेष्वथ दत्तदृष्टिषु धरापीठे ह्रिया स्राक् सतां
सांद्राश्रुस्रुतिसिक्तशोकलतिकाकंदेषु वृंदेषु च ।
आनीयैष नृपं तमुग्रतररुट् दुर्गांतरे चीचय-
त्कार्याकार्यविचारणांधबधिरा हाहाऽधमाः सर्वतः ॥ ७१ ॥
शैवा य "च्छिव" मामनंति "सुगतं" बौद्धा यदाचक्षते
"सर्वज्ञं" यदुदाहरंति नितमामर्हन्मते छेकिलाः ।
तद्ब्रह्माद्भुतचिन्मयं स्थिरमनास्तत्र स्थितोसौ स्मरन्
पृथ्वीराजनृपो नृपालितिलको लेभे शिवं शाश्वतं ॥ ७२ ॥
पृथ्वीपतेरिति विनाशगतिं निशम्य
दूनः स गौडकुलपंकजबालसूर्यः ।
स्थानं निजं तदुपगम्य बलं स्वयं च
युध्वा दिवस्पतिपदं तरसाससाद ॥ ७३ ॥
अधिगत्य भूपतिविपत्तिमिति स्रवदश्रुमिश्रनयनस्तदनु ।
विहितौर्ध्वदैहिक इलामखिलां स्वकरे चकार **हरिराजनृपः** ॥ ७४ ॥
यन्नामप्रतिवर्णसंश्रुतसुधापूरापतद्यद्यशः
कर्पूरोरुरजोभरप्रसृमराविर्भाविपंकाकुले ।
वाणीनां पथि नाभजंत पथिकीभावं यदीया गुणा
औदार्यप्रमुखाः किमद्भुतमहो तत्तत्कवीनामपि ॥ ७५ ॥
यत्पाणिं सरसीरुहं किल रमा भेजेऽसिदंभाच्च तां
रागादन्वगमत्स्वयं हरिरभूत्सूनुः प्रतापस्तयोः ।
यः श्रुत्वाऽग्रजवैरिणं स्मररिपुं कोपात्तथाऽतीतपत्
नालं दूरयितुं यथा क्षणमपि स्वस्मात्स गंगामभूत् ॥ ७६ ॥
भूचक्रे स्वयशोद्रितुंगशिखरादभ्युद्गतैरंशुभि-
र्ब्रह्मांडाहतिभग्नवेगविधुरैः पश्चान्निवृत्तैः पुनः ।

देवानामपि कुंभजन्ममुनये दातुं किमर्थं व्यधात्
नित्योल्लासिविकासिकाससुभगं भूष्णुश्रियं यो दिवम् ॥ ७७ ॥
विधुरतिविधुरश्रीर्निस्तरंगा च गंगा
कनकगिरिरगौरस्त्यक्तगर्वश्च शर्वः ।
कुमुदममदमैंद्रः सिंधुरो नोद्धुरोजा
अजनि लसति विष्वग्द्रीचि यत्कीर्तिपूरे ॥ ७८ ॥
यान् यान् व्यत्यगमन्नृपान् कृतनतीस्ते ते प्रकाशं ययु-
र्यान् यान् प्रत्यचलच्च भेजुरभितस्ते ते क्षणान्म्लानतां ।
यस्य क्षोणिपतेः प्रतापवसतेर्दिग्जैत्रयात्रोत्सवे
सेना कापि न वा व्यराजततमां संचारिणी दीपिका ॥ ७९ ॥
कर्त्तुं दिग्जयमुद्यतस्य निखिलं क्षोणीतलं क्रामता-
मश्वानां गतिभंगता मुपनयन् वेगोत्तरं धावतां ।
वारांराशिरसावजायत तमां यस्यांतरायः कवे-
र्वाचां वाच्यविचारभास्वररूचां गोष्ठीशठानामिव ॥ ८० ॥
हत्वानेन विपक्षभूमिपतयः स्वैर्वैभवं लंभिता
अस्येमामुपकारितां स्वहृदये संभाव्य तेपि क्षणात् ।
सच्चक्रुर्गजवाजिराजिवसुधाकोशादिदानैरमुं
वंध्यं सारपरोपकारजनितं पुण्यं न शत्रावपि ॥ ८१ ॥
हुत्वा यो निजकोपपावकमुखे द्विड्वीरहव्यं शुचा-
क्रंदत्तद्रमणीविलोचनगलद्बाष्पांबुभिर्भूरिभिः ।
भूचक्रेऽत्र तथातिवृष्टिमनिशं प्रोल्लासयामासिवान्
आशिश्राय यथाविनाशमचिरादन्यायबीजांकुरः ॥ ८२ ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीरांके श्रीपृथ्वीराजसंग्रामवर्णनो नाम तृतीयः सर्गः॥

## अथ चतुर्थः सर्गः

कुर्वन् कुवलयोल्लास मसंतापकरैः करैः ।
वेला इव तुषारांशुः स प्रजा अभ्यवीवृधत् ॥ १ ॥
राज्यं निर्विशतेऽन्येद्यु **र्हरिराज**महीभृते ।
प्रीतिव्रततिवृद्ध्यर्थं श्रीगुर्जरनरेश्वरः ॥ २ ॥
विस्फुरच्छुक्रसंबंधाः समुन्नतपयोधराः ।
वर्षा इवोल्लसद्धर्षाः प्रेषयामास नर्त्तकीः ॥ ३ ॥ युग्मं
अन्यदा स्फुरितोदार—स्फारशृंगारभासुरे ।
नृपे च नृपलोके च स्फीतप्रीतौ निषेदुषि ॥ ४ ॥
वाद्यमानेषु वाद्येषु तालमेलमनोहरं ।
गायनेषु च गायत्सु कोकिलालापकोमलं ॥ ५ ॥
दृढयौवनसोपानाः शृंगाररसवारयः ।
विस्फुरद्वालसेवाला विलासोल्लासवीचयः ॥ ६ ॥
पीनस्तनोल्लसत्कोका विस्मेरवदनांबुजाः ।
चलदृक्पृथुलोमानः सुमेषोर्दीर्घिका इव ॥ ७ ॥
वात्याव्यतिकराद्धूत—कदलीदलवत्तनुं ।
वेल्लयंत्यो भ्रमंतश्च चक्रजीविकचक्रवत् ॥ ८ ॥
कदाचिद्भुजयोर्मूलं कदाचिन्नाभिमंडलं ।
कदाचन कुचौन्नत्यं दर्शयंत्यो मुहुर्मुहुः ॥ ९ ॥
लसल्लावण्यलीलाभि र्लोकलोचनलोभनाः ।
मूर्त्ताः (कंदर्प) दर्पास्ताः प्रावर्तंत प्रनर्तितुं ॥ १० ॥

सप्तभिः कुलकं

तस्याजननमेवासी दासां लावण्यवारिधौ ।
मग्ने दृग्मनसी यस्य निर्यातुं शक्ततां गते ॥ ११ ॥

इति तासां स्फुरद्भासां नाल्यं पश्यन्नहर्निशं ।
क्षणमात्रमपि त्यक्तुं नालंभूष्णुरभूदयं ॥ १२ ॥
ततोऽसौ गीतनृत्तादि—दक्षदानपरायणः ।
मितंपचत्वं शिश्राय सेविनां जीविकार्पणे ॥ १३ ॥
वार्तामलभमानास्ते तस्य सेवामहासिषुः ।
स्वार्थसिद्धिं विना कोपि किं स्यात्कस्यापि सेवकः ॥ १४ ॥
राज्यस्थितिं तथाभूतां दर्शंदर्शं प्रजा अपि ।
विरज्यंतेस्म तस्मात् स्राग् स्त्रितमा दुर्भगादिव ॥ १५ ॥
एतत्स्वरूपं विज्ञाय प्राग्वैरी **शक**नायकः ।
ससैन्योभ्येत्य दिल्लीतो देशसीमानमानशे ॥ १६ ॥
काकनाशं ततो भीत्या प्रनष्टजनताननात् ।
सौख्यसर्वंकषं श्रुत्वा गमनं शत्रुभूपतेः ॥ १७ ॥
आरभ्य **पृथ्वीराजेंद्र**—नाकलोकातिवासरं ।
अकृत्यमिति संत्यक्त—शकाननविलोकनः ॥ १८ ॥
सांतःपुरपुरंध्रीक स्ततोसौ ज्वलने विशत् ।
भाविनी यादृशी कीर्ति र्मतिः स्यात्तादृशी नृणां ॥ १९ ॥

त्रिभिर्विशेषकं

नाकलोकं पृणे ऽमुष्मि न्नम्लासीत्तत्परिच्छदः ।
अस्तंगते जगद्दीपे स्मेरः किं कमलाकरः ॥ २० ॥
अपुत्रत्वेन भूभर्तुः शत्रोरागमनेन च ।
चिंताचांतहृदो बाढं मंत्रयंति स्म मंत्रिणः ॥ २१ ॥
अपत्यं भूपतेर्नास्ति भटा न च रणोद्भटाः ।
विपक्षस्तु महावीर्यः कथं रक्षिष्यते पुरं ॥ २२ ॥
तत् त्यक्त्वा नीवृतं यामो **रणस्तंभपुरं** प्रति ।
सूरोपि बलवैकल्यात् श्रयेत् द्वीपांतरं न किं ॥ २३ ॥

तत्रास्ति **पृथ्वीराजस्य** प्राक् पित्रातो निरासितः ।
पौत्रो **गोविंदराजाख्यः** स्वसामर्थ्यात्तवैभवः ॥ २४ ॥
स्वस्वामिवंशकासार–हंसं तं भूपमाश्रिताः ।
कीर्त्तिपात्रीभवंतोऽत्र–तिष्ठेम ह्यकुतोभयाः ॥ २५ ॥
मंत्रयित्वेति भूपीयं सर्वं कोशबलादिकं ।
सहादाय चलंतिस्म **रणस्तंभपुरं**प्रति ॥ २६ ॥
दावपावकवत् वाक्ष्यं ज्वालयन् देशमुद्गसं ।
**शकः** पश्चादुपागत्या ऽ**जयमेरुपुरं** ललौ ॥ २७ ॥
अथ प्राप्य **रणस्तंभं पुरं गोविंद**भूपतेः ।
समगंसत ते सर्वे वृत्तांतं च न्यगादिषुः ॥ २८ ॥
पितृव्यस्य तथाभूतं मृत्युं श्रुत्वा धराधिपः ।
वाचामगोचरं कष्टं कलयामास मानसे ॥ २९ ॥
स्मृतिस्मृतिपरित्यक्त—शोकः कृत्वौर्ध्वदैहिकं ।
धीसत्वांस्तान् यथायोग्य–कार्येणायोजयन्नृपः ॥ ३० ॥
पराभवन् द्विषच्चक्रं प्रभवन् न्यायवृद्धये ।
सौख्यं चानुभवन्स्फीतं स प्रजाश्चिरमन्वशात् ॥ ३१ ॥
**गोविंदे** दिविषद्वृंदे संचारयति चातुरीं ।
तानवं शात्रवं निन्ये श्रीमद्वाल्हण भूपतिः ॥ ३२ ॥
घनवत् समरे यत्र शरासारं वितन्वति ।
नाशेनैवा ऽभवद्व्यक्ता रिपूणां राजहंसता ॥ ३३ ॥
वर्षत्यपि भृशंबाण–धाराभिर्यद्धनुर्घने ।
चित्रं विच्छायतामेव भेजिरे शत्रुभूभृतः ॥ ३४ ॥
सत्वरं जित्वरं वीक्ष्य समरे यमरित्रजाः ।
अभिलेषुः सपक्षत्वं न वरं नाशहेतवे ॥ ३५ ॥
नाम्नि धाम्नि च संक्षेपं विधित्सन् यो विरोधिनां ।
अवनीपालतां हित्वा द्राग् वनीपालतां ददौ ॥ ३६ ॥

स दानभोगौ गोचक्र–मंडनौ पापखंडनौ ।
उभावभूतां तत्पुत्रौ सूर्याचंद्रमसाविव ॥ ३७ ॥
गुणश्रेष्ठस्तयोर्ज्येष्ठः ख्यातः **प्रल्हादनाह्वयः** ।
द्वैतीयीको द्वितीयश्री **वाग्भटः** प्रतिपद्भटः ॥ ३८ ॥
समं वितन्वतोः क्रीडां सममभ्यस्यतोः कलाः ।
अवर्द्धिष्ट तयोः प्रीती रामलक्ष्मणयोरिव ॥ ३९ ॥
वीक्ष्याऽन्यदा नृपो मूर्ध्नि पलितं करणीं जरां ।
शपतिस्माऽऽशु भोगेभ्यो योगेभ्यः श्लाघते स्म च ॥ ४० ॥
ततोनुशास्य विधिना भूपः पुत्रावुभावपि ।
न्यधात् **प्रल्हादनं** राज्ये प्रधानत्वे च **वाग्भटं** ॥ ४१ ॥
स्वयं स्थित्वा कियत्कालं तयोः प्रीतिमिवेक्षितुं ।
प्रांते स्मरन् परब्रह्म बभूवे दिविषत्पदं ॥ ४२ ॥
कृत्वौर्ध्वदैहिकं वप्तु स्ततः **प्रल्हादनो** नृपः ।
अरंजयत्प्रजा नाव्यो–पनिषज्ज्ञो यथा सभाः ॥ ४३ ॥
भास्वत्यभ्युदिते यस्मि न्नासत्यजनि कर्त्तरि ।
सपक्षैश्च विपक्षैश्च कौतुकं कौशिकायितं ॥ ४४ ॥
विशामीशे दशाऽप्याशा जेतुं यत्र कृतोद्यमे ।
वैरिणो जीवितं त्रातुं द्विधापि प्रधनं जहुः ॥ ४५ ॥
बलिध्वंसोल्लसद्धामा शयशायिसुदर्शनः ।
विष्वक्सेनोपि यश्चित्रं न भेजे दानवारितां ॥ ४६ ॥
उत्सलद्धूलिविज्ञात–खुराग्रक्षुण्णभूतलाः ।
त्वरया वायुविस्फूर्ति–जित्वरा स्तुरगा बभुः ॥ ४७ ॥
मुदान्यदा स दावाग्नि–प्रतापश्चापविद्गुरुः ।
विधित्सुः पटुमाखेटं निरगान्नगराद्बहिः ॥ ४८ ॥
आजानुलंबि सुस्थूल–नीलीचीवरधारिणः ।
चेलुः पदातयो मूर्त्ता भयानकरसा इव ॥ ४९ ॥

स्तब्धोर्ध्वकर्णाः सुस्निग्ध–वर्णाः स्वर्णाग्रकंठिकाः ।
चाक्षुषा मातरिश्वान इव श्वानश्चकासिरे ॥ ५० ॥
वाहिनीशतसंश्लेष–बहलैः प्रचलद्दलैः ।
समुद्रैरिव कल्पांत–भ्रांतैर्विह्वलयन्निलां ॥ ५१ ॥
विस्मेरसुमनोबाण–करवीरमनोहराः ।
नारीरिव वनीर्वीक्ष्य नृपोभूद्रंतुमुन्मनाः ॥ ५२ ॥
बलभद्रास्ततः केपि हरिमार्गानुसारिणः ।
केचिच्छशधरादृष्ट–सिंहिकासुतविक्रमाः ॥ ५३ ॥
केचिच्छिवानुगा रौद्रा वृषोल्लंघनजांघिकाः ।
अंतर्वणं विशंति स्म भटा आखेटलंपटाः ॥ ५४ ॥
द्विधापि पृष्ठदानेन सत्रपः कोपि सिंहयोः ।
यशोमृतं पिबन्नंतः स्थितः क्रोडं व्यडंबयत् ॥ ५५ ॥
मत्स्वामिवल्लभां शश्वद्वसुधां चंखनीत्ययं ।
इति प्रकुपितः कोपि वराहं मध्यतोऽच्छिनत् ॥ ५६ ॥
त्वन्नेत्रकांतिचौरोयं यथारुचि विधीयताम् ।
इति कश्चित्प्रियाप्रीत्यै मृगं बध्वा समाग्रहीत् ॥ ५७ ॥
निघ्नन् पुरः स्थितं सिंहं हत्वा पृष्ठागतं परं ।
लेभे काकाक्षगोलस्यो–पमानं कस्यचित्करः ॥ ५८ ॥
तत्कटीदर्शनादाशु प्रियां संस्मृत्य कश्चन ।
न हातुं न प्रहंतुं च सिंहमासीत्क्षणं क्षमः ॥ ५९ ॥
व्यात्तवक्त्रे करं क्षिप्त्वा छित्त्वा केसरिणः शिरः ।
उदंचितभुजो बाहु—त्राणवत्कोप्यदीदृशत् ॥ ६० ॥
निजिघांसुं मृगीं कंचिन्मृगो दृष्ट्वातिकाष्ठितः ।
स्वयमासांतरावर्ती कटास्नेहकटाक्षितं ॥ ६१ ॥
वंचयित्वाथ दाक्ष्येण कोपि दृग्गोचरं हरेः ।
पृष्ठमारूढवान् सिंह—यानलीलायितं दधौ ॥ ६२ ॥

कृत्वातिसिंहस्थामप्राक्—पश्चाच्छस्त्रेण पातितः ।
वराहो रारटीतिस्म स्वभावः खलु दुस्त्यजः ॥ ६३ ॥
नृपोपि वर्षन् हर्षेण शरासारैररुंतुदैः ।
श्वापदानापदाक्रांता न्कुर्वन्गच्छन् यदृच्छया ॥ ६४ ॥
क्वचिद्गिरिणदीतीरे स्फुरच्छरवणांतरे ।
पारींद्रमेकमद्राक्षी न्निद्रामुद्रितलोचनं ॥ ६५ ॥ युग्मं
उत्साह्य भूपो विज्ञात–शरसंधानमोक्षणः ।
निर्ममे दक्षिणेर्म्माणं तं पारींद्रं विनिद्रितं ॥ ६६ ॥
तेनैवोत्साहनादेन कुतोपि कुपितोन्यतः ।
तावत्परः स्फुरत्फालः सिंहः संहतविक्रमः ॥ ६७ ॥
जग्राह भूपतेरंसं प्रांशुं तीव्राग्रदंष्ट्रया ।
उरोविदारं राज्ञापि क्षुर्याऽसौ प्रतिचस्करे ॥ ६८ ॥ युग्मं
दंष्ट्राघातस्त्रवद्रक्त—धाराभिरभितश्चितः ।
दधौ धातुद्रवाश्लिष्ट—शैललीलां क्षणं नृपः ॥ ६९ ॥
ततो दंष्ट्राविषोत्सार्प— मूर्छाभिर्विव्हलीकृतः ।
यतीवर्द्धिं स पापर्द्धिं त्यक्त्वागादात्ममंदिरं ॥ ७० ॥
मंत्रवादिगणैर्वैद्य—वृंदैरपि परः शतैः ।
भृशं चिकित्स्यमानोपि नाभूद्भूपः स्वरूपभाक् ॥ ७१ ॥
दुश्चिकित्सतरं ज्ञात्वा ऽत्मानं भूपोथ सर्वथा ।
**वीरनारायणं** पुत्र मभ्यषिंचान्निजे पदे ॥ ७२ ॥
पतिष्यच्चाहमानीय राज्यश्रीवल्लिपादपं ।
**वाग्भटं** च समाहूय सोदरं जगिवानिति ॥ ७३ ॥
शौर्यं बुद्धिरविश्वासो राज्यश्रीकारणं त्रयं ।
तदुक्तं स्थावरे स्वापं दुरापं शैशवे पुनः ॥ ७४ ॥
तदस्ति स्वापचापल्ये बाल्येऽसौ वयसि स्थितः ।
अनुशास्यस्तथाकारं यथास्यान्नाहितं क्वचित् ॥ ७५ ॥

दौःशल्येन सुतस्यास्य सशल्य इव **वाग्भटः** ।
मंदंमंदमथाचख्यौ मन्युगद्गदया गिरा ॥ ७६ ॥
भवितव्यं तु न स्वामिन्निरोद्धुं कोपि सासहिः ।
त्वामिवैनं पुरोपासे सावधानः परं सदा ॥ ७७ ॥
उक्त्वेति **वाग्भटे** तूष्णीं तस्थुषि क्षितिपाग्रणीः ।
चिकीर्षयात्मनीनस्य सस्मार परमात्मनः ॥ ७८ ॥
राज्यथास्तमिते तस्मिन् **वीरनारायणो** विभुः ।
भास्वानिवासील्लोकानां कमलोल्लासकोविदः ॥ ७९ ॥
स्वतेजसैव यस्याशु द्विषतः पिंषतः सतः ।
वृथा मत्प्रतिकर्मेति क्रिमसिः श्यामतामधात् ॥ ८० ॥
विस्फूर्जद्भुजशौंडीर्य—फणभृद्दष्टवैरिणां ।
यस्य खड्गलता नाग—दमनौषधिवद्बभौ ॥ ८१ ॥
सोन्यदा प्रमदानेत्र—पावनं यौवनं श्रितः ।
परिणेतुं सुतां **कत्स—वाहस्याऽम्रपुरीमगात्** ॥ ८२ ॥
तत्राभिषेणितो **जल्ला—लदीनशक**भूभुजा ।
**पलाय्यागाद्रणस्तंभं** पृष्ठतः सोप्युपागमत् ॥ ८३ ॥
तत्र युध्वा चिरं **जल्ला—लदीनः** प्रौढपौरुषः ।
विज्ञाय तं छलग्राह्यं निवृत्त्यागान्निजां पुरीं ॥ ८४ ॥
कियत्यथगते काले ततः स शकभूपतिः ।
विजिगीषुच्छलेनामुं दूतेनेत्थमचीकथत् ॥ ८५ ॥
ज्योतिश्चक्रेषु सर्वेषु सूर्याचंद्रमसौ यथा ।
तथावां सार्वभौमा वो भूभृत्सु निखिलेष्वपि ॥ ८६ ॥
तन्नौ युक्ता मिथः प्रीतिः पचेलिमफलोदया ।
न च विग्रहविस्फूर्ति भिंदेलिम तमायतिः ॥ ८७ ॥
सहायं त्वादृशं लब्ध्वा समीरमिव पावकः ।
दंदह्येय क्षणेनैव वैरिवंशान् दृढानपि ॥ ८८ ॥

प्रीतोऽस्मि तव शौर्येण त्वं मे भ्रातास्यतः परं ।
द्रुह्यामि यद्यहं तुभ्यं कर्त्रे तर्हि शपे ध्रुवं ॥ ८९ ॥
एकवेलं समेतव्यं मिलनाय परं त्वया ।
न चेदहं समाकार्य स्त्वदादेशवशंवदः ॥ ९० ॥
**वक्षःस्थलपुरेशेन विग्रहाख्येन** विग्रहैः ।
सुतरां विगृहीतस्य सिसाधयिषतोऽथ तं ॥ ९१ ॥
ताभिर्दूतोक्तिभंगीभि र्भृंगीभिरिव वारिजं ।
चुंबितं चाहमानस्य हृदयं व्यश्वसीत्तमां ॥ ९२ ॥ युग्मं
ततोऽवनीपतिं वीक्ष्य शकसंगमनोत्सुकं ।
रहः संवादयामास **वाग्भटः** प्रतिभाभटः ॥ ९३ ॥
नयशास्त्रांबुधेः पार—दृश्वनः का तवौचिती ।
क्रियते दुष्टहृन्म्लेंछ—संगमाय यदुद्यमः ॥ ९४ ॥
शत्रुर्न मित्रतां गच्छे च्छतशः सेवितोऽपि सन् ।
दीपः स्नेहेन सिक्तोऽपि शीतात्मत्वमियर्त्ति किं ॥ ९५ ॥
प्रचिकीर्षसि चेद्राज्यं जिजीविषसि चेच्चिरं ।
तदा मदुक्तिभृंगीयं नीयतां हृदयांबुजं ॥ ९६ ॥
गुरवो यदि वा संतो हितवाक्योपदेशिनः ।
हेयोपादेयतां तस्या—भव्यभव्यौ चिकीर्षतः ॥ ९७ ॥
इत्युक्त्वा तत्र तूष्णीके सर्वांगीणक्रुधांधलः ।
घटयन् भ्रकुटीं भीमां पार्थिवो जगिवानिति ॥ ९८ ॥
अकार्यं यदि वा कार्यं यन्मे रोचिष्यतेतमां ।
करिष्ये तदहं स्वैरं चिंतयात्र कृतं तव ॥ ९९ ॥
**वाग्भटस्तेन** वाक्येन प्रासेनेव हतो हृदि ।
ययौ तद्राज्यमुत्सृज्य **मालवे** सपरिच्छदः ॥ १०० ॥
परमप्रीतिगौराणां पौराणामपि भाषितं ।
उपेक्ष्य गर्वाद्दुर्वीशो ययिवान् **योगिनीपुरं** ॥ १०१ ॥

अंतर्दुष्टो मुखे मिष्टः **शकेंद्रो**ऽभ्येत्य सन्मुखं ।
महेन महतानैषी दंतःपुरि नरेश्वरं ॥ १०२ ॥
प्रियालपनसारखं वनवद्दर्शयन्मुहुः ।
चिरं चकार चेतोऽस्य चित्रप्रचयचुंबितं ॥ १०३ ॥
अन्येद्युर्विषयोगेन शकान्नृपममीमरत् ।
काप्यकृत्यं प्रकुर्वंतः पापा मुह्यंति हंत किं ॥ १०४ ॥
हतेत्रान्यच्छको बोधि जितमेवाशु राजकं ।
मूले छिन्ने हि सुग्राहं फलाद्युच्चैस्तरोरपि ॥ १०५ ॥
ततो **वाग्भट**भूपाल—सूर्येण परिवर्जितं ।
**रणस्तंभपुर**व्योम व्यानशे शकतारकैः ॥ १०६ ॥
शकप्रेरणयेहापि जिघांसुं **मालवेश्वरं** ।
विज्ञाय **वाग्भटो** हत्वा ललौ तद्राज्यमूर्जितं ॥ १०७ ॥
शकातंकपरित्रस्तै र्बाहुजैः शरणागतैः ।
तद्राज्यं प्राज्यलीलाभृ दवर्धिष्ट दिने दिने ॥ १०८ ॥
शके **जल्लालदी**नेथ षर्प्परैरभिषेणिते ॥
**वाग्भटो**ऽप्यमिलत्सैन्यं **रणस्तंभो**द्दिधीर्षया ॥ १०९ ॥
पुन्नागसंगसुभगाः प्रक्षरन्मदनिर्झराः ।
जंगमावनिभृल्लीलां कलयांचक्रिरे द्विपाः ॥ ११० ॥
खुरोत्खातरजःपुंजै विश्वमप्येकरूपतां ।
नयंतो वाजिनां व्यूहा रेजिरेऽद्वैतवादिवत् ॥ १११ ॥
संचरद्रथचक्राणां दिशां कूलंकषैः स्वनैः ।
शब्दाद्वैतमयीवासी दखिलाप्यब्धिमेखला ॥ ११२ ॥
धृतिहेतिततिस्फीत—द्युतिद्योतितदिङ्मुखाः ।
बभुः पदातयो द्वेधा—प्यरिप्राणापहारिणः ॥ ११३ ॥
चलद्बलभरैर्भोगि—विभुना दुर्धरां धरां ।
सृजन्नधो **रणस्तंभं** शिबिरं संन्यवेशयत् ॥ ११४ ॥

दृष्ट्वानेकरणोत्सेक—क्रीडद्वीरकुलं बलं ।
दधिवांसोदरोद्रेकं दुर्गस्थाः शकपुंगवाः ॥ ११५ ॥
लोका अपि लसच्छोका बभूवुः पुरवासिनः ।
सौख्यनाडिंधमाः के वा परचक्रे समेयुषि ॥ ११६ ॥
नृपादेशात्ततः स्फूर्ज न्शौर्यावेशा भटव्रजाः ।
दुर्गग्रहाग्रहग्रस्ता अभियोद्धुं डुढौकिरे ॥ ११७ ॥
गोलैष्टंकैः कुशीभिश्च प्रभिंदंतोप्यनेकशः ।
न तेऽलंभूष्णवोभूवन् दुर्गं भेत्तुं मनागपि ॥ ११८ ॥
भटानां शौर्यचातुर्यं दुर्ग्राह्यत्वं पुरस्य च ।
दर्शंदर्शं नरेंद्रोभू द्विषादाश्चर्यचुंबितः ॥ ११९ ॥
मत्वा दुर्गं बलाऽग्राह्यं सोथ नीतिविदां गुरुः ।
वेष्टयित्वाभितस्तस्थौ निवार्य समराद्भटान् ॥ १२० ॥
निर्यातुं च प्रवेष्टुं चा—शक्नुवंतस्ततो भिया ।
पुरोदरस्थिता लोका लेगिवांसो विषीदितुं ॥ १२१ ॥
वारीण्यदुग्धायंतैक्षु—यष्टीयंत तृणान्यपि ।
एधांस्यचंदनायंत प्राप्त्यभावात्पुरांतरे ॥ १२२ ॥
त्रिमास्यामपि जग्मुष्या पुरं रक्षितुमक्षमाः ॥
पलायिषत सर्वेपि जीवं लात्वा शकब्रुवाः ॥ १२३ ॥
भक्तिगौरास्ततः पौरा उपदापात्रपाणयः ।
संजग्मिरे महीशस्य जयशस्य तमद्युतेः ॥ १२४ ॥
नृपेपि तेभ्यो वस्त्रादि दत्वा कृत्वा च सत्क्रियां ।
स्वच्छोत्सवोच्छलच्छायं प्रविवेश पुरांतरं ॥ १२५ ॥
सैंहिकेयास्यनिर्मुक्त—चंद्रबिंबविडंबिनीं ।
पश्यन्नथारिनिर्मुक्त-रणस्तंभपुरश्रियं ॥ १२६ ॥
गजाश्वस्वर्णरत्नाद्यैर्यथास्थाननिवेशितैः ।
स चकार धरासार—मंदिरं माद्यदिंदिरं ॥ १२७ ॥

क्रमागतोदयस्थानं भास्वान् लब्ध्वा स वाग्भटः ।
कान्कान्भूमीभृतो नैव पादाक्रांतानरीरचत् ॥ १२८ ॥
निवेश्य देशसीमासु चतुर्दिक्षु बलं निजं ।
सुखं द्वादशवर्षाणि स्वयं राज्यं स तेनिवान् ॥ १२९ ॥
तस्मिन्स्वर्लोकलोलाक्षी—कटाक्षविशिखावलैः ।
वीरयोगव्रतावाप्त्यां वेध्यतामुपचक्रिरे ॥ १३० ॥
तन्नंदनो जगन्नेत्रा—नंदनश्चंदनद्रुवत् ।
जैत्रप्रतापः श्रीजैत्रसिंहोऽभूद्भूमिवल्लभः ॥ १३१ ॥ युग्मं
समूलकाषंकषिता—ऽन्यायसंतमसोदयः ।
तिग्मांशुरिव लोकानां यः प्रियं भावुकोऽभवत् ॥ १३२ ॥
सद्वंशस्यापि यच्चाप—दंडस्याहो अनौचिती ।
जग्राह दोषमेवास्य समाजे संगते द्विषां ॥ १३३ ॥
बिभ्रत्सदानभोगत्वं सुमनःश्रेणिसेवितः ।
शचीवरयितुर्लीलां यो भूमिष्ठोप्यचूचुरत् ॥ १३४ ॥
कर्णजाहं जगाहाने शौर्ये यद्भुजदंडयोः ।
चकंपिरे शिरांसि स्राक् दृढानामपि भूभृताम् ॥ १३५ ॥
यदातंकतमग्रस्ते शत्रुशौर्यनभोमणौ ।
व्यक्तं शोकतमोभासी त्तन्नारीणां कचच्छलात् ॥ १३६ ॥
सद्वंशस्याप्यैकमत्यं न यच्चापस्य यस्य च ।
पृष्ठं यद्युध्यदात्प्राच्यः परेषां न पुनः परः ॥ १३७ ॥
अगण्यपुण्यलावण्य—रसप्रसरसारणिः ।
हीरादेवीति तस्यासी त्प्रेयसी श्रेयसी गुणैः ॥ १३८ ॥
सौंदर्येण जिता यस्या रतिस्तामेव भेजुषी ।
जगदे वह्निदग्धस्य शरणं वह्निरेव वा ॥ १३९ ॥
भुंजाना भूभुजा साकं सा कंदर्परसं भृशं ।
शुभं गर्भं दधातिस्म विस्मयैकपदं सतां ॥ १४० ॥

स्वकरांभोजकीनाश—दासीकृतशकासृजा ।
गर्भानुभावतो राज—पत्नी सिस्नासतिस्म सा ॥ १४१ ॥
प्रहर्षुलमनः प्रेयः पूरितोद्दामदौहृदा ।
समये सुषुवे सूनुं सा श्रीरिव सुमायुधं ॥ १४२ ॥
असौ शकासृग्बाष्पूरैः संस्नाप्य धरणीमिमां ।
इष्टातन्मुं - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - — - सृत्वरैः
अभ्युद्यतसहस्रार्क मिवासीत्सूतिकागृहं ॥ १४४ ॥
दिशः प्रसादमासेदुः सुखसेव्यो ववौ मरुत् ।
नभो निर्मलतां भेजे दिनकृद्दिद्युतेतमां ॥ १४५ ॥
विशदं सम्मदं यं त—ज्जनने जनको दधौ ।
शतांशोपि न तस्यासीत् कवीनां गोचरो गिरां ॥ १४६ ॥
तज्जनौ स्वर्णधाराभि रवर्षद्भूपतिस्तथा ।
मूलतोपि यथाशुष्य दर्थिरोरववासकः ॥ १४७ ॥
कृत्वा दशाहिकमहं विश्वं विश्वसुखावहं ।
हर्षाद्धंमीरदेवेति नामामुष्मै पिता ददौ ॥ १४८ ॥
मातापित्रोर्दृशः सिंचन् स्वदर्शनसुधारसैः ।
सौम्यमूर्तिरवर्धिष्ट स शशीव दिने दिने ॥ १४९ ॥
दिनैः कतिपयैरेवा—कृच्छ्रं गुर्वनुभावतः ।
शस्त्रशास्त्ररहस्यानि स स्ववश्यानि तेनिवान् ॥ १५० ॥
न तच्छास्त्रं न तच्छस्त्रं न च तज्जनरंजनं ।
सदाशयांबुजे तस्य न यदभ्रमरायत ॥ १५१ ॥
अथाभंगुरशृंगार—जीवनं यौवनं श्रितः ।
कासां मृगीदृशां निन्ये वशं दृग्मनसी न सः ॥ १५२ ॥
दृग्द्वंद्वपेयसौंदर्य—श्रीणामेकं तमास्पदं ।
दृष्ट्वा वांछन् पतीकर्त्तुं कामिन्यः का न मानसे ॥ १५३ ॥

अकृत्रिमालंकृतिराननस्य तस्योत्थिते श्मश्रुलते व्यभातां ।
आधिक्यतो घ्राणयुगाध्वनिर्य—च्छृंगारधारे इव नेत्रपेये ॥ १५४ ॥
केशाः केकिकलापकांतिजयिनो वक्त्रं शशिप्रीतिभित्
कंठः कंबुरिपुः कपाटपटुताविक्षेपि वक्षस्थलं ।
दोर्दंडौ परिघापघातनिबिडौ पादौ कृताब्जापदौ
किंकिं रम्यतरं न यौवनपदं प्राप्तस्य तस्याभवत् ॥ १५५ ॥
विंध्ये सिंधुरवत् धने विधनवत् जातिप्रसूनेऽलिवत्
त्यागे याचकवत् गुणे सगुणवन्न्याये महीपालवत् ।
माकंदे पिकवच्छ्रुते विदुरवत्पाथोरुहे हंसवत्
तस्मिन् संसृजतिस्म वागविषयां प्रीतिं मनो योषितां ॥ १५६ ॥
नारीभिः सुमचाप इत्यमरभूजन्मेति च प्रार्थिभि-
र्गंगाभूरिति सत्यसंगरपरै र्ब्रह्मेति तत्वोन्मुखैः ।
स्वर्भुग्भूरिति योद्धृभिर्यम इति प्रत्यर्थिपृथ्वीधवैः
कैः कैरेष कथं कथं न युवतामध्याश्रितस्तर्कितः ॥ १५७ ॥
सौंदर्यधन्या अथ सप्तकन्या पित्रा प्रमोदात्परिणायितोसौ ।
चिक्रीड ताभिः सह शश्वदस्तव्रीडं यथा दुश्च्यवनः शचीभिः ॥ १५८ ॥
हम्मीरादितरावपि क्षितिपतेर्जैत्रस्य पित्र्यानुजौ
जज्ञातेऽगरुहौ गुहाविव जगज्जैत्रप्रतापोदयौ ।
आद्योभादनयोर्नयोदयदलद्वल्लीवसंतः **सुर-**
**त्राणो**न्यः परवीरदारणरणारंभप्रभो **वीरमः** ॥ १५९ ॥
पूर्द्वारार्गलदीर्घपीनभुजभूप्रौढप्रतापज्वलत्-
ज्वालाजिह्वविषावलीकवलितप्रत्यर्थिभूमीधवैः ।
इत्यभ्यस्तनयैस्त्रिभिः स्वतनयैः संसेव्यमानोन्वहं
**श्रीजैत्रः** क्षितिपः स्म वीरजनकोत्तंसत्वमास्तिघ्नुते ॥ १६० ॥
इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते हम्मीरमहाकाव्ये वीरांके तज्जन्मवर्णनोनाम चतुर्थः सर्गः समाप्तः ॥

# अथ पंचमः सर्गः

अथ जैत्रसिंहनृपतौ धरणिं करणिं दिवः श्रितहरेः सृजति ।
उदजृंभतप्रियसुहृत्सुरभिः सुमसायकस्य किल विश्वजितः ॥ १ ॥
पुपुषे ध्रुवं मलयशैलभवोऽनिल एष भोगियुवतिश्वसितैः ।
कथमन्यथास्य सहता भवति स्म वियोगिनो झगिति मूर्च्छयितुं ॥ २ ॥
ऋतुराजविक्षणरसान्नितरा मरुणेन न ध्रुव मनोदि रथः ।
कथमन्यथा दधु रमी दिवसा गुरुतां रथांगविहगैकहितां ॥ ३ ॥
अतिदुःसहप्रियसुहृद्विरहैः प्रमदजनैः कथमिवैष स नः ।
महिमा सहिष्यत इतीव निशाः कृशता मधुर्मधुरिताः कृपया ॥ ४ ॥
समुदाचरंति मधुपा मलिना न च निर्मला स्फुरति जातिरिह ।
इति वा बभूव ऋतुराट्समयो नवरं न वल्लभतरो यतिनां ॥ ५ ॥
मलयानिलो मलयजैः सुरभौ सुदृशा मुरोजयुगले विलसन् ।
समुपागतं मलयशैलमहा—शिखराधिरोहण ममंस्त पुनः ॥ ६ ॥
अमुना विवर्णितदला मभितो नलिनीं विलोक्य नलिनीदयितः ।
कुपितः प्रहिंसितुमिवैष हिमो—चय मभ्यगा द्धिमवतः ककुभं ॥ ७ ॥
स्थलतां प्रयाति गगने पवने—रितपुष्पराजिरजसां पटलैः ।
अचलन् यदर्कतुरगाः शनकै स्तदिवास वासरगणोत्र गुरुः ॥ ८ ॥
मधुकप्रसूनमधुपानवशा दतिमात्रमत्तमधुकृद्रुवतेः ।
विनिशम्य झंकृतमरं दधिरे कति रे न चेतसि विकारभरं ॥ ९ ॥
सहकारसारतरमंजरिका—ग्रसनोल्लसन्मधुरिमांचितया ।
परपुष्टया कुसुमकांडकरे ऽरचि लीलया प्यखिलमेव जगत् ॥ १० ॥
इय मागतैव शशिनाशिकुहू रथचेयमाव्यलपदन्यभृतः ।
पिककूजितेष्विति न का मुमुदे विषसाद चाध्वगवधू रसकृत् ॥ ११ ॥
शुकचंचुसंनिभपलाशदल—त्कुसुमानि रेजुरभितोनुवनं ।
शमदंतिनं भृशमुपानयतो वशमंकुशा इव सुमेषुविभोः ॥ १२ ॥

यदि पुष्पिताहमिह तत्क्रियतीं श्रियमुद्वहंतु लतिका इतराः।
किमिदं विचिंत्य कृपया सुरभौ विचकास नाभिनवजातिलता ॥ १३ ॥
विकसत्प्रसूननिचयाः शुचयः प्रतिकाननं शुशुभिरे तरुषु ।
प्रथिता हसा इव वनीयुवते निंजजीवितेशमृतुराजमनु ॥ १४ ॥
जलदागमे स्वमहिमोल्लसिते रवधीदसौ पथिकलोकवधूः ।
इति पंक्तिबाह्यविहितेव मधौ नवमालती न सुमनस्स्वविशत् ॥ १५ ॥
मदनोऽधुनापि परदेशजुषां हृदि नष्टशल्यमभिहंतुमिव ।
कुसुमानि वृंतसुषिराणि भृशं विरचय्य कांडफलतामनयत् ॥ १६ ॥
मम नाम नालिकशरा यदि मास्तः सहेत कतरे स्पृशतीः ।
किमितीह नाद्रियत जातिलता कलिकां मधौ मधुसखः स्फुटतीः ॥ १७ ।
विकसत्प्रियालतरुमंजरिका—रजसारुणैरपि मृगीनयनैः ।
मधुसीधुपानघनरागजुषः सुदृशां दृशः सदृशतां न जहुः ॥ १८ ॥
परिसंचरन्मलयदिक्पवन—प्रविकंपिपल्लवकरांवुरुहैः ।
उपगूहनाय वनराजिवधू र्निजकांतमाह्वयदिवर्तुपतिं ॥ १९ ॥
मधुपानतः शिथिलितभ्रमरा भ्रमिरा बभुः प्रतिवनं तरुषु ।
गुलिकास्त्रकाभ्यसनमुन्नयतो गुलिका इव प्रसवचापविभोः ॥ २० ॥
प्रविलोकनादपि वियोगवशा विदधद्दशा विधृतकंपरसाः ।
अनयत्पलाशशिखरी तरसा चरितार्थतां जगति नाम निजं ॥ २१ ॥
पदसंगमात्र उपजाततृषो मम निप्रजघ्नुरिमकाः प्रसभं ।
गतभर्तृका इति सकोप इवा—ज्वरयन्मुहुर्मुहुरशोकतरुः ॥ २२ ॥
परिलोभयन् मधुकरप्रकरान् मधुसंगमेन मधुरै र्मधुभिः ।
तिलकद्रुमस्तिलकवन्निखिले—ष्वपि भूरुहेषु लभतेस्म रुचिं ॥ २३ ॥
अपि तन्मुखाभिषवसेकमृते श्रियमुद्वहन्नतिवचोविषयां ।
अधरीचकार सुदृशामखिला मपि मानसंस्थितिं मगो बकुलः ॥ २४ ॥
निजकालिमोल्लसितसंजनिता ऽसमयक्षपालिषु वनीततिषु ।
अलभंत चंपकतरोः कलिकाः स्मरराजदीपकलिकोपमितिं ॥ २५ ॥

भृशलीनषट्चरणचक्रवशाऽधिकनीलनीरजदले सरसि ।
कमलै रलंभिविलसत्कमलै गगने नवोदितशशांकरुचिः ॥ २६ ॥
मलिनांबुबिंदुतुलनां कलय—द्विकसत्पलाशसुमवृंतमभात् ।
शिरसाऽग्निसाधनतपो रचय न्निव मालतीविरहतोलियुवा ॥ २७ ॥
कृतवेल्लनामलयदिक्पवनै र्वनवल्लयो रुरुचिरेऽतितरां ।
उपगूहनानि चिरकालभवन् मिथः प्रविरतं — — त्य इव ॥ २८ ॥
सकलत्रिलोकविजयप्रभवं श्रमवारिसंगतमनंगपतिं ।
इव वीजयंत्यभिनभौ सुरभौ कदलीदलै रनिलसंगचलैः ॥ २९ ॥
हृदयेश्वरं भजत मानममुं त्यजताशु नैति समयो हि गतः ।
इति बोधयन्निव कुरंगदृशो रुचिरं चिकूज परपुष्टयुवा ॥ ३० ॥
किमु चुंबनं किमथवा मधुरं मधु इत्यसाविव विवेचनकृत् ।
क्षणमंबुजं क्षणमथ भ्रमरी—वदनं चुचुंब मधुकृत्प्रवणः ॥ ३१ ॥
विलसद्विलासिनि वसंतऋतौ कुसुमानि कानिचिदिहाविदुषां ।
इदमेददेतदिदमित्यवदन् इव झंकृतैर्मधुकराः कतिचित् ॥ ३२ ॥
विधृतत्वराणि विदधन्नितरां युवमानसानि दयितानुनये ।
चटुकूजितैः कलरवो मदयन् दयितां चुचुंब परिरभ्य मुहुः ॥ ३३ ॥
विकसत्सुमस्तबकचारुकुचा नवपल्लवाद्भुतकरक्रमणाः ।
मधुमागताः समवलोकयितुं वनदेवता इव लता व्यरुचन् ॥ ३४ ॥
अधिकाधिकं तनुविलेपविधौ प्रमदाभिराद्रियत वह्निशिखं ।
उपकारकारि सुचिरोपनतं सहसैव हेयमिह वस्तु कथं ॥ ३५ ॥
पथिकांगनाजनपरासनजै र्गुरुपातकैरिव नितांतचिताः ।
हविराचिताऽञ्जनघनद्युतयो भ्रमरा बभुः प्रतिवनभ्रमिराः ॥ ३६ ॥
इति वीक्ष्य वीक्षणयुगप्रसभा—हृतसंमदं सुरभिकालमिमं ।
परिपृच्छ्य जैनजगतीदयितं सहि वीरमाग्रजकुमारवरः ॥ ३७ ॥
अदसीयरूपविलुलोकयिषा—नुग्रहाधिरूढललनावदनैः ।
दिवसेपि विस्फुरदनेकसुधा—करबिंबमंबरतलं जनयन् ॥ ३८ ॥

घनसारसारमृगनाभिमिलन्—मलयद्रुनागजरजःप्रकरैः ।
कृतदेवनो वनविनोदचिकी—रवरोधबंधुरवधूमधुरः ॥ ३९ ॥
प्रचलद्दलावलिलसत्पवनं तरुराजिराजितपुरोपवनं ।
प्रययौ स यौवनवयः सवयः—परिहासभासुरतरास्यशशी ॥ ४० ॥

चतुर्भिः कलापकं

तरुणा लसन्नवनवाभरणा अथ चेलुरर्हतमचेलभृतः ।
मदकृन्मधूत्सवकृते मदनो—द्यमदीप्तदीप्तिसुतनूभिरमा ॥ ४१ ॥
कृतभूषयापि वदनांबुरुहः सखि सांप्रतं तव रुरोदिषया ।
कृतमेहि सत्वरममुं दयितं सुतरां प्रसाद्य जहि वैरिमुदं ॥ ४२ ॥
इति काचन प्रियसखीवचनैः सुचिरं विमृश्य हृदये निपुणं ।
परिहृत्य मानमुपगत्य पतिं विशदप्रसादललितं व्यतनोत् ॥ ४३ ॥ युग्मं
अनुनेतुमन्यतर इंदुमुखीं विविधेंगितानि विदधन्निपुणं ।
परिरभ्यतेस्म तरसैव तया सपूर्वसूचिततदिंगितया ॥ ४४ ॥
प्रचलालिकाननमितः कितवो विरहा त्तवांग स किमातनुते ।
प्रविलोकयाव इति कापि मिषादुपनीय तां प्रियतमाय ददौ ॥ ४५ ॥
अनुनेतुमंबुजदृशः पदयोः पतितस्य कस्यचन वेणिरभात् ।
इदमीयमानमभिपाटयितुं कुसुमायुधस्य तरवारिरिव ॥ ४६ ॥
अयि पश्य शस्यवदने मधुरा मधुवासरा झटिति यांति कथं ।
अधुनापि मानमिममादधती स्वपराहितं किमु चिकीर्षसि हा ॥ ४७ ॥
इति कश्चन प्रकुपितां दयिता मनुनीय योषिदनुनीतिचणः ।
उपगूहनं प्रतिपदं वितरन्नचलन्मधूत्सवकृते सुकृती ॥ ४८ ॥
न विलोकसे न च ददासि वचः कथमेष जीवतु तवानुचरः ।
इति पीतवल्लभवचा इतरा मदपानतोप्यधिकमाप मदं ॥ ४९ ॥
नवपल्लवाद्भुतकरां मधुपा—वलिवेणिमिद्धसुमगुच्छकुचां ।
नववल्लभामिव विलोक्य वनीं दधुरुत्सुकत्वमथ रंतुममी ॥ ५० ॥

तरुणीगणे विकरुणं प्रसवा—वचयं विधातुमभियोगवति ।
तरुभिः प्रकंपितमिव प्रवह—त्पवमानवेल्लितदलालिमिषात् ॥ ५१ ॥
प्रविहाय काननसुमान्यभितो निपतद्भिरंबुजधिया वदने ।
भृशमुन्मदिष्णुमधुकृन्निकरैरुदवेजि काचन सरोजमुखी ॥ ५२ ॥
दयितां लताग्रमधिरोहयता क्वच नापि केनचिददायि तनौ ।
नखरक्षतं यदतनोत्किलितं न मुदं तदीयहृदये कियतीं ॥ ५३ ॥
सुमकंदुकौ निजकरग्रथितौ सहसं प्रदर्श्य किल केन च न ॥
त्वदुरोजकौ ध्रुवमियत्प्रमितौ वदतेत्यहासि कुपितापि सुदृक् ॥ ५४ ॥
अयि वल्लभे मधुरगंधमिदं कुसुमं वदन्निति परो विदुरः ।
उपनासमाप्य किल सिंघयण—च्छलतः करं न्यधित तामधरे ॥ ५५ ॥
मुखचुंबनं यदि ददासि सकृत् प्रददे तदा कुसुममाल्यमिदं ।
गदतीति भर्त्तरि सखीविदितं त्रपया मुदा च समवादि परा ॥ ५६ ॥
दयितस्य वृक्षमधिरूढवतः पदमाशु पल्लवधिया विधृतं ।
न चकर्ष नैव च मुमोच परा तदवाप्तिजातपुलकप्रसरा ॥ ५७ ॥
पुरतो लताततिषु रम्यतमाः प्रसवाः स्फुरंति ननु चंद्रमुखी ।
इति विप्रलोभ्य दयितामितरो विजनप्रदेशमनयद्रतये ॥ ५८ ॥
अयि पश्यतोपि कुसुमस्तबकः क्व गतो ममेति कितवोक्तिपरः ।
करसाद्विधाय दयितोरसिजं निजगाद लब्धमिति कोपि हसन् ॥ ५९ ॥
अयि पश्यतोपि कुसुमस्तबकः क्व गतो ममेति कितवोक्तिपरः ।
प्रममर्द नैकयुवतेः कुचयोर्युगुलं गवेगवेषणपरः — — — ॥ ६० ॥
तनुवल्लिबद्धनवपुष्पगलन्—मकरंदलुब्धमधुकृन्निकरः ।
परिरभ्यतेस्म तरुकैतवतो ऽतिविदग्धया प्रियतमः परया ॥ ६१ ॥
फलदाधिरूढहृदयाधिपति—प्रविलोकनापहृतचेतनया ।
वितरेममंग वितरेममिति प्रसवं वृथैव परयाभिदधे ॥ ६२ ॥
इतरेण गोत्रभिदया प्रहितः कुसुमोच्चयानुवनितामनया ।
प्रहतो — — —तव निःश्वसितै रनवेक्ष्य तां किमुदितः प्रति यां ॥६३॥

अयि पश्य पश्य पुरतो लकुचे सुकुचे कथं भ्रमति भृंगयुवा ।
इति विप्रलोभ्य दयितामितरो निपपौ परां सुचिरमर्द्धदृशा ॥ ६४ ॥
तरुराजितो विकसितप्रसव—प्रकरान्निधाय शिरसि प्रयतान् ।
गुरुझंकृतिप्रमुखरा भ्रमरा वनरक्षका इव परां रुरुधुः ॥ ६५ ॥
दधदंतरा नवतिरस्करिणीमिव तापनोदनमिषेण पटीं ।
वनितां विलोभ्य कितवो हृदयाधिकृतां चुचुंब गतभीरितरां ॥ ६६ ॥
उपवीजयन्निजकरग्रथित—प्रविकाशिभासिकुसुमव्यजनैः ।
कृतविप्रियोपि भृशमन्वनयत् सुदृशं परः स्मरकलाविदुरः ॥ ६७ ॥
तरुशृंगसंस्थितसुमग्रहणो—र्ध्वसरत्करत्वतः सुकृशादुदरात् ।
गलदंबराक्षणमभादपरा प्रकटीभवंत्यतनुशक्तिरिव ॥ ६८ ॥
कितवेन पल्लवमिषादधरे विधृते प्रिया यदतनोद्धसितं ।
अभवत्तदेव किल तत्कपट—स्फुटपाटवस्य शशिभासि यशः ॥ ६९ ॥
जडगात्रवर्तनपराङ्गमितां दधदेकबाहुलतया दयितां ।
नलिनं करेण च परेण परः शुशुभे स्मरः सशरचाप इव ॥ ७० ॥
कामिन्याः कुसुमानि चेतुमधिरोहंत्यास्तरुस्कंधकं
भूमौ स्थायिनि दक्षिणे पदतले वामे च शाखास्पृशि ।
कृत्वा किंचन कैतवं विनमितोऽधोनाभिमूलं परो
दृष्ट्वोदीरितकाम ऊर्ध्वसुरते वांछामतुच्छां दधौ ॥ ७१ ॥
शाखाग्रस्थमिदं ददासि कुसुमं चेत्तर्हि यद्याचसे
तत्तेहं प्रददे प्रिय ध्रुवमिति प्रोक्तेऽन्यया मुग्धया ।
नीत्वा लम्रकतां तदालिमचिराद्दत्वा च पुष्पं छलात्
आसीद्यद्धृदये द्वयोरपि तयोर्धूर्त्तेन तत्प्रस्तुतं ॥ ७२ ॥
करांबुजालंबितलंबशाखा मिथोपि संयोजितपादपद्माः ।
आंदोलिता आलिजनैः स्वयं ता दोलातुलां शिश्रियुरंबुजाक्ष्यः ॥ ७३ ॥
कामिनीकरजकोटिविलून—स्रस्तपल्लववनावनिपीठे ।
पुष्पराजिभिरराजत मुक्ता—वेणिवद्विपुलविद्रुमपात्रे ॥ ७४ ॥

प्रसवचोलवतंसककंकण—स्तबकराजिविराजितविग्रहाः ।
शुशुभिरे सुदृशो धृतकंकटा इव भटाः कुसुमायुधभूपतेः ॥ ७५ ॥
इति रुचिरविधाभिः स्वांगसंगोपभोग-
स्फुरितविततलीलाश्रेणिभिः श्रेयसीभिः ।
ऋतुपतिसमयोत्थां काननीं पुष्पलक्ष्मीं
झगिति सफलभावं निन्यिरे पौरवीराः ॥ ७६ ॥
इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीरांके वसंतवर्णनोनाम पंचमः सर्गः समाप्तः ॥

---

## अथ षष्ठः सर्गः

प्रेक्ष्य काननविलासवशेन स्वेदिनोऽथ तरुणान्नृपपुत्रः ।
वारिकेलिकलनाय जगन्वान् जैत्रसागरसरः सरसश्रि ॥ १ ॥
उल्लसच्छुकगरुत्समकांति र्यस्यतीरतरुराजिरराजत् ।
चंद्रबिंबमभितः प्रसरंती सिंहिकांगजगजध्वजिनीव ॥ २ ॥
अंतराप्रतिफलद्रणपूर्व—स्तंभनामपुररम्यतरश्रि ।
यज्जहास विपुलांकविलासि—द्वारकं किल सरिद्धृदयेशं ॥ ३ ॥
तीररूढतरुनीलपलाश—स्मेरजालकहरिन्मणिमुक्तं ।
वृत्तरम्यमवनीवनितायाः कर्णकुंडलतुलामवहद्यत् ॥ ४ ॥
नीलनीरजदलावलिदंभ—व्यक्तलक्ष्मविधृतामृतपूरं ।
यत्कृतावतरणं भुवि रेजे चंद्रबिंबमिव राहुभयेन ॥ ५ ॥
कर्णिकांकविचरन् मधुपोद्य—त्तारकोन्मिषितपंकजदंभात् ।
आलुलोकिषुनिजामिव लक्ष्मीं यद्दधार शतशो नयनानि ॥ ६ ॥ षड्भिः कुलकं
आयतैश्चलदृशोथ नितंबैः सत्वरं रुरुधिरे वनवर्त्म ।
अग्रतोंबुललनाय यियासू न्वारयंत्य इव जीवितनाथान् ॥ ७ ॥
स्वां श्रियं पयसि वीक्ष्य तरुण्यो द्राग्मनांसि चकृषुर्मुकुरेभ्यः ।
तत्किमत्र यदि वा प्रमदानां यत्र तिष्ठति मनश्चिरमेव ॥ ८ ॥

उत्तरंगिणि सरोंभसि नार्य श्चिक्षिपुर्विकसितानि सुमानि ।
उज्जिजीवयिषयेव यजंस्तो मन्मथस्य गिरिशं जलमूर्त्तिं ॥ ९ ॥
तीरसंस्थितविलासवतीनां वारिणि प्रतिफलत्सु मुखेषु ।
स्मेरवारिजधिया निपतंतो हासयन्मधुकरास्तरूणौघान् ॥ १० ॥
वारिगोचरजुषां युवतीना मुल्लसत्प्रतिनिधिव्यपदेशात् ।
आतिथेयमिव कर्त्तुममूषा माविरासत सरोजलदेव्यः ॥ ११ ॥
अस्त्यगाधजलदर्शनजाता—तंककंपिततनूस्तनुमध्याः ।
पाणिनाऽथ विनिगृह्य कथंचि द्वेशयंति सलिलं स्म युवानः ॥ १२ ॥
किं पुरो विदधतीं जलकेलिं स्वां सखीमपि न पश्यसि मुग्धे ।
दर्शयन्निति च तत्प्रतिबिंबं तां व्यशिश्रसदहो चतुरोन्यः ॥ १३ ॥
अस्त्यगाधमिह वारि तदेवं न प्रवेष्टुमुचितं तव मुग्धे ।
इत्युदीर्य विविशे कितवेना—न्येन वक्षसि निधाय मृगाक्षीं ॥ १४ ॥
उत्सुकापि सुतरां जलकेला—वंचले प्रणयिना विधृतापि ।
तद्विलोकरसभाववशात्मा काप्यवास्थित तथैव परोपि ॥ १५ ॥
आहतः कुचतटैः प्रमदानां चेतनाविरहितोपि तडागः ।
क्षोभभावमगमत् सहसा य—त्तत्र कारणमसौ रसवत्ता ॥ १६ ॥
अस्पृशत्प्रथममंबु वधूना मंगसंगचपलं जघनानि ।
खेलतिस्म तदनूरसिजेषु क्व क्रमः स्फुरति हंत जडानां ॥ १७ ॥
जानुदघ्नमपि तत्सरसोंभः कंठदघ्नमभवद्भुतमेव ।
योषिदंगविगलल्लवणिम्ना स्फीततामुपगृहीतमिवोच्चैः ॥ १८ ॥
आजनेरपि वितीर्णमरंदा—न्यंबुजानि मधुपाः प्रविहाय ।
भेजिरे मृगदृशां वदनानि स्यात्कुतोहि मलिनेषु विवेकः ॥ १९ ॥
संचरच्चटुलदृग्वदनाब्जा—लोकतर्कितनिशाकरबिंबैः ।
खादितुं बिसलतोपगृहीता तत्यजे न बुभुजे न च चक्रैः ॥ २० ॥
योषितां स्तनतटे स्खलतोच्चै रास्त्रियंत पयसा पुनरेव ।
शैशवे प्रवहता गिरिमार्गे कूलशैलसबलास्फलनानि ॥ २१ ॥

प्रेयसीवदनमुक्षितुमात्तं नीरमंजलिपुटे दयितेन ।
तत्र बिंबितमवेक्ष्य तदेवा—मोचिनोपचितभंगभयेन ॥ २२ ॥
सेसिचत् प्रियतमो मदिराक्ष्या शक्तया कुलतया प्रतिसेके ।
गृह्यतेस्म भुजया लघुकंठे बाणयुद्धविदिवासि करेण ॥ २३ ॥
वल्लभे विकसितांबुजमुख्या उन्मदे पिबति वक्त्रसरोजं ।
भ्रश्यदंबुकणकेशकलाप—च्छद्मनालिभिररोदि शुचेव ॥ २४ ॥
गाढपीडितरदावलिरंध्रै र्याः स्त्रियो मुमुचिरे जलधाराः ।
ताभिरास मदनः सलिलास्त्रो भर्तृमानदहनास्त्रशमाय ॥ २५ ॥
कंठदघ्नपयसि स्थितवत्या जीविताधिपतिना गजगत्याः ।
यद्यबुध्यत तयोर्द्युतिहान्या—ब्जद्वयांतरगतं वदनाब्जं ॥ २६ ॥
श्रीरपाह्रियत नो नयनाना मेभिरेभिरिति संभृतकोपाः ।
मज्जयंति कमलानि सरस्सू—न्मज्जयंति च मुहुः सुदृशः स्म ॥ २७ ॥
वारिणि प्रतिनिधिव्यपदेशात् व्यत्ययेन मदनश्च रतिश्च ।
तत्तदात्तरुचिरत्वविशेषौ संश्रिताविव वधूं च वरं च ॥ २८ ॥
कैतवेन करवारिभिरेकां प्राप्य कश्चन पराङ्मुखभावं ।
चुंबतिस्म विदितोदितरागो ऽन्यां मुहुः कमलिनीमिव भृंगः ॥ २९ ॥
शैलसारकठिने प्रमदाना मंभसां स्तनतटे स्खलितानां ।
फेनपंक्तिरिव हारलताया दिद्युते सरसि मौक्तिकपंक्तिः ॥ ३० ॥
अंभसाहृतविलेपनभंगौ योषितां वपुषि कांतकृतानि ।
रेजिरे नखपदानि सपत्न्यु—च्चाटनार्थमिव मंत्रपदानि ॥ ३१ ॥
त्रुट्यतोपि जलपूरितरंध्रैः शुक्तिजन्मभिरपाति न हारात् ।
के त्यजंति सुदृशां कुचयुग्म—स्पर्शसौख्यमभिलब्धरसा वा ॥ ३२ ॥
नीरपूरणवशाद्रितमौनं नूपुरं चटुलपादसरोजे ।
संननाय्यसदवेदि मृगाक्ष्या गुह्यको वट इवानुपलब्धेः ॥ ३३ ॥
कंठदघ्न उदके विहरंती वाणिनीविशदपक्षमधत्त ।
स्मेरमब्जमिति तन्मुखवीक्षा—सख्यविश्वसितमानसमाशु ॥ ३४ ॥

भापनाऽन्यसमुपेत्य जलांत भर्तरि स्पृशति सक्थिकरेण ।
त्रासकंपिततनूस्तनुमध्या—श्चर्यचुंबितमवेक्षि सखीभिः ॥ ३५ ॥
प्रेयसा दशनरंध्रविमुक्ते रुक्षितोदककणैर्मदिराक्षी ।
प्रीतिजातपुलकोद्धुषितांगा कामकांडनिचितेव चकासे ॥ ३६ ॥
मुक्तगंधमपि वारिविहारैः पुष्पदाम न जहे शशिमुख्या ।
न स्वतोपि गुणवान् सुखहेयः किं पुनर्यदि स जीवनलीनः ॥ ३७ ॥
पंकजच्छददृशः कटिवस्त्रे नर्मणा व्यपहृते दयितेन ।
वस्त्रवन्निजदलानि ददानां—भोजिनी ध्रुवमधत्त सखीत्वं ॥ ३८ ॥
औक्षमौक्षमबलां ञ्जितदृग्भ्यां कालिमा य उदवास्यत भर्त्रा ।
सोऽसहिष्णुवनितावदनाब्जे व्यक्ततामभजदाशु निविश्य ॥ ३९ ॥
ताडनाय समुदंचितमब्जं मत्प्रियामुखमिति प्रतिचुंबन् ।
तां स्मयेन परिवर्त्तितवक्त्रा मप्यहासयदहो कितवोन्यः ॥ ४० ॥
योषिता जलविहारवतीनां नूपुराणि रणितानि न चक्रुः ।
कः सदाचरणभाक् जलमध्ये स्वं तनोति यदि वा महिमानं ॥ ४१ ॥
सारसेंऽभसि परस्परहर्षा दुज्झितैरपि सरोजमुखीभिः ।
श्रीरवाप्यत परा सुमगुच्छैः क्व श्रियां सुमनसो न पदं स्युः ॥ ४२ ॥
दंपती विधृतवार्यभिपूर्णा—यामशालिबिसशस्य तमास्यौ ।
प्रेमपानमिव चक्रतुरन्यो—न्यावलोकवशकूणितनेत्रौ ॥ ४३ ॥
स्मेरपंकजवने कथमन्यो ज्ञास्यदास्यकमलं कमलाक्ष्याः ।
कैतवेन कमले यदि सिक्ते नाहसिष्यदियमेव विमुग्धा ॥ ४४ ॥
चुंबितं स्मितसरोरुहबुद्ध्या तेन चाधरदले प्रहृतापि ।
कांतवक्त्रमलिना किल दष्टा—स्मीति तथ्यमपि नो बुबुधेन्या ।
वारिभिश्चलदृशामधरेभ्यो दूर्यतेस्म नवयावकरागः ।
मंडनं तदधिकं तु वितेने तत्र कांतनिहितैरदनांकैः ॥ ४६ ॥
मंडनं चपलदृग्नयनानां वारिणांजनमलेपि लवेन ।
भंजनोपि हि जडस्य मतिः किं कृत्यवस्तु वद पाटवमेति ॥ ४७ ॥

बिंबितेंबुनि निजाननपद्मे क्वापि दृग्द्वयमवेक्ष्य झषाक्षी ।
पद्मकोशगतमीनधिया तत् गृह्णती दयितचित्तमगृह्णीत् ॥ ४८ ॥
सांद्रितेंबुनि किलल्ललनानां नेत्रकज्जलभरैर्हसितैश्च ।
गांगवारिकलितां रविकन्यां मेनिरे युवजनाः किमु धन्यां ॥ ४९ ॥
एहि मंक्षु नलिनीषु निलीनां दर्शयामि सुतनो भ्रमरालीं ।
विप्रतार्य दयितामिति कश्चित्तां जिगाय निभृते पणबंधे ॥ ५० ॥
प्रौढदेवनवशाद्रितवृद्धौ सारसैंभसि निमग्नसरोजे ।
कुंतलच्छलमिलद्भ्रमरौघे योषितां सरसिजायितमास्यैः ॥ ५१ ॥
उत्तानमंभसि सुखं प्लुतिलाघवेन निष्पंदमंबुजदृशामभितस्थुषीनां ।
रेजुः स्तनाः सुविवृता भृशमुच्छ्वसंत-
श्चक्राइवापविवरं मिलितस्वकांताः ॥ ५२ ॥
व्यात्युक्षीषु भृशोक्षणाकुलितया वक्रीकृतग्रीवया
व्यालोक्य प्रतिबिंबितां स्वकबरीं पृष्ठप्रतिष्ठेंबुनि ।
प्रेयान्वारहिशंकया स्म परया संश्लिष्यते भीतया
लातुं स्वासिलताशया पुनरिमां चिक्षेप हस्तं स च ॥ ५३ ॥
चिकुरनिचयमाशु स्रंसयामास नेत्रां—बुरुहमपि चुचुंबोरोजपीठे लुलोठ ।
जघनतटमुपासामास पस्पर्श पादौ प्रिय इव वनितानां सारसो वारिपूरः॥५४॥
स्रस्तो धम्मिल्लबंधो गलितमखिलमप्यंजनं लोचनानां
भ्रष्टो रागोधराणामविरलपुलकैर्व्याप्तमंगं समग्रं ।
नष्टा शक्तिः कपोलस्तनतटलिखितापत्रलेखाप्यपास्ता
वारिक्रीडा वधूनामजनि रतिरसस्य प्रवेशध्रुवेव ॥ ५५ ॥
परिनिस्सरच्चटुलदृग्जघनो—रसिजावलीरिततरंगतति ।
अभिनज्जलं झगिति कूलभुवः सहयानमाभिरभितन्वादिव ॥ ५६ ॥
अत्युत्सुकत्वनिपतत्पदपातजात—स्फीतध्वनिश्रुतिवियोजितपक्षिपक्षाः ।
अन्योन्यपाणितलताडनलब्धलक्ष्या नीरान्निरीयुरथ दंपतयः सहेलं ॥ ५७ ॥

विलोक्यतां स्वच्छतयाऽबलानां जग्मुर्न वासांसि जलार्द्रितानि ।
ध्रुवं परित्यागभयेन तासां निलीय देहद्युतिषु स्थितानि ॥ ५८ ॥
गतेंगरागेपि तनूदरीणां न कायलक्ष्मीरधरीबभूव ।
स्वभावरम्यस्य जनस्य यद्वा विभूषणं मंगलमात्रदायि ॥ ५९ ॥
विनिर्गतानां सरसो वधूनां पृष्ठे प्रलंबी शुचिकेशपाशः ।
परीक्षितुं प्रत्युत हेमपट्टे निवेशिताभात् कषपट्टिकेव ॥ ६० ॥
विनिर्गतानां सरसो वधूनां पृष्ठे प्रलंबी शुचिकेशपाशः ।
मेरोः शिलायां सुखमासितस्य शिखंडिनो बर्हमिव व्यराजत् ॥ ६१ ॥
निर्नीरितानि बिबभुर्वनिताजनानां चेलांचलैर्मृदुतरैर्नितरां वपूंषि ।
उत्तेजितानि सुमनोविशिखस्य शस्त्राणीवाखिलत्रिजगतीजयबद्धबुद्धेः ॥ ६२ ॥
उन्मिषन्नयननीलसरोजा भ्रूलतालसितकांततरंगाः ।
मुक्तबंधकचशैवलरम्याः सारसीं श्रियमलानिव नार्यः ॥ ६३ ॥
भूषापहृत्या रिपुमस्मदीय मसौ यमात्तः सलिलं बिभर्ति ।
इति प्रकोपाभिरिवांगनाभि रबध्यतावर्ज्यशिरोजपाशः ॥ ६४ ॥
इत्थं विधाय जलकेलिमनन्यजन्यां
**श्रीजैत्रसिंहतनयः स हमीरवीरः ।**
स्वान् स्वान् गृहान् प्रतिविसृज्य जनान्सहैतान्
वेश्माससाद निजमर्थिकृतप्रसादः ॥ ६५ ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीर-
महाकाव्ये वीरांके जलक्रीडावर्णनोनाम षष्ठः सर्गः समाप्तः ॥

---

## अथ सप्तमः सर्गः

अथ निशासमयागमलालसं चलदृशां प्रविदन्निव मानसं ।
चरमभूमिधराग्रिमचूलिका महिमरश्मिरभूषयदंशुभिः ॥ १ ॥
विधिवशाद्विपदं समुपेयुषीं न खलु कोप्यवधीरयितुं क्षमः ।
गददिवेत्यहिमद्युतिमंडलः समभवद्विगलद्युतिमंडलः ॥ २ ॥

जगति नाम पतंग इति स्फुटं मम दधुस्तदमी शलभेषु किं ।
इति वहन्निव सूरिषु कोपितां ग्रहपुषो जनि लोहितविग्रहः ॥ ३ ॥
अविरतांबरसंचरणोल्लसत् गुरुपरिश्रमसंगतविग्रहः ।
सलिलकेलिचिकीरिव वाहिनी दयितमध्यमगाहत भास्करः ॥ ४ ॥
जलशयेशशयांबुजनिन्हुते ककुचसिंधुसुतोरसिजभ्रमं ।
प्रवितरज्जगतां जलधेर्जले—शकमग्नमभाद्रविमंडलं ॥ ५ ॥
भुवनचक्षुषि भास्वति वारुणी मभिनिषेव्य जडेष्वधिमज्जति ।
उचितमेव तदा त्वमपि व्यधात् यदखिलं भुवनं स्ववशं तमः ॥ ६ ॥
अहिमभासि हृदेकतमप्रिये नयनमार्ग मतीत्य गते क्वचित् ।
अपरदिग्भवरागहुताशने प्रविविशे प्रणयेन दिनश्रिया ॥ ७ ॥
गलितभासि हृदेकतमप्रिये व्रजति भास्वति शोच्यदशांतरं ।
विशदलिव्रजकैतवतो विशत् हृदिव शोकतमः सरसीरुहां ॥ ८ ॥
विधिनियोगतयापतदापदं समभिवीक्ष्य पतिं महसामिह ।
सपदि संचुकुचे सरसीरुहै रपश्रिभिः सुहृदा मुचितं ह्यदः ॥ ९ ॥
सितगुरेष कुरंगकलंकभाग् मलिनहृत्क्षणदास्य वधूरपि ।
तदिहही किमवेक्ष्यत इत्यभूत् कमलिनी विनिमीलिसरोजदृक् ॥ १० ॥
उडुपतिद्युतिपानपरिस्फुर त्खगजिगीषुतयेव दिनात्यये ।
निशि वियोगवतां पततां गणा निखिलमेव रवेः पपुरातपं ॥ ११ ॥
पुनरनाप्तिभिया पपुरातपं दिनकृतः किममून्यधिकं रुचेः ।
रथपदाह्व पतन् मिथुनानि नो यदधुना व्यषहंत सहासितुं ॥ १२ ॥
निशि वियोगवतः पततः स्थिता बिसलताचलचंचुपुटे बभौ ।
असुगणं वनिताविरहाद्विनि—र्जिगमिषुं विनिरोद्धुमिवार्गला ॥ १३ ॥
बिसगुणोपि ययोर्युगचारिणोः कथमपि स्म नमाति पुरांतरा ।
अपि सरिद्दयितः सममात्तयो र्विलसितं न विधेः स्मृतिगोचरः ॥ १४ ॥
रुरुदृशां स्ववशे सकलं जगत् रचयितुं रतिजीवितवल्लभः ।
दिनविरामरणन्मुरजावलि—स्वनमिषेण निदेशमिवादित ॥ १५ ॥

तिमिरराशिरुदित्वरशक्तिर प्यधित नीचपदानि पुरा वशे ।
निजसमानवशीकरणोद्यमः प्रविजिगीषुगुणो ह्ययमादिमः ॥ १६ ॥
स्मरशरव्यितदुर्दयितांगना ज्वलितदुःखहुताशकणा इव ।
प्रतिपदं कृतलोचनकौतुका रुरुचिरेतितरां शिखिकीटकाः ॥ १७ ॥
अतिविदग्धतयाभ्रमिमाचर न्न कुलटा जन आट दृशोः पथं ।
विविधयुक्तिनिषेवणहृष्टहृन् मनसिजेन वितीर्णवरादिव ॥ १८ ॥
भृशमपि क्षिपति प्रतिवासरं मयि मुहुर्मुहुरेति तमः कुतः ।
इति रुषेव वहन्नतिलोहितं वपुरगादुदयं रजनीकरः ॥ १९ ॥
शमयितुं तिमिराणि यदुत्सुको—प्यमृतसूरुदियाय शनैः शनैः ।
तदिदमंकमृगो मघवप्रिया—पिततृणग्रसने खलु लुब्धवान् ॥ २० ॥
भुवनभेदनसंभवशोणितो—पचितमन्मथमार्गणघर्षणैः ।
अरुणतामिव यच्छशिमंडलं श्रियमदाद्गगनस्य निजस्य च ॥ २१ ॥
क्रकचचक्रजकेसरपांडुर—प्रसृमरोरुकरोत्करकैतवात् ।
अनुनिशादयितां हिमवालुका—प्रकरमास्यदिवाखरदीधितिः ॥ २२ ॥
हृदयमध्यगतं दधदुच्चकैः स्फुटतरांकमिषेण तमस्विनीं ।
अजयदर्धवपुर्धृतवल्लभं पशुपतिं प्रणयातिशयाच्छशी ॥ २३ ॥
सरसिजानि विहाय हरिप्रि— ——— ——— ——— ——— ———
——— ——— ——— ——— कटाक्षनिरीक्षणलक्षिता ॥ २४ ॥
हिमकरं दयितं मिलितुं निशा विवसिताद्भुतभूषणया दधे ।
अविरलोदिततारकपेटक—च्छलमयी नवमौक्तिकजालिका ॥ २५ ॥
चिरभवन्मिलनादुपगूहनं द्विजपतावदयं ददति श्रियः ।
त्रुटति हारलतास्मसमुत्पत—द्विविधमौक्तिकतारकितांबरा ॥ २६ ॥
सुमशरान्प्रविहाय सुमायुधः शशिकरान् यदमन्यत तत्पदे ।
उचितमेव नवंनवमिच्छतां परिचिते रिपुता हि महीयसी ॥ २७ ॥
किममृतैः सिसिचे किमु चंदनैः किमु हमीरकुमारयशोभरैः ।
चितमिदं जगदिंदुकरोत्करै र्व्यतनुतेति वितर्कपरंपरां ॥ २८ ॥

प्रियसरोजदृशां रतविज्ञता—स्थितिविवेकविधाविव दीक्षिताः ।
विविधभोगवतां रतमंदिरे रुरुचिरे परितोपि दशेंधनाः ॥ २९ ॥
प्रणयिभिः सह सांप्रतमाहवः स्मरभवो भविता सुमहानिति ।
विविधभूषणकंकटसंग्रहा ऽग्रहवशं सुदृशो हृदयं व्यधुः ॥ ३० ॥
श्रवणकुंडलवेणिविलोचनां—बुजमृजोपधिना मृगलोचनाः ।
सपदि चक्रकृपाणशरावली—प्रभृति शस्त्रचयं किमसज्जयन् ॥ ३१ ॥
उपगते दयिते भविता मया किमिह संयतयापि मुहुर्मुहुः ।
इति रणत्कलकिंकिणिकामिषा—न्नववधूरिव मेखलया जगे ॥ ३२ ॥
तरुणिमोष्मविशुष्यदुपाहिता—च्छतरचंदनलेपनकैतवात् ।
मदनयुद्धकृते परिधापिता—विव कुचौ परया नववाससा ॥ ३३ ॥
रणितकिंकिणिसन्मणिमेखला—वलिमिषेण नवोढवधूरते ।
पतिभयादभितः स्मरमंदिरं स्फुरितजागरिदुर्गमिव व्यधात् ॥ ३४ ॥
रुरुचिरेतितरां रुचिरद्युति—प्रसवसंभवशेखरराजयः ।
स्मितसरोजदृशां मुखचंद्रमः—प्रसरदुद्गतिकांतिचया इव ॥ ३५ ॥
सरलकज्जलकांतलिपिच्छलात् वशकृतौ जगतः कमिता रतेः ।
स्वसुभटेषु पुरोगमतां दृशोः कथयतिस्म न किं हरिणीदृशां ॥ ३६ ॥
प्रतिफलन्निह मा रजनीकरो विदितलक्ष्ममुखं वितनिष्ट नः ।
इति धियेव जितेंदुकपोलयो र्विदधिरे नवपत्रलताः स्त्रियः ॥ ३७ ॥
सहजपाटलतातिमनोहरे दधुरमूरधरे यदलक्तकं ।
तुहिनभासिसितीकरणश्रम—भ्रमकरं तदजायत नो किमु ॥ ३८ ॥
उरसिजेषु सखीजननिर्मिता मकरिका विबभुर्मृगचक्षुषां ।
मकरकेतुविभोस्तनवासिता—नुमितिसाधनबंधुरविभ्रमाः ॥ ३९ ॥
परिपिबन् रमणो ध्वनिमेतयो र्भवति नैव समाप्तरतादरः ।
चरणयोर्विधृते इति नूपुरे मृदुगिरो हृदये बहु मेनिरे ॥ ४० ॥
न पटयोरपि सूचिकया विना भवति योग्यतमा किल योजना ।
दयितसंगमनेष्विति दूतिका जनगतागतमभ्यलषन् स्त्रियः ॥ ४१ ॥

स्वमपि कांतममूश्वभितो विलां—सिनमवेक्ष्य परिच्युतमत्सरा ।
रतिरपि श्रयतिस्म तनूदरी बलवता हि बलं न सहोचितं ॥ ४२ ॥
अथ मिथोपि मुखांबुजदर्पणे नयनगोचरचुंबितनुश्रियः ।
उदितकामरसादयितागमो—त्सुकतरं दधिरे प्रमदा मनः ॥ ४३ ॥
चलदृशां दयितेषु समानतां—बुजरुचेव कृशत्वममाश्रयत् ।
शितिसरोजरुचेव सह क्षणा दतिशयत्वमगादनुनेतृता ॥ ४४ ॥
मृगदृशः स्म विभांति कटाक्षिताः प्रणयिभिः स्फुटितोष्मपयःकणाः ।
निशितपक्ष्मविभिन्नवपुःस्रुता—द्यरसबिंदुचयोपचिता इव ॥ ४५ ॥
मृदुरवा दयितेषु यथा यथा—यतकटाक्षचयानभिचिक्षिपुः ।
रतिपतिः स्पृशति स्म तथा तथा धनुरधिज्यमसौ विदयाशयः ॥ ४६ ॥
चरणलंबितहारमिषाच्छ्रिता—क्षवलयैस्तालिमर्जुपसोद्यमैः ।
अजनि वारवधूविटनिर्मित—प्रबलमोहनभंगभयादिव ॥ ४७ ॥
इह धृते प्रविलोकयिता स मां तमहमप्यखिलात्मतया रते ।
इति विचिंत्य पराधितपार्श्वतो गृहमणिं ज्वलितोज्वलवर्त्तिकं ॥ ४८ ॥
अयि तनोषि किमु द्व्यणुकोदरी—ति निगदत्यपि भर्त्तरि सत्वरं ।
त्यजति मानमशेषमपि प्रिया—स्म कटरे रजनीसमयोर्जितं ॥ ४९ ॥
प्रियसमागमसूचकवामदृक्—स्फुरणतो मुदिताशयया ऽन्यया ।
हृदयनाथमनुप्रहितापि किं निजसखी न पथः स्म निवर्त्यते ॥ ५० ॥
अपि लवो युगकोटिशतायते धृतिपरस्य जनस्य ऋते यतः ।
हृदयहारिणि तत्र किमौचितीं स्पृशति मानिनि मानपरिग्रहः ॥ ५१ ॥
अनुनयन्नपि चैवमुपेक्षितो ह्यसुभगामिव चेद्भवतीं त्यजेत् ।
किमयशःपटहो न तदा तव व्रजति कोपिनि डिंडिमडंबरं ॥ ५२ ॥
रतिकृतां प्रथितो रिपुरेव य स्तमपि मानभरं परिपुष्णती ।
सुचरितेत्युदितापि तदाशये कथमिव प्रतिभासि विलासिनी ॥ ५३ ॥
प्रतिवधूरधिगत्य सम त्वया सकलहं विदधे यदि तं स्वसात् ।
तव तदास्तु पुनः स कुतः करे परिचिताः पुरुषा हि न कस्यचित् ॥ ५४ ॥

सखि हृदेकहितं भज मार्दवं परुषतां तु दुरंततरां त्यज ।
परुषता रचिता हि हृदीश्वरे फलति केवलमात्मनि मूढता ॥ ५५ ॥
मम वचोद्य कुरु स्वहितं नचे दनुशयं हृदयं तव यास्यति ।
इति परा प्रतिबोध्य सखीं निजां रमणमंदिरमध्यमपानयत् ॥ ५६ ॥

षड्भिः कुलकं

स कितवोऽद्य समेष्यति चेत्तदा भुजयुगेन निबध्य रतालयं ।
समुपनीय निहन्मि तथा पुरा पुनरुपैति यथा न तदालयं ॥ ५७ ॥
हृदयनिष्कुटमध्यकृतोद्गमा कमितरीति मनोरथवल्लरी ।
सुभगया परया परया मुदा सफलभावमनीयत सत्वरं ॥ ५८ ॥
अनुनयान्वितमाश्रितगद्गदं सखि तथा वद जीवितवल्लभं ।
स समुपैति यथा न च कुप्यती—त्यभिविबोध्य सखीप्रहितान्यया ॥ ५९ ॥
यदि वियोगमवेश्यमियद्व्यथं स्मयमधास्यमिमं हृदि किं तदा ।
इति परा परितप्य मुहुर्मुहु र्नयनमालिषु दीनमथाक्षिपत् ॥ ६० ॥
प्रिय स मेद्यसि सुभ्रु विमानह त्तव किमीश यशो मदनस्य किं ।
सहि ममेक्षणजः किल सोपि तत्तव परेति हृदीशमजीहसत् ॥ ६१ ॥
प्रतिदिनं शतशोपि निवारितो मुहुरिह त्वमुपैषि कयाऽऽशया ।
कृतक कोपवतीत्यपरारया दुपरि तल्पमपातयदीश्वरं ॥ ६२ ॥
विनयतो वसनं कमितुः करौ करयुगेन परा त्रपया ऽधित ।
स्वयमपि स्फुरितोद्भुषणैर्गल—न्निवसना सहसाथ किमातत ॥ ६३ ॥
यतिविरोधिलसद्रसपूर्णयो रुपरि लोलदृशस्तनकुंभयोः ।
बभतुरीशकरांबुरुहे अधो—मुखपिधानतुलामिव बिभ्रती ॥ ६४ ॥
दृगतिथौ दयिते मृगचक्षुषां हृदि लवं यदि मानभरोऽलसत् ।
गृहपतौ समुपेयुषि कश्चिरं परगृहे लभते यदि वा स्थितिं ॥ ६५ ॥
स्पृशति भर्त्तरि हृत् हृदयेशयः सचकितं मदनोऽन्यनतभ्रुवः ।
समुदतिष्ठदसंशयमत्रुटन् इतरथा किमु कंचुकसंधयः ॥ ६६ ॥

सपदि गोत्रपरिस्खलनात्प्रिया मनुपरो दहनास्त्रमिवाकिरत् ।
समधित प्रतिशस्त्रमिवाथ सा जलमयं स्रवदश्रुततिच्छलात् ॥ ६७ ॥
तव मुखं कमलं मम चंद्रमा स्तदनयो रधुना स्मरकारितः ।
भवतु संधिरिति प्रवदन् परः स्वदयिताऽननयोजनमातनोत् ॥ ६८ ॥
तव ममाप्यधरं निपिपासतोर्विधुरतास्तु न कस्य च नेत्यथ ।
विलसतः स्म तथापपतुर्यथा—धरदलं सममेव वधूवरौ ॥ ६९ ॥
उपरि यावमृतस्य तयोरिहा—प्युपरितैव भवत्विति दंपती ।
विलसतः स्म तथा धरयोर्यथो—परितयैव मिथो जनि चुंबने ॥ ७० ॥
दयितयोरमृतोपरि यौ तयो रधरयोरधरेत्यभिधा कथं ।
अवगतं यदि वाधरता तयो रधरपानविधौ ग्रहणान्मिथः ॥ ७१ ॥
अमृतमित्यनृतं दयिताधरो यदि तदेष न किं गद नामृतं ।
निमिमिषुर्यदमुं पिबतां दृशो विमुमुहुर्हृदयान्यपि कामिनां ॥ ७२ ॥
विशदमेव न किं दयिताविलो—कनसुधारसपानमसूचयन् ।
मुकुलिताक्षससीत्कृतशब्दिता—ननपुरः करणेन विलासिनः ॥ ७३ ॥
हृदि मयानुसृते तव सा स्वयं निरगमत्किल माऽत्र विषीद तत् ।
दयितमित्यभिधास्खलनादवा—ग्मुखमभाषत काप्यधृताधृतिः ॥ ७४ ॥
प्रियतमाधरपल्लवचुंबनो—पनतकांतमुखेंदुमिषाच्छशी ।
मयि सुधा किल तादृगिहापि किं किमधिकेति विवेक्तुमिवालसत् ॥ ७५ ॥
दयितयोर्मिथ एक मुखासव—ग्रहणलंपटयोर्मुखसंगमे ।
द्विशशितापनिमित्तमुदत्वरी न किमुवाह विपर्ययवर्जनां ॥ ७६ ॥
प्रियमुखामुख एव हरन्निजां प्रियतमामुखवेषधरः शशी ।
अधरपानमिषाद्रुरुधे न किं वदनवारिरुहेण विलासिनः ॥ ७७ ॥
प्रणयिना विधृतापि मनस्विनी वपुरुवाह यदुत्पुलकं किल ।
किमियतापि जगाद न सा वशं तव गतास्मि विधेहि यदीहितं ॥ ७८ ॥
भज धृतिं त्यज भीतिमहेतुकां ह्नियमवांचय वक्त्रमुदंचय ।
अभिनवामुपदेष्टुमिति प्रिया मजनि कोपि सखीव पटुः स्वयं ॥ ७९ ॥

जघनसंगमनोत्सुकमानसं हृदयनाथमवेत्य मृगीदृशः ।
स्वयमपासरदेव तदंशुकं किमुचिताचरणे गुणिनो ऽबुधाः ॥ ८० ॥
असह आशु विदूरयितुं परो युवतिनीविमतित्रुटदुत्सुकः ।
विषहते समुदीरितमन्मथो न खलु कश्चन कालविलंबनं ॥ ८१ ॥
परिसमाप्तरतोपि परः प्रिया—धररसं सुरसायनवत्पिबन् ।
पुनरपि स्फुरिताऽसमसायको व्यधित किं किमसौ न हृदीप्सितं ॥ ८२ ॥
शशिरवी सुरतेषु तथा चलत्—कनककुंडलकैतवकल्पितौ ।
मृगदृशः पुरुषायित मूर्जितं समभिवीक्ष्य झलज्झलिताविव ॥ ८३ ॥
वरयिता रतकेलिषु कौशलं भृशमसौ वहतीति परा मुदा ।
ऋजुरणन्नवनूपुरसिंजितै रभिजगाविव तद्गुणगौरवं ॥ ८४ ॥
मम मुखस्य विधोरपि दर्शनात् तव दृशौ कुमुदे अपि मीलितः ।
किमिदमित्यपरा शयनोन्मुखं स्तनतटेन जघान हि तं मुहुः ॥ ८५ ॥
पुनरुपैषि तदोकसि तां विलो—कयसि जल्पसि वाथ तया समं ।
दयितयेत्युदितो विदधे शठो नहि नहीति मृषाप्यमृषोत्तरं ॥ ८६ ॥
जहिहि लाक्षणिकीं रुषमुत्तमे नहि न वेद्मि मनस्तव यन्मयि ।
अहह पश्य तवाधरपल्लवः स्फुरति मामिव चुंबितुमुत्सुकः ॥ ८७ ॥
अपिच रागममांतमिवाशये न वहतो न दृशौ बहिरुद्गतं ।
इति विदग्धवचाः कुपितामपि प्रियतमां न परः किमहासयत् ॥ ८८ ॥ युग्मं
रचयिता सखि तत्र किमेष मां नवरतं भविता च कथंकथं ।
इति मुहुः समवादि न का सखी रतिरसोत्सुकयापि नवोढया ॥ ८९ ॥
प्रियतमे पुरुषायितलाघवं किमपि पश्यति वक्रितकंधरं ।
असहया रतमुज्झितुमन्यया गृहमणिः शमितः कुसुमैर्ह्रिया ॥ ९० ॥
सुरतकेलिषु सुभ्रु तवाहितं किमपि चेच्छपथोऽस्तु तदात्र मे ।
ऋतगिरं यदि मां न च मन्यसे ननु विधाय न पश्यसि किं तदा ॥ ९१ ॥
इति नवां रमणीं रतये परः स्मरकलाविदुरः समबूबुधत् ।
अतिविचक्षणतातिविमुग्धता—सुखविबोध्यमिदं यदि वा द्वयं ॥ ९२ ॥

इति नवां रमणीं रमणः परः स्मरविलासकृते समबूबुधत् ।
सततनिर्मितकामकथोल्लसन् नवनवोक्त्यभिषिक्तमनोभवः ॥ ९३ ॥
प्रियतमस्य भृशं सुरतार्दने शपथपूर्वमदात् सुरतं पुरा ।
तदनुलब्धरसा न तदस्मर न्नववधूर्वपुरेस्मरवल्गितं ॥ ९४ ॥
अधरपानविधौ स्तनमर्दने नखरदोल्लिखने परिरंभणे ।
क्वचिदपि स्खलति स्म न कामिनां मतिरिहाप्यवधानभृतामिव ॥ ९५ ॥
हृदि यदेव दधे दयितैरते युवतयो ऽग्रत एव तदाचरन् ।
इतरथा कथमेकमनस्कता रतिरहस्यमुपैति यथार्थतां ॥ ९६ ॥
इह सुखेषु सुखं सुरतोद्भवं महदिहापि मिथोप्यनुकूलता ।
रहसि केलिरिहापि यदृच्छया सममिहापि रतिर्यदि किं पुनः ॥ ९७ ॥
प्रियसखीभिरपि प्रतिबोधिता नवरतोत्सवतोभयशंकिनी ।
अतितरां परिरभ्य हृदीश्वरं कपटमुद्रितदृक् शयितेतरा ॥ ९८ ॥
दयितदष्टरदच्छदपल्लवा नववधूः करकंपनकैतवात् ।
विगतवंति दिनानि रतोत्सवै र्विरहितानि शुशोच मुहुर्न किं ॥ ९९ ॥
रतिरसं कलयन्नितमां पर स्तदुरुतागुणविघ्नितचुंबनः ।
परिनिनिंद कुचौ मुहुरीक्षयन् नच वधूं समयः स हि तादृशः॥ १०० ॥
रतिरसोपरमे स्खलनात्परः प्रणयिनीकुचपर्वतमस्तके ।
निपतितोपि मुमूर्छ न सन्मुखं दृढतरोजनि रंतुमहो पुनः ॥ १०१ ॥
प्रणयिनां यदभिद्यत कौसुमै रपि शरैर्हृदयं सुमधन्वनः ।
प्रणयिनीकुचशैलमहाहती—स्तदसहिष्ट यदद्भुतमेव तत् ॥ १०२ ॥
सपरिवेषशशिश्रियमुद्वहत् भुजयुगांतरवर्ति मुखं स्त्रियः ।
चिचलिषो ऽहृदयाधिपरेतसो ऽपशकुनाय न किं समजायत ॥ १०३ ॥
रतिरसं परमात्मरसाधिकं कथममी कथयंतु न कामिनः ।
यदि सुखी परमात्मविदेकको रतिविदौ सुखिनौ पुनरप्युभौ ॥ १०४ ॥
अधिकृतां करकंकतयोजनां विदधतौ रहसींदुमुखीवरौ ।
विबभतुः सुगृहीतपरस्परा—विव मिथोप्युपपादयितुं रतिं ॥ १०५ ॥

अधिशिरोधि मिथः करकंकत—प्रगुणिताननयुग्ममिषादभात् ।
प्रणवसंपुटयंत्रमिव स्फुर—द्विवलयं रतिकृष्टिकृतेन्ययोः ॥ १०६ ॥
प्रणयिनो मुखचंद्रमसि स्फुर—त्यभिमुखं तरले परिचुंबितुं ।
अनुचितं किमिदं नवनायिका—मुखसरोजमजायत यत्पराक् ॥ १०७ ॥
रतिविरामभवादुपगूहनात् विघटनेच्छुमवेत्य परा प्रियं ।
सुदृढमूरुयुगेन निपीडयं—त्यतत हुंहुमिति स्मितजल्पितं ॥ १०८ ॥
परिपिबन् दयितो दयिताधरं मुकुलिते नयने यदसौ व्यधात् ।
किममुनैव जगाद न यत्पुरो ऽमृतमवेक्षितुमप्यसमंजसं ॥ १०९ ॥
सुरतकौशलशालिनि वल्लभे मुकुलिताक्षिमिषात्समवीविशत् ।
अविषयो वचसां किमिहांतरा स्फुरति द्रष्टुमिवेति परा दृशौ ॥ ११० ॥
रतकलां कलयत्यसुवल्लभे किमपि कुंचिमुखी सुमुखी नवा ।
हह ननेति ममेति वचोमिषान् मदनदीपनमंत्रमिवास्मरत् ॥ १११ ॥
अपदयं दयितस्य रतोत्सवं रचयतो नतनाभिपथादधः ।
करतलं ददती मुदमातनो न्नववधूरधिकां सुरतादपि ॥ ११२ ॥
अदहदीश्वरनेत्रहुताशनो रतिपतिं विदुषामिति यद्वचः ।
ऋतममंस्त तदत्र स एव यो वशयितुं प्रबभूव न मानिनीं ॥ ११३ ॥
मदनोरिरस्य मदनारिरियसौ मदनेन देह इति साधुरन्वयः ।
भुवि कामतत्वमधुनेति केवलं कथमन्यथालसदहो समंततः ॥ ११४॥
उत्प्लुत्य तल्पादितरा रतांते कांतं भुजाभ्यां दृढमालिलिंग ।
आदातुकामेव तदंगयष्टे रनंगसर्वस्वमपि प्रपीड्य ॥ ११५ ॥
दध्रेऽगानि यथा यथातिकठिनान्येषा नवोढा रते
शंके धत्त तथा तथातिकठिनं चेतोपि चित्तप्रियः ।
मा मा मा न न मुंच मुंच हहहेत्युल्लापवत्यां मुहु-
स्तस्यां नो कथमन्यथास्य करुणातारुण्यमासादयत् ॥ ११६ ॥
दंपत्योर्वदनेंदुसंगममिषात्तथ्यं मिथश्चुंबने
किं नैवाभ्युदगच्छदच्छरुचिभृत्सद्यः शशांकद्वयं ।

आसीत्तेन महाहवः स्मरभवो यद्युक्तमेवेति तत्
प्रीतिर्यच्च परैव युक्तमपि तत् यत्क्षेत्रयोरन्यता ॥ ११७ ॥
दृष्ट्वा स्वं प्रतिबिंबमेव वहति प्रेयानयं स्वप्रिया-
मक्ष्णीति स्ववदश्रुवार्भिरकरोन्मुग्धानिपानं पुरः ।
तत्रैव प्रतिबिंबनान्निपतितां भर्त्रा समंयत्पद-
द्वंद्वे स्वे मुमुदे च वीक्ष्य किमितोपि स्यात्परं योषितां ॥ ११८ ॥
कोपि स्मरोन्मुक्तविषाक्तबाण—मूर्छामतुच्छामिव हंतुकामः ।
शैलाविवालंब्य कुचौ कराभ्यां पपौ सुधामिंदुमुखीमुखेंदोः ॥ ११९ ॥
सुरत्राणः कस्य त्वमिति मुहुरेवाभिहितया-
पणैणाक्ष्या प्रोक्तां स्मरशरशरव्यत्वमितया ।
परेषां सर्वेषामवनि हिमरश्मे तव पुनः
करक्रीतादासीगिरमिति पपौ कोपि सुकृती ॥ १२० ॥
स्वाभाविकात्सुरततो विपरीतमेत—द्रागं विशिष्य सुरतं वितनोति यूनां ।
निश्चेतनाप्यजनि रागवती यदत्र शय्यासयावकवधूपदबिंबदंभात् ॥ १२१ ॥
स्मरस्मेरलीलासुतल्पादधस्तात् प्रसूनानि बभ्राजिरे निष्पतंति ।
मृगाक्षीवपुर्वल्लिविश्लेषभावा—विरासानदुःखाद्ददंतीव झंपां ॥ १२२ ॥
यस्यांगं तावदेवं बहिरपि विहितस्पर्शनं कामिनीना-
मीदृक्सौख्यं विधत्ते स खलु रचयिता किं न मध्ये प्रविष्टः ।
इत्थं ध्यात्वा रतांते सुदृढतमपरीरंभदंभेन मध्ये
कायं प्रक्षेप्तुमैच्छन्सकलमिव हितं कातराः कातराक्ष्यः ॥ १२३ ॥
भानोः संक्रमणे श्रयेत मृदुतां विश्वं समस्तं यथा
मन्ये शिश्रियतुस्तनावपि तथा स्त्रीणां रतेः संक्रमे ।
नैवं चेद्गुरुशैलवत्कठिनयोः श्रांता रतांते भृशं
प्रेयांसः कणशोभवन्न पतिता मध्ये तयोस्तत्कथं ॥ १२४ ॥
क्षणं मानेमाने क्षणमथ मिथः काक्षकषणे
क्षणं हासोल्लासे क्षणमथ दृढालिंगनविधौ ।

इति व्यग्रा निन्युः प्रतिगृहमशेषामपि निशां
रतोत्साहैस्तैस्तैः समुदितमुदस्ते युवजनाः ॥ १२५ ॥
अन्योन्यमर्पितरदच्छदखंडनानां निःशंकनिर्मितनखक्षतमंडनानां ।
संभोगसंभवपरिश्रमखेदितानां निद्रासुखं क्षणमभूद्रतयेथ यूनां ॥ १२६ ॥
अन्योन्यप्रवितीर्णदंतनखरप्रोद्यत्पदव्यंजनै-
र्यूनोर्वीक्ष्य परां स्थितिं गतवतो निर्व्याजवीरव्रते ।
कंदर्पोपि गिरीशदर्पदलने निश्चिततामुद्वहन्
आशिश्राय चिराय संगसुभगां निद्रां विशंके तदा ॥ १२७ ॥
तूलं स्पर्शानुकूलं मुखशशिरुचिरश्रीसमाकृष्टिमूलं
तांबूलं नासिकायाव्रतसुकृतफलं स्फारपुष्पोपहारः ।
कांताश्रांतास्तनाभ्यामुरसि खिलमिदं न श्रुतः सप्तमश्चेत्
सर्गः शृंगारसंजीवन इति विदितो वीरहम्मीरकाव्ये ॥ १२८ ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते महाकाव्ये हम्मीरचरिते वीरांके सुरतवर्णने शृंगारसंजीवनो नाम सप्तमः सर्गः समाप्तः ॥

---

## अथाष्टमः सर्गः

प्रपंचयंतः स्फुटतारमंद्र—मध्यस्वरान् पंचमरागगर्भान् ।
**हम्मीरदेवाय** निशाऽवसानं वैतालिका विज्ञपयां बभूवुः ॥ १ ॥
विच्छायमिंदुं मुखमावहंती विनिम्नताराकलुषांबरैषा ।
विभावरी याति रजस्वलेव स्नातुं पयोधौ दिशि पश्चिमायां ॥ २ ॥
वियुक्तनारीजननेत्रपातो—ल्काभिः समंतादिव दीप्यमानं ।
विहाय शीतांशुरसौ विहाय आसीदपूर्वाचलचूलचुंबी ॥ ३ ॥
स्वातंत्र्यहंता न उदेति भास्वानस्यामिति क्रोधभरारुणाभिः ।
दृष्टेव दृग्भिः कुलटाजनेन पुरंदराशारुणतां जगाम ॥ ४ ॥

अबोधि किं न क्षणिका क्षपेयं मानो दधे यद्भवतीभिरेवं ।
इत्यभ्यसूयन्निव मानिनीभ्य स्तनोति शब्दान् कृकवाकुरेषः ॥ ५ ॥
जायापतीनां रतकौतुकेन रात्रिं समग्रामपि जागरित्वा ।
घूर्णंत्यमी विस्फुरितप्रमीला इव प्रदीपा रतमंदिरेषु ॥ ६ ॥
निवर्त्य चेतः सुरतात्कथंचित् यावत्सुषुप्संति युवान एते ।
मार्दंगिकैस्तावदवादि सद्यः प्रत्यूषसूचा सुभगो मृदंगः ॥ ७ ॥
विलेपनामोदिरतांततांत—स्वेदोदकास्वादनमंदचारः ।
संभोगशालासु निविश्य यूनः सुखाकरोत्येष उषासमीरः ॥ ८ ॥
प्राप्तप्रबोधा गुरुणोपदिष्टान्महाप्रयोगान् प्रणिधाय चित्ते ।
किर्त्यैं कवींद्रा इव निर्मलार्थो—त्पत्तिं नरेंद्राः परिभावयंति ॥ ९ ॥
विप्राननोद्गीर्णविविक्तवर्ण—प्रचारचारुध्वनिवेदमंत्राः ।
सतां हृदंतस्तरसा प्रविश्य तमः कषंतीव समूलकाषं ॥ १० ॥
तमोमये प्रेक्ष्य विधिः प्रलीनं मेरुं युगांतेथ नवं सिसृक्षन् ।
प्रत्यूषसंध्याभवरागदंभात् चिनोति शृंगाणि हिरण्मयानि ॥ ११ ॥
विभा विभातैव विभावरीयं मद्यापि मानं किमिवादधासि ।
इति प्रियाया अपि बद्धमूलं मानं सुखेनैव नुनोद कश्चित् ॥ १२ ॥
संभोगकेलीं प्रविधाय पश्चात्सुप्तापि नारी प्रथमप्रबुद्धा ।
आलिंग्य सुप्तं प्रियसुप्तिभंगं विशंकमाना न जहाति तल्पं ॥ १३ ॥
कचिद्विभातीकृतयामिनीका अभ्येत्य कांता निभृतप्रचारं ।
स्वप्नेपि तत्तर्जनशांतचित्ता माश्लिष्य सुप्तां दयितां स्वपंति ॥ १४ ॥
अपि द्विजेशः श्रितवारुणीको ध्रुवं भवेन्नीचजडोपयोग्यः ।
इति प्रबोधं जगतां प्रयच्छन्नध्यास्त मध्यं जलधेः शशांकः ॥ १५ ॥
असौ सिषेवे चतुरोऽपि यामान् श्यामां क्षये सत्यपि यत्सकामः ।
तेनैव शंकेस्तमुपैति पक्वपलांडुपांडुः पतिरोषधीनां ॥ १६ ॥
समस्वरूपे शशिनो रवेश्च बिंबेस्तभावादुदयत्वतश्च ।
उपैति पूर्वापरयोर्विभेदे मतिर्जनानां क्षणमीश जाड्यं ॥ १७ ॥

अवाप यस्यामुदयं विहाय तां मामथासावपरां सिषेवे ।
इत्यादधानेव रुषं हिमांशौ पुरंदराशाऽरुणतां जगाम ॥ १८ ॥
स्फुटं स्फुटत्कुड्मलकोशनिर्य—द्विलोलरोलंबमिषेण हर्षात् ।
समागमे पत्युरिनस्य पश्याऽस्त्राणीव मुंचंति सरोरुहिण्यः ॥ १९ ॥
क्वापि ह्रदे व्योमसरिद्वरायाः पतिर्नदीनामनुबिंबितः किं ।
यद्वारि भातीह तमस्तरंगाः प्रत्यूषरागोपि तदंतराग्निः ॥ २० ॥
एषाहमेतच्च गृहं तवैवा—ऽगंतव्यमेवाशु पुनः प्रियेण ।
इत्युक्तिपूर्वं परिरभ्य गाढं षिंगान् प्रहिण्वंति पणेणनेत्राः ॥ २१ ॥
प्रकाशकल्पेपि सहस्ररश्मौ वारांनिधिश्चापलमुत्ससर्ज ।
हंसे प्रकाशं यति यत्सतीव जडेपि शांतत्वमुपैति मूर्त्तं ॥ २२ ॥
विच्छायतां भूरितरामुपेता दूरीभवत्पुष्करकोशवासाः ।
काले कलौ संत इवोडवोऽमी क्वचित् क्वचिन्नेत्रपथं प्रयांति ॥ २३ ॥
लोलत्तनूनां मथनेन दध्नस्तनूदरीणां कबरीमिषेण ।
ध्वांतावलीकुट्टनजातकार्ष्ण्याः स्फुरंति दंडा इव चंडरश्मेः ॥ २४ ॥
षिंगैर्निषिद्धैरपि दत्तदंत—पदालिवित्रेषु रदच्छदेषु ।
संभ्रांतचित्ताः पतिदृष्टिपातात् ददत्यलक्तं कुलटा नतास्याः ॥ २५ ॥
स्मराहवे स्मेरतरे प्रवृत्ते पलाय्य पृष्ठे मलिनो यमस्थात् ।
इत्यात्तकोपा इव केशपाशं गाढं निबध्नंति सरोरुहाक्ष्यः ॥ २६ ॥
कांचीगुणस्य ग्रथनप्रयासि प्रकोष्ठभूषागणसिंजितेन ।
मुक्तिं भजेथाः पुनरेव शीघ्र मित्यादिशंतीव तमंबुजाक्ष्यः ॥ २७ ॥
शिलालिहंतोग्रगसैधवानां वक्त्रोष्महिध्मा मलयंति वाहाः ।
निश्वासवातैरिव पाणिगानाऽदर्शान्निशाभोगवियोगिनार्यः ॥ २८ ॥
समूलमुन्मूल्य तमःसमूहं लोके प्रवेशं सृजतो दिनस्य ।
मांगल्यहेतोरविबिंबदंभात् नीराजनामाचरतीव पूर्वा ॥ २९ ॥
षिंगैर्वितीर्णानणुवित्तवैरा दिवाप्रभातं भृशमर्दितांग्यः ।
सर्वांगसंस्पृश्यपिभानवीय—करोत्करे जाग्रति नो भुजिष्याः ॥ ३० ॥

घूकादिवैदोरिव नीलनीर—रुहादिवाकृष्य विभातकालः ।
रथांगनामार्कसरोरुहेषु मुदं प्रकाशं श्रियमादधाति ॥ ३१ ॥
पत्यूरुचीनामहिताद्भयेन तमःसमूहो विरहय्य धात्रीं ।
निशाटनेत्राणि विवेश नून मुत्पश्यतैतेषु कुतोन्यथासु ॥ ३२ ॥
विभावरीयाय विनाशमेषा मुदं दधस्वेत्यसुवल्लभा स्वा ।
विबोध्यते द्वंद्वचरेण याव—त्सा तावदागात्स्वयमेव पार्श्वं ॥ ३३ ॥
क्रुधेव ताम्रं वपुरादधान मायांतमालोक्य सहस्ररश्मिम् ।
निलीयते भ्रश्यदितस्ततोपि भिया तमिस्रं गिरिगव्हरेषु ॥ ३४ ॥
इत्यद्भुतैर्वाक्यभरैर्विबोध—करैः समाख्यातविभातकालः ।
तदर्हकृत्यं विरचय्य दान—केलिं कुमारः कलयांचकार ॥ ३५ ॥
विभूषितास्थानसभं शुभैषी **श्रीजैत्रसिंहं** रिपुकुंभिसिंहं ।
गत्वा कुमारोथ मुदा नमस्या—मासानणीयस्तरभक्तिनम्रः ॥ ३६ ॥
कृतप्रणामं तमवेक्ष्य हृष्यद्रोमा पुलोमारिरथो धरित्र्याः ।
रहस्युपानीय रहस्यवेदी जगाद निस्तंद्रतरास्यचंद्रः ॥ ३७ ॥
साम्राज्यलक्ष्मीकरपीडनाय जातप्रवीणप्रतिभे तनूजे ।
विदांवरेण्य क्वच नापि नास्म—द्वंशाः प्रशस्या विषयाभिवश्याः ॥ ३८ ॥
विध्वस्तबाह्यारिचयोप्यजित्वां—तरंगशत्रूनतिमात्रशक्तीन् ।
बाह्येतरारीन् जितवत्सु तेषु स्थितः कथंकारमहंचकास्मि ॥ ३९ ॥
कियद्दराका सविकाशमाहू—राज्यं नृपाणां विगलत्कृपाणां ।
इदं तु योगप्रणिधानभाजां यावद्दराकासविकाशमेव ॥ ४० ॥
बाह्याः शरीरे किल शैशवीया भावा यथा त्याजिषतात्ययेस्य ।
हातुं तथाभ्यंतरगानपीमान् उदासते हंत किमत्र संतः ॥ ४१ ॥
शक्तावसत्यां विषयाभिलाषो विडंबयत्येव जनान् प्रयोक्तॄन् ।
शांतोऽनलः फूत्क्रियमाण उच्चैः किं पूरयत्याशु न भस्मनाऽस्यं ॥ ४२ ॥
अपास्तलज्जं बहुदैन्यमस्मा नकामयंत स्मरकातरा याः ।
ताः कामयेम ह्यधुना मृगाक्षी र्वयं हहाऽतोपि विडंबना किं! ॥ ४३ ॥

मलातुराणामशुचौ शुचौ वा यथाप्रदेशे न विचारणास्ति ।
स्त्रीणां तथा मूत्रपुरीषपात्रे गात्रे नराणां मदनातुराणां ॥ ४४ ॥
यत्प्रेरणादुत्तरलीभवंतः कृत्यान्यकृत्यान्यपि न स्मरंति ।
तदप्यहो यौवनमस्तमस्तु काद्यापि तृष्णा विषयेषु निष्णा ॥ ४५ ॥
ये यौवनोन्मादभरे गतेपि कुर्वंत्यखर्वं विषयेषु रागम् ।
निर्मांसमज्जाऽस्थिषु ते शृगाला लालारसास्वादनमाचरंति ॥ ४६ ॥
सर्वांगेषु निकृष्टमंगयुगलं स्त्रीणां तदुक्तं तयो-
राद्यं विड्विवरं प्रसिद्धमितरत्प्रस्रावरंध्रं पुनः ।
तन्मध्ये यदपत्यरंध्रमसकृद्विस्रस्रवच्छोणितं
ये तस्मादधुनापि नान्यवदनास्तेभ्योपि निंद्योऽस्तु कः ॥ ४७ ॥
तद्राज्यकक्षीकरणान्ममैता माज्ञां गुणैकालय पालयाशु ।
साहाय्यतस्तेऽयमुपेंद्रसेवा—हेवाकिचेताः सुखमस्तु भूपः ॥ ४८ ॥
वार्धक्यदोषोदयदुर्भगत्वान्मुक्त्वाद्य सद्यः कमलानिवास्मान् ।
पतिं द्विजानामिव सौम्यमूर्त्तिं साम्राज्यलक्ष्मीरुपतिष्ठतां त्वां ॥ ४९ ॥
सुधाकिराऽथैष गिरा स्वभक्ति—वल्लीं प्रवेलन्नवपल्लवाढ्यां ।
कुर्वन्निव व्यज्ञपयत्कुमार स्तातं जगद्वेयतमावदातं ॥ ५० ॥
द्वेधापि राजन्नरकांतमेत द्राज्यं न चेतो बहु मन्यते मे ।
द्युसद्नदीवद्विबुधाङ्गिसेव्या त्वदंघ्रिसेवा यदि लभ्यतेऽसौ ॥ ५१ ॥
त्वत्पादपद्मे सदसद्विवेक—कृद्राजहंसत्वमभीप्सतो मे ।
हर्षाय सुव्यक्तकलंककारि राजन्नराजत्वमिदं कदाचित् ॥ ५२ ॥
ज्येष्ठे तनूजे सति राज्यलक्ष्मी देया कदाचिन्न किलेतरस्मै ।
जानन्नपीत्थं नयवर्त्मसंस्थां मह्यं कथं दित्सति तामधीशः ॥ ५३ ॥
**हम्मीरदेवाय** वितीर्य राज्यं मदंघ्रिसेवानिरतो भवेति ।
स्वप्ने निशांते शयितं निशांते मामाह विष्णुः करवै किमार्य ॥ ५४ ॥
निरुत्तरीकृत्य ततो हठेना—निच्छंतमप्येनमतुच्छचित्तं ।
**हम्मीरदेवं** नृपतित्वलक्ष्मी ममीमनत्नातु मिलाविलासी ॥ ५५ ॥

ततश्च संवन्नववह्निवह्नि—भूहायने माघवलक्षपक्षे ।
पौष्यां तिथौ हेलिदिने सपुष्ये दैवज्ञनिर्दिष्टबले ऽलिलग्ने ॥ ५६ ॥
पुरा पुरोधास्तदनु क्षितीन्दु भूपास्ततोन्ये सचिवास्ततश्च ।
ततो महेभ्यास्तदनु प्रजाश्च तस्याभिषेकं रचयांबभूवुः ॥ ५७ ॥ युग्मं ॥
छायाकरैस्तस्य सितांशुशुभ्रं यदातपत्रं बिभरांबभूवे ।
छायाखिलस्यापि जगत्त्रयस्य बभूव तेनाऽद्भुतमेतदुच्चैः ॥ ५८ ॥
एवं प्रतिष्यंस्यसकृत् पदेऽस्य क्षितिक्षितः ख्यातुमिवेति लोके ।
शिरोभितोप्यापतती नृपस्य तस्याऽथ बालव्यजने व्यभातां ॥ ५९ ॥
अपाठिषुर्बंदिजनास्तदानी मराणिषुर्मंगलतूर्यकाणि ।
अनर्तिषुर्नर्तविदश्च गीत मगासिषुर्गायकमंडलानि ॥ ६० ॥
पदेपदे वंदनमालिकानां माला निबद्धा बभुरुल्लसंत्यः ।
गृहावलीनां नयनायमान—द्वारामिव भ्रूलतिकाः सलीलाः ॥ ६१ ॥
नरेंद्रमार्गेष्वभितो विकीर्णा विस्मेरपुष्पप्रकरा विरेजुः ।
कांतं नवीनं प्रति भूमिदेव्या हासा इव स्फारतरप्रकाशाः ॥ ६२ ॥
हर्षप्रकर्षेण समंततोपि सद्यस्कबाल्हीकजलप्रसिक्ताः ।
नवे हृदीशे प्रकटीकृतात्म—रागा इवोद्रंगभुवो विरेजुः ॥ ६३ ॥
प्रत्यालयोत्तंसितशातकुंभ—मांजिष्ठकौसुंभिककेतुदंभात् ।
अधीश्वरं प्राप्य नवं हमीर—देवं विशंके पुरमप्यरज्यत् ॥ ६४ ॥
साम्राज्यलब्ध्या मुदितोप्यमुष्य भ्रूभंगमाशंक्य शिरांस्यधुन्वन् ।
वृथा व्यषीदत्फणिराट् विवेद ---------- ॥ ६५ ॥
हृत्वा श्रियं शात्रवकैरवाणां सुहृज्जनांभोजकुले दधानः ।
प्राप्तोदयो भूवलये स राजा --न कस्याऽजनि विस्मयाय ॥ ६६ ॥
विश्राणने कर्णनृपस्य नीतौ रामस्य शौर्ये च धनंजयस्य ।
काले कलौ पंडितमंडलीनां किं जायतोदाहरणं समास्म ॥ ६७ ॥
धर्मो जगर्जेव दरिद्रमुद्रा क्वचिन्ननाशेव बभाविव श्रीः ।
समुल्ललासेव नयद्रुमोपि शुभं ननर्तेव तदीयराज्ये ॥ ६८ ॥

कालानलो ना ऽजनि नाभिरामो रामो भवन्नो भरतो रतोभूत् ।
आसीन्न चित्ते जनकोपि कोपि हम्मीरमालोकयतां जनानां ॥ ६९ ॥
अहानि तान्येव सुखावहानि हम्मीरदेवो ऽजनि येषु भूपः ।
लोकास्त एवात्तशुभावलोका वक्त्रांबुजं यै ददृशे ऽदसीयं ॥ ७० ॥
विकासिकाशाभिनवप्रवाल—जिद्दंतदंतच्छददीप्तिदंभात् ।
हृद्युल्लसद्वाङ्मयरागसिंधो विस्तारयँस्तारतरानिवोर्मीन् ॥ ७१ ॥
रुजार्दनादित्यथ जैत्रसिंहः स्वस्यावसानं निकटं विजानन् ।
स्नेहेन हम्मीरनृपाय राज्य—शिक्षामिमां प्रारभत प्रदातुं ॥ ७२ ॥
स्त्रीणां श्रियां वा क्वच नापि मागा विश्वासमासां क्षणभंगुराणां ।
रक्ता विरक्ताश्च सतामपि स्युः पदे पदे ऽमू विपदे यदाशु ॥ ७३ ॥
साम्राज्यमासाद्य महत्तमेषु स्म विस्मरो मा विनयं नरेश ।
पुमान् बृहद्भानुरिवाविनीतः कुलस्य सर्वस्य विनाशहेतुः ॥ ७४ ॥
अप्यार्यकार्याणि विचार्य कुर्वन् विवेकवानेष जगज्जनेष्टः ।
जगन्निवासा तदियं नृपत्व—लक्ष्मीः कथं तं विजहाति तात ॥ ७५ ॥
शक्तोपि देह्यप्रकटीकृतात्म—शक्तिः पराभूतिपदं सदैव ।
कारीषवन्हिर्विद वत्स कस्य कस्याशु न स्यादतिलंघनीयः ॥ ७६ ॥
सदा सदाचारपरो नरेंद्रः सेव्यो मुनीनामपि निस्पृहाणां ।
कुशीलताभाग्नवरं खलोपभोगाय तैलीव भवत्यवश्यं ॥ ७७ ॥
धर्मार्थकामा इव सामदान—भेदाः क्रमेणैव पुरा प्रयोज्याः ।
सर्वात्मनैषामसति प्रचारे धार्या मतिर्मोक्ष इवाथ दंडे ॥ ७८ ॥
अनंतरो यो विषयेषु राजा संवर्धितः क्लेशकरः स एव ।
गृहांगणांतर्विषवृक्ष उप्ते कालं कियंतं कुशलं गृहस्य ॥ ७९ ॥
राज्यस्य धर्माः किल पंच ये तान् पंचेंद्रियाणीह वदंति संतः ।
प्रलीयमानेषु तदेषु राज्य मपि प्रलीयेत वपुर्यथैव ॥ ८० ॥
शक्तिं समासाद्य सदोद्यतेन कार्या मति विक्रम एव पुंसा ।
तिर्यक्षु भूरिष्वपि पश्य सिंहः पराक्रमादेव न किं मृगेंद्रः ॥ ८१ ॥

नये धियं सम्यगनासयित्वा युक्तः प्रयुक्तो न पराक्रमोऽपि ।
छलावलंबेन विनैव तावत् सिंहोऽपि हंतुं प्रविशेदिभं किं? ॥ ८२ ॥
बुद्ध्यैव सिद्धिर्यदि तन्नपुष्पै रपि प्रहर्त्तव्यविधिर्विधेयः ।
पश्य प्रसूनैरपि युध्यमानः स्मरो हरात्कां गतिमाससाद ॥ ८३ ॥
शौर्यं च बुद्धिर्मिथुनं तदस्मात् अदूषिताद्राज्यमुदेति नित्यं ।
न चैकतो विश्वमपि प्रपश्य संजायते द्वंद्वत एव सर्वं ॥ ८४ ॥
जिगीषुणाऽरौ बलशालिनापि यात्रा विधेया खलु जेय एव ।
ज्वालाजटालीकृतदिङ्मुखोऽपि नांबूनि दग्धुं क्रमते दवाग्निः ॥ ८५ ॥
रिपोरपि स्वाश्रयमागतस्य करोति सत्कारविधिं विधिज्ञः ।
तथाहि मीनांशमुपागतस्य नोच्चं पदं किं भृगुनंदनस्य ॥ ८६ ॥
यथा न पीडा भवति प्रजानां ग्राह्य स्तथा धीधन तत्करोऽपि ।
किं नाम पुष्पाणि चिनोति पुष्प—लावी लतानां जनयन्विबाधां ॥ ८७ ॥
निवासिता येन स एव वेत्ति प्रायः प्रजानां सुखदुःखभावं ।
वध्या विजानाति किमंग गर्भ—प्रपोषणं वा वहनक्रमं वा ॥ ८८ ॥
धनं प्रजानामयथाऽपराधं गृह्णन् विजानाति न तच्च ताः स्वाः ।
इदं नृपस्याऽशकुनं तथाहि राज्यस्प नाशोऽस्य न तच्च ताश्च ॥ ८९ ॥
सर्वस्वनाशेऽपि कुले विरोधोद्बोधं सुधीर्नो विदधीत कश्चित् ।
कुले विरोधो रचितो निनाय सुयोधनं किं निधनं न सद्यः ॥ ९० ॥
प्रजासु पीडा स्वकुले विरोधः पक्षद्वयं पेषणयंत्रमस्मिन् ।
चूर्णीकृतं धान्यमिव प्ररोढुं पुनर्न राज्यं समुपैति शक्तिं ॥ ९१ ॥
स्वमेव पुष्णन् प्रभुवंचनेन नार्हत्युपेक्षामनुजीविवर्गः ।
कर्षद्रसाया रसमात्मने किं नोन्मूल्यते क्षेत्रगतं तृणादि ॥ ९२ ॥
मातेव राजा हितकृत् प्रजानां मातुः सपत्नीव नियोगिवर्गः ।
तयार्पितानां च करे तदस्याः क्व वृद्धिरासां क्वच जीवितव्यं ॥ ९३ ॥
स्वतः कुलीनोऽप्यधिको विधेयो राज्ञानुजीवी न कदाचिदेव ।
यतो जडात्मा वटवत्प्रवृद्धः स राज्यसौधस्य विनाशहेतुः ॥ ९४ ॥

प्राज्ञः सपत्नैः परिभूयमानो—प्युदीषिषन् न त्यजति स्वदेशं ।
दिवाकराल्लुप्तकरोप्यनुद्यन् नभः शशांकः पुनरभ्युदेति ॥ ९५ ॥
चिरंतनान्मंत्रिवरान् विहाय साम्राज्यभारो निहितो नवेषु ।
क्षणेन मूलादपि नाशमेति यथाऽविपक्वेषु जलं घटेषु ॥ ९६ ॥
स्याद्राज्यमंत्रेषु किलैक एव श्रेयानमात्यो न पुनर्द्वितीयः ।
आरोहणं यानयुगस्य तज्ज्ञा न प्राणसंदेहकरं स्मरंति ॥ ९७ ॥
यो यत्र रक्तो यदि वा विरक्तो भावे विवेको नहि तस्य तत्र ।
अतो न तन्मंत्रविधौ विधेया शिक्षा तदीया सुविचक्षणेन ॥ ९८ ॥
मंत्रान्बहूनामपि धीसखानां श्रेयस्तरान्नैव वदंति संतः ।
गर्भस्य मातुश्च कुतः शिवाय करा बहूनां बत सूतिकानां ॥ ९९ ॥
पूर्वं स्वहृद्येव विचार्य सम्यक् मंत्रं ततः सम्मतिमाददीत ।
संवादिता चेत् तदिदं विधेयं नोचेत्तदूहे मतिराविरास्या ॥ १०० ॥
विराद्धपूर्वः पुरुषः प्रधानपदे कदाचिन्न पुनर्विधेयः ।
तादृग्छलं प्राप्य तथाविधा हि द्रुह्यंति नूनं धृतगुप्तवैराः ॥ १०१ ॥
पुमान्विराद्धो विजहाति नैव धीमन् युगांतेपि विरोधभावं ।
अद्यापि पश्यार्यमणं विधुं वा तुदन्निवर्तेत विधुंतुदो न ॥ १०२ ॥
महाबलेनापि कलिर्न कार्यः समं शकेशेन लसच्छलेन ।
तथा समर्थोपि बलिर्विजिग्ये छलप्रधानेन जनार्दनेन ॥ १०३ ॥
पुरः पुरो जाग्रदुदग्रकष्टं दुरोदरं दूरत एव हेयं ।
दुरोदरारंभवशेन कां कां बिडंबनां पांडुसुता न जग्मुः ॥ १०४ ॥
बलाबलं सूत्रगतं विचार्य सविग्रहां यो विदधीत वृत्तिं ।
स एव तत्तद्गुरुगौरवार्हे—शास्त्रज्ञधुर्यत्व मुपैति तात ॥ १०५ ॥
दत्वेति शिक्षां शुभबद्धसख्यां गेहेच देहेच निरीहचित्तः ।
**जैत्रप्रभुः** स्वात्महितं चिकीर्षन् **श्रीआश्रमं** पत्तनमन्वचालीत् ॥ १०६ ॥
शिवापि **जंबूपथ**सार्थवाही विराजते यत्र शिवः स्वयंभूः ।
यो ध्यातमात्रोप्युरुभक्तिभाजां दत्ते न किं भुक्तिमिवाशु मुक्तिं ॥ १०७ ॥

मज्जच्छचीदृग्युगलाकुवेल—विष्वग्गलत्कज्जलमेचकांबु ।
**चर्मण्वती** यत्र सरिद्वहंती पुण्यश्रियो वेणिरिवाविभाति ॥ १०८ ॥
ज्वलिष्यदेतद्विरहाग्नितप्त मिवांबकाब्जस्रवदस्रुवर्षैः ।
पृष्ठेऽथ हृत्सेसिचतः समेत्य व्यजिज्ञपन्नेनममात्यमुख्याः ॥ १०९ ॥
साम्राज्यलक्ष्मीं विरहय्य पूर्वं मुमुक्षतोऽस्मानपि संप्रतीश ।
खद्योतवत् त्वद्विरहांधकारे भाग्यानि नो यांति पुरा प्रकाशं ॥ ११० ॥
भवत्दृगालोकनमुक्तयोगं प्रपत्स्यतेऽदो नगरं नरेश ।
रंगत्पतंगोज्वलबिंबडिंब—विवर्जितस्य श्रियमंबरस्य ॥ १११ ॥
वृष्ट्या सुधाया इव सौम्यदृष्ट्या सिंचन्नथैतान्निजगाद भूपः ।
मा कार्ष्ट कष्टं विदुषामनिष्टं कृते मम स्वात्महितं चिकीर्षोः ॥ ११२ ॥
इदं पुरव्योममदंशुमालि—प्रतापरोचिश्च्यशून्यशोच्यं ।
**हंमीर**चंद्रेभ्युदिते प्रकाम—श्रीकं भविष्यत्यचिरेण नूनं ॥ ११३ ॥
मद्वंशपाथोरुहराजहंसस्तैस्तै र्गुणैर्विश्वकृतप्रशंसः ।
संसेव्यमानोहमिव प्रसाद—दानैः सदानंदयितैष युष्मान् ॥ ११४ ॥
इत्थं सहैतान् विसृजन् अवापत् **पल्लीं** पुरीं यावदसौ नरेशः ।
लूता विनिर्गत्य पपात तावत् स्वयंच भेजे लघु देवभूयं ॥ ११५ ॥
असासहीभिर्विरहं प्रियाभिरष्टाभिरिष्टाभिरथाऽन्वितस्य ।
तत्रैव संस्कारविधिर्विधिज्ञैः **श्रीजैत्रसिंहा**धिपते र्वितेने ॥ ११६ ॥
अथाभिषिंचन्नवशोकभूपं नवावतारं हृदि बाष्पपूरैः ।
चकार मोहग्रहिलीकृतात्मा **हम्मीरदेवः** परिदेवनानि ॥ ११७ ॥
तातेति तातेति वचः प्रघोष—शुष्यद्गलस्यापि ममाऽवनीश ।
यद्दर्शनं न प्रददासि तत्का तवौचिती संगतिमंगतीयं ॥ ११८ ॥
विश्वत्रिलोकीतिलकायमानं व्यधात् विधेयस्तव पाणिरेनं ।
कथं स एवास्य विनाशहेतोः प्रागल्भ्यमभ्यस्यति हे हताश ॥ ११९ ॥
हुताशनाऽसज्जनकालकूटान् परंतपोर्जोनिति को व्यधत्त ।
**श्रीजैत्रसिंहं** नृपतिं प्रणिघ्नन्नजायतास्योत्तरमद्य वेधाः ॥ १२० ॥

धातर्विगर्ह्यादभितोपि लोका—पवादतो यद्यपि नासि भीतः ।
तथापि पाणी कथमुत्सहेतां नृरत्नमेनं तव हंत हंतुम् ॥ १२१ ॥
केनापि शंके पविशैलसाराण्यादाय चक्रे हृदयं विधातुः ।
क्रंदत्यपीत्थं मयि मुक्तकंठं नाद्यापि यत्तत्करुणा रुणद्धि ॥ १२२ ॥
कंठस्य हाहेति वचांसि दृष्ट्यो रसं कपोलस्य कराब्जकोशः ।
चित्तस्य शोकः शरणं **हमीर—देवस्य** तत्राहनि जायते स्म ॥ १२३ ॥
इत्थं महाशोकसमुद्रमग्नं उद्धर्तुमेनं जनताहिताय ।
अकर्णधारायत**विप्रबीजा**ऽदित्यादिभिर्ब्रह्मविदां वरेण्यैः ॥ १२४ ॥
जगाम तातो निधनं ममेति वृथा कृथा मा क्षितिपाल खेदं ।
कस्याप्यवश्या निधनस्य शस्य दृष्टाः श्रुता वा पितरो त्र विश्वे ॥ १२५ ॥
श्वासावधि स्यात्खलु जीवितव्यं श्वासः प्रसिद्धः स तु वायुरेव ।
वायोरिहान्यत्तरलं न किंचिद्यज्जीव्यते तन्महदेव चित्रम् ॥ १२६ ॥
क्रीडां करिष्यति कियच्चिरमेष हंसः
स्निग्धोल्लसत्कलरवोत्र शरीरवाप्यां ।
कालारघट्टघटिकावलिपीयमान
मायुर्जलं झगिति शोषमुपैति यस्मात् ॥ १२७ ॥
इयं मायारात्रिर्बहलतिमिरा मोहललितैः
कृताज्ञाना लोकास्तदिह निपुणं जाग्रत जनाः ।
अलक्ष्यः संहर्तुं ननु तनुभृतां जीवितधना—
न्ययं कालश्चौरो भ्रमति भुवनांतः प्रतिदिनं ॥ १२८ ॥
लंकाभर्त्तुर्निधनरुचिना चापहस्तेन येन
क्षिप्तास्तास्ताः पितृपतिमुखे कोटयो राक्षसानां ।
सोपि स्फूर्जद्दिवसरजनीघोरवक्त्रेण राम-
स्ताम्यन्मूर्तिर्झगिति गिलितः कालनक्तंचरेण ॥ १२९ ॥
सूनोर्मन्मनभाषितानि शिशुता हृद्यस्य जीवादिशे—
त्युक्तीर्यौवनगस्य यस्तव पिता माधुर्यधुर्याण्यपात् ।

क्व स्वर्गे वसुधासुधाकरसुधास्वादोऽधुना प्रीतये
तस्य स्वद्यशसैव तृप्तिरमरीगीतेन पीतेन चेत् ॥ १३० ॥
इत्थं स्मार्तविनोदमोदिहृदयप्रज्ञालवक्त्रांबुज-
प्रादुर्भूतविशेषतत्वभणितिश्रेणीप्रबुद्धाशयः ।
शोकद्वेषिचमूरमूर्दलयितुं वीरं विवेकं सृजन्
वेश्मेव स्वमपालयत्क्षितितलं **हम्मीरदेवस्ततः** ॥ १३१ ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीरांके श्रीहम्मीरदेवराज्याप्तिवर्णनो नामाष्टमः सर्गः समाप्तः ॥

---

## अथ नवमः सर्गः

अथास्य षड्गुणाँस्त्रिस्रः शक्तीर्भूपस्य बिभ्रतः ।
दिग्जयायानपायाय स्पृहयालु मनो ऽभवत् ॥ १ ॥
ततो दैवज्ञविज्ञात--लग्ने लग्नेद्धरुग्ग्रहे ।
वंद्याभिर्गोत्रवृद्धाभिः कृतयात्रिकमंगलः ॥ २ ॥
पश्चाद्धृतोष्णरुग्बिंब ऊर्ध्वाकृष्टसमीरणः ।
नृपस्तुरंगमारूक्षत्पुरस्कृतसितद्युतिः ॥ ३ ॥ युग्मं ॥
स्वतोधिकौजसं वीक्ष्य माम्लासीदेनमुष्णरुक् ।
इतीवास्योज्वलं शीर्षे छत्रं छायाकरैर्दधे ॥ ४ ॥
पास्यंत्यस्याऽखिलं सैन्या मद्वारीति विशंकिनी ।
तं वालव्यजनव्याजा—दागाद्गंगेव सेवितुं ॥ ५ ॥
चंपाया इव चंपेश स्त्रिपुरस्त्रिपुरादिव ।
प्रकंपयन् धरां धीरो निर्ययौ नगराद्बहिः ॥ ६ ॥
पराग इव पाथोजा त्पार्थपाणेः शरा इव ।
पुरतः स्फुरितोत्साहाः पृष्ठे सैन्या विनिर्ययुः ॥ ७ ॥
निर्मिमाणा मदांभोभि र्विश्वकर्दमिलामिलां ।
गर्जिसंतर्जिताराति—शौंडीर्या निर्ययुर्गजाः ॥ ८ ॥

प्रखरप्रस्फुरत्पक्षा आरूढपुरुषोत्तमाः ।
चेलुस्तार्क्ष्याः परोलक्षाः प्रत्यक्षास्तार्क्षिका इव ॥ ९ ॥
उच्चैर्ध्वजालीबिभ्राणैः प्रशस्तस्पंदनैस्तथा ।
यथा तदंतर्विक्षिप्ते स्तिलैर्भेजे न भूतलं ॥ १० ॥
वियत्कुक्षिंभरिस्फार—हुंकारमुखराननाः ।
पत्तयो वल्गु वल्गंतो नृपचित्तममूमुदन् ॥ ११ ॥
वात्याव्यतिकराक्रांत—पताकार्पितदृष्टयः ।
मिथो हहेति जल्पाका रेजिरे वैजयंतिकाः ॥ १२ ॥
पदप्रपातप्रोद्भूतै रभितोपि रजोव्रजैः ।
छायार्थमिव सैन्यस्य प्रतेने दिवि मंडपः ॥ १३ ॥
केचिद्गजानां केचिच्च पत्तीनां केपि वाजिनां ।
रथानां केच नावोचन् सैन्ये तस्य प्रभूततां ॥ १४ ॥
परःसहस्रैर्गंधर्वैः परो लक्षैश्च पत्तिभिः ।
क्रमात्क्रामन्धरां धीरो प्रापद्भीमरसं पुरं ॥ १५ ॥
तत्र श्रिताभ्यमित्रत्वं गर्जन्नर्जुनभूपतिं ।
कुट्टयित्वासिदंडेन स्वनिदेशवशं व्यधात् ॥ १६ ॥
ततो **मंडलकृत्** दुर्गा त्करमादाय सत्वरं ।
ययौ **धारां** धरासारां वारांराशिर्महौजसां ॥ १७ ॥
परमारान्वयप्रौढो **भोजो** भोज इवापरः ।
तत्रांभोजमिवानेन राज्ञा म्लानिमनीयत ॥ १८ ॥
ततोति बलभारेण कासारितमहीतलः ।
व्यधादवंतीं दंतींद्र—मदाक्तप्रांतकाननां ॥ १९ ॥
**शिप्रां** विप्रांजलिव्यक्तैः सिक्तवप्रां पयःकणैः ।
दृष्ट्वा तस्याऽभवन् सैन्याः सज्जा मज्जनहेतवे ॥ २० ॥
विमुक्तबंधनास्तत्र कृतमज्जनकौतुकाः ।
नासन् रेवानदीसेवा—हेवाकिहृदया गजाः ॥ २१ ॥

धुन्वंतः कंधराकेशान् वाजिनः स्नातनिर्गताः ।
आसारं तेनिरे तीरे तटिन्याः पटुकांतयः ॥ २२ ॥
उन्मज्जत्कुंभिकुंभा सा स्रवंती सैनिकाशयं ।
हरतिस्म चकोराक्षी यथा पीनोन्नमत्कुचा ॥ २३ ॥
नृपोपि निर्मितस्नानो हितदानैकतानधीः ॥
तत्रानर्च **महाकालं**--कालं दुष्कर्मवैरिणां ॥ २४ ॥
प्रविश्य मध्ये मेध्यश्री—**विशालां** तां निभालयन् ।
नैकशो **विक्रमादित्यं** सस्मार स्मेरविक्रमः ॥ २५ ॥
विनिवृत्तस्ततो विश्वां विश्वां स्वकरवर्त्तिनीं ।
सृजन् शौर्यवतां धुर्य श्चित्रकूट मकुट्टयत् ॥ २६ ॥
ततः स्फुटं नटन्मेद—**पाट**पाटनपाटवे ।
प्राप्यार्बुदाद्रिं सांद्रश्री स्तत्रावासान्यवेशयत् ॥ २७ ॥
प्रतीभबुद्धया बिंबान् स्वान् स्फाटिकीषु शिलास्विह ।
संपश्यतो ऽभवं स्तस्य सिंधुराः प्रधनोद्धुराः ॥ २८ ॥
हरिन्मणिगणस्यात्र प्रोल्लसंत्यो मरीचयः ।
नवदूर्वावणभ्रांतिं तद्धयानामजीजनन् ॥ २९ ॥
श्रमेण वर्मभिः सैन्यै रधिशाखं निवेशितैः ।
रेजिरे शैलराजस्य सुभटा इव शाखिनः ॥ ३० ॥
तत्र विश्रम्य विश्रम्य पादपानां तले तले ।
गीयमानानि भिल्लीभिः स्वयशांस्यशृणोन्नृपः ॥ ३१ ॥
घनधीध्याततन्नाग—प्रमोदिशिखिकूजितैः ।
जगाविवार्बुदो ऽमुष्य दिग्जयप्रभवं यशः ॥ ३२ ॥
कुंभिकुंभमदांभोभि र्द्विगुणीकृतनिर्झरः ।
आरुह्य पृष्ठमस्याद्रे श्वारिमानमलोकत ॥ ३३ ॥
वसतौ विमलात्मायं विमलस्याऽर्षभप्रभुं ।
ननाम नोत्तमानां हि चित्ते स्वपरकल्पना ॥ ३४ ॥

तत्र **श्रीवस्तुपालस्य** कीर्तनं कलिकर्त्तनं ।
दृष्ट्वासौ विस्मितो नैक–वेलं मौलिमकंपयत् ॥ ३५ ॥
प्रणम्य महतीभक्तिः सर्वदामर्बुदां ततः ।
आश्रमेऽरूंधतीजाने विशश्राम क्षणं नृपः ॥ ३६ ॥
**मंदाकिन्यां** विधायोच्चैः स्नपनं शमनं रुजां ।
अपूजयज्जगत्पूज्य मथासाव**चलेश्वरम्** ॥ ३७ ॥
साक्षाद्ध**नंजय**स्येह धारातर्षस्य धन्वितां ।
निरीक्ष्य नृपतिर्जज्ञे विस्मयोत्तानलोचनः ॥ ३८ ॥
प्रचलद्बलपाथोधि—मैनाकीकृतवैरिणः ।
अत्राभूत्खर्वदो गर्वः सर्वदोस्यार्बुदेश्वरः ॥ ३९ ॥
ततोवतीर्य वर्यश्री र्निर्धनं **वर्धनं पुरं** ।
**चंगा**मपि गलद्रंगां चक्रे चक्रेरिविक्रमः ॥ ४० ॥
अजयोपपदं मेरू मध्ये कृत्य स कृत्यवित् ।
**पुष्करं** तीर्थमासाद्य दुष्करं पुण्यमर्जयत् ॥ ४१ ॥
आनर्च भूपस्तत्रादि—वराहाख्याधरं हरिं ।
चित्रं दशावतारोपि न यो दाहात्मतां गतः ॥ ४२ ॥
प्रयाणपटहध्वान—प्रतिध्वनितकंदरान् ।
पश्यन्स्वकीर्तिगानैक—तानानिव धराधरान् ॥ ४३ ॥
ततः **शाकंभरी**द्वारि वारस्त्रीवारलोचनैः ।
अभून्निपीतलावण्य—सर्वस्वो वसुधेश्वरः ॥ ४४ ॥
अदसीयरिपुस्त्रैण —गलल्लोचनवारिभिः ।
तदादिलवणस्येह मन्ये खानिरजायत ॥ ४५ ॥
ध्वस्तराष्ट्रं **महाराष्ट्रं खंडिल्लं** खंडितप्रभं ।
**चंपां** च विस्फुरत्कंपां भूपस्तदनु तेनिवान् ॥ ४६ ॥
**ककरालं** करालश्रि कृत्वाथास्यात्र तस्थुषः ।
**श्रीमाँस्त्रिभुवनाद्रींद्रो** मिलद्दत्तमहोपदः॥ ४७ ॥

चतसृष्वपि दिक्ष्वेवं स्वाज्ञां राज्ञां स मौलिषु ।
मौलिलीलायितां बिभ्रन् स्वपुरोपांतमासदत् ॥ ४८ ॥
अमान् पुरांतरे पौर—रागांभोधिर्नृपागमे ।
वेल्लद्रक्तध्वजव्याजात् दधावुद्वेलतामिव ॥ ४९ ॥
द्वारि निर्यज्जनप्रौढ—द्युतिदिव्यांशुकच्छलात् ।
पुरमप्यहसत्स्फीत—प्रीतीवोपेयुषि प्रभौ ॥ ५० ॥
उदंचितकरैर्विप्रै र्दत्ताः शृण्वन्नथाशिषः ।
बंदिवृंदजयारावै र्मुखरीकृतदिङ्मुखः ॥ ५१ ॥
**धर्मसिंहा**दिभिर्मुख्यै रभ्येत्य प्रणतक्रमः ।
पुरं प्राविशदुर्वींदु रतुच्छोत्सवसच्छविः ॥ ५२ ॥
उत्तंभिताः प्रतिद्वारं पौरैरुत्सववांछया ।
कलशा रेजिरे सद्म—श्रीणामुरसिजा इव ॥ ५३ ॥
स्फूर्जत्तूर्यावलीध्वानै राहूता इव सर्वतः ।
त्यक्तान्यकार्या नार्योथ द्रष्टुमेनं दधाविरे ॥ ५४ ॥
क्षिप्त्वैकं कुंडलं कर्णे करेऽन्या बिभ्रती परं ।
रेजे पुरः स्फुरच्चक्रा सेनेवानंगभूपतेः ॥ ५५ ॥
एकेनैव कटाक्षेण विश्वं जेतुमहं सहा ।
आख्यांतीवेत्यशोभिष्ट परैकांजितलोचना ॥ ५६ ॥
असमाप्ततयाऽन्यस्या वेणिः पंचांगुलीधृता ।
पद्मकोशविनिर्गच्छत्—भृंगश्रेणिभ्रमं दधौ ॥ ५७ ॥
दंतक्षताढ्यो कस्याश्चिद्दिद्युते वीटिका करे ।
भालेनास्याजिता कृष्णा कृशा लेखेव सीतगोः ॥ ५८ ॥
उपरुध्य करेणैव वेगान्नीवीमसंयता ।
प्रस्थिताभात् परासादी वल्गुवल्गत्करो यथा ॥ ५९ ॥
प्रसाधिकाकरात्पादं रभसाक्षिप्य काचन ।
चचालालक्तकांकानु—मितांघ्रिस्पृष्टभूतला ॥ ६० ॥

कुंभिकुंभेक्षणादात्म—स्तनापह्नतिशंकिनी ।
काचिदन्वेषयामास पाणिना स्वमुरो मुहुः ॥ ६१ ॥
सव्यांगभूषणं सव्ये—तरांगे बिभ्रती परा ।
साम्यं मिथोऽन्ययोरेव स्माहेव जितविश्वयोः ॥ ६२ ॥
पश्यंत्युदंचितग्रीवं पादाग्राक्रांतभूः परा ।
विजेतुं कुंभिनः कुंभा निवाभादुन्नमत्कुचा ॥ ६३ ॥
धम्मिल्लबंधे कस्याश्चि दंगुल्यंतर्विनिर्गता ।
कलिका चंपकस्येव रेजे पत्रावलीवृता ॥ ६४ ॥
कराब्ज एव बिभ्राणा रेजेन्या कनकावलीं ।
यूनां नेत्रकुरंगाणां क्षेप्तुकामेव वागुरां ॥ ६५ ॥
सुप्रसाधितसव्यांघ्री रणद्भिर्नूपुरैः परा ।
अर्धनारीश्वरालोक—रागिणां रागमादधे ॥ ६६ ॥
शिरस्यपिहितेन्यस्या रक्षा वेणिमुखस्थिता ।
फणाभृतः फटाटोपे फणामणिरिवाबभौ ॥ ६७ ॥
तानवं प्रापयन्मध्यं वक्षोजौ गौरवं नयत् ।
स्त्रीणामूर्ध्वस्थितं रेजे प्रभुशक्तिमिवाश्रितं ॥ ६८ ॥
दृग्द्वयेन पिबंत्योस्याऽसीमं लावण्यवारिधिं ।
जिग्युश्चलुत्रयापीत—ससीमाब्धिं मुनिं स्त्रियः ॥ ६९ ॥
अवाप्तावसराः काश्चित्कटाक्षैर्विव्यधुर्नृपं ।
ता धानुष्क इवाऽमुष्य कामः कांडैर्व्यडंबयत् ॥ ७० ॥
पिबंत्यो नृपलावण्य—सुधां तृप्तिं न लेभिरे ।
तथापि शिरसः कंपं सद्यः काश्चन तेनिरे ॥ ७१ ॥
इत्थं पुरवरांगीभि र्मनोहत्य दृगंचलैः ।
निपीयमानलावण्यः स स्वं प्रासादमासदत् ॥ ७२ ॥
अहितापकरस्फार—विक्रमाक्रांतभूतलः ।
अच्युतस्थितिरप्यासी न्न स क्वापि जनार्दनः ॥ ७३ ॥

व्याख्या धर्मार्थकामाख्याः पुरुषार्थास्त्रयोप्यमी ।
यथायोगमवाप्तात्मा ऽवसरास्तं सिषेविरे ॥ ७४ ॥
अहिंसाटोपमाबिभ्रद्विलसत्सर्वमंगलः ।
महेश्वरोपि तद्राज्ये न विषादी जनोऽद्भुतं ॥ ७५ ॥
कोटियज्ञफलं राज्ञा पृष्टोन्येद्युः पुरोहितः ।
विश्वरूपाख्ययाख्यातो व्याचख्याविति तं पटुः ॥ ७६ ॥
जित्वा भुजबलेनोर्वीं कोटियज्ञं यथोदितं ।
निर्मिमाणो नृपः प्रीति—पात्रं स्यात् त्रिदिवश्रियां ॥ ७७ ॥
इति स्मृतिसुधांभोधि—छटाछोटपटुच्छविं ।
निशम्य तद्गिरं भूपस्तं क्रतुं कर्त्तुमैहत ॥ ७८ ॥
आहूताः पुरुहूतेन ततो भूमेः प्रमोदिना ।
मिमिलुर्वाडवास्तत्र दुष्कर्मोदधिवाडवाः ॥ ७९ ॥
अंतःस्फुरच्चतुर्वेद—सुधांभोधेरिवोर्मयः ।
रेजिरेऽगेषु विप्राणां गोपीचंदनभंगयः ॥ ८० ॥
नित्यस्नानवशात् पिंगी—भूतकुंतलकैतवात् ।
बिभ्राणैः परमं तेजः शिरस्यंतरमादिव ॥ ८१ ॥
द्विभ्रमक्षिप्तरुद्राक्षा—क्षमालाव्यपदेशतः ।
भृंगैरिवांबुजभ्रांत्या लीनैर्भूषितपाणिभिः ॥ ८२ ॥
अंहोराशिपरित्रासि—काशीवासप्रकाशिभिः ।
आययानं परानंदवर्षिभिश्च महर्षिभिः ॥ ८३ ॥ त्रिभिर्विशेषकं ॥
मारेर्निवारणं सप्त व्यसनानां च वर्ज्जनं ।
मोक्षणं गुप्तिगुप्तानां प्रावर्त्तत तदा पुरे ॥ ८४ ॥
तोरणभ्रूलतोत्तुंग—कल्याणकलशस्तनी ।
शुशुभे वेदिका तत्र यज्ञश्रीरिव देहिनी ॥ ८५ ॥
धूमस्तोममिषाद्भूप—किल्बिषं विक्षिपन्निव ।
ज्वालाजिव्होऽत्र जज्वाल ज्वालाजटिलितांबरः ॥ ८६ ॥

द्विजादेशान्नृपो यज्ञ—दीक्षामीक्षाकटाक्षितः ।
स कृतोपनिषद्वेदी वेदीपार्श्वमशिश्रियत् ॥ ८७ ॥
मंत्राहूतत्रयस्त्रिंश—द्दनुजद्वेषिकोटयः ।
जुह्वति स्म बृहद्भानौ वाडवा द्रव्यमंडलं ॥ ८८ ॥
वेदमंत्रानुभावास्ता रुचिना शुचिनाऽमुना ।
पिपिरे सर्पिषां विप्रा—र्पिताः स्फीताः परंपराः ॥ ८९ ॥
तदर्थास्यसुधास्वागात् दाहभीचकिता इव ।
आपतंत्यपि हव्यानि तदा जगृहिरे सुराः । ९० ॥
गायत्सु मधुरं वेदी—ऋचो विप्रेषु हर्षतः ।
चलत्कीलावलिव्याजा न्ननर्त्तेव हुताशनः ॥ ९१ ॥
नृपपुण्यप्रभावेण निःप्रत्यूहं द्विजेश्वराः ।
ययुः क्रतुक्रियापारं भवपारं तपस्विवत् ॥ ९२ ॥
हाटकानां ततः कोटिं क्षोणीं चाक्षीणसंपदं ।
भूदेवेभ्यो नृदेवोऽदा दक्षिणां चारुलक्षणां ॥ ९३ ॥
नृपविश्राणितस्वर्ण—कूटेषु नटतो द्विजान् ।
निरीक्ष्य निर्जरा मेरु—क्रोडक्रीडामदं जहुः ॥ ९४ ॥
इहैष स्वर्णदानेन तथाऽतूतुषदर्थिनः ।
तान्विहायोच्चकैर्दातृ नुपास्थित यथार्थिता ॥ ९५ ॥
रत्नराशिप्रदं केचि त्केचित्पुष्कलनिष्कदं ।
गजदं वाजिदं केचित् **श्रीहम्मीरं** तदास्तुवन् ॥ ९६ ॥
विश्राणनं सृजन् चिंता—कल्पनाकामनातिगं ।
स चिंतामणिकल्पद्रु—कामकुंभेष्वधात् घृणां ॥ ९७ ॥
सितोपलामिलन्मुग्ध—दुग्धादिरसपेशलं ।
राज्ञा तदा मुदा तेने प्राज्यं भोज्यं द्विजन्मनां ॥ ९८ ॥
ततः पुरोहितेनाभि—युक्तो युक्तं पुरोहितं ।
आददे नृपतिः प्रीतो मासमेकं मुनिव्रतं ॥ ९९ ॥

इतश्च शत्रुहृद्भल्ल्यां **दिल्ल्यां** शकमतल्लिका ।
बभू**वाल्लावदीना**ख्यो व्याख्यः शौर्यवतां धुरि ॥ १०० ॥
ज्ञातभूपस्वरूपेण तदा तेन स्वसोदरः ।
**उल्लूखाना**ऽख्यया ख्यातो जगदे जगदेकजित् ॥ १०१ ॥
**रणस्तंभपुरा**धीशो **जैत्रसिंहो**ऽभवत्पुरा ।
प्रददौ स सदा दंडं मम चंडौजसो भयात् ॥ १०२ ॥
**हम्मीर**नामा तत्सूनु रधुनाऽखर्वगर्ववान् ।
दंडं दूरत एवास्तु न वाक्यमपि यच्छति ॥ १०३ ॥
स महौजस्तया शक्यो जेतुं नाभूदियच्चिरं ।
व्रतेस्तिथीतयेदानीं लीलयैव विजीयते ॥ १०४ ॥
तद्गत्वास्या**रणस्तंभ**—तलं देशं विनाशय ।
हते देशे स संस्थातुं सासहिः कति वासरान् ॥ १०५ ॥
इत्यवाप्य प्रभोराज्ञा—**मुल्लूखानो**ऽत्यमर्षणः ।
प्रतस्थेष्टायुतीमाना—श्ववारस्फारविक्रमः ॥ १०६ ॥
रंगत्तुरंगतुंगोर्मि गर्जद्विरदवारिदः ।
शाणोल्लेखितशस्त्रौर्वो रेजेऽस्य बलवारिधिः ॥ १०७ ॥
भुग्नयन् बलभारेण फटाटोपं स वासुकेः ।
प्रवेष्टुमक्षमोभ्यंत—**र्वर्णनाशा**तटे स्थितः १०८ ॥
ज्वालयन्नुद्वसान् ग्रामान् आर्द्रवल्लांश्च चारयन् ।
आसन्नाष्टादशान् घस्रान् सुखेनैषोत्यवाहयत् ॥ १०९ ॥
त्रिशुद्ध्यात्तव्रतत्वेन जोषं तस्थुषि भूपतौ ।
**भीमसिंहो**थ सेनानी—**धर्मसिंह**धियोद्धुरः ॥ ११० ॥
उत्फालसमरोत्ताल—वीरवाराकुलं बलं ।
सहादाय महावीर्य श्चचालारिबलं प्रति ॥ १११ ॥ युग्मं ॥
चाहमानबलेवाद्य—माननिस्वाननिस्वनान् ।
निशम्य व्याकुलीभावं शिबिरे दधिरे शकाः ॥ ११२ ॥

वारणेष्वक्षिपन् केपि प्रखरान् प्रखरा रणे ।
वाहानभ्युद्यतोत्साहा मंक्षु पर्याण्ययन् परे ॥ ११३ ॥
अबध्नन्केपि तूणीरा नगृह्णन् केपि मुद्गरान् ।
अकर्षन् केपि निस्त्रिंशा नवहन्के हि खेटकान् ॥ ११४ ॥
चंडदंडप्रपातेन केचित् वाद्यान्यवीवदन् ।
योद्धून् ज्ञापयितुं योद्धुं सन्निधीभवितुं रयात् ॥ ११५ ॥
धीरत्वं प्रापयन् सैन्या नथोल्लूखाननायकः ।
निर्ययौ स्वयमारुह्य सिंधुरं सिंधुरोजसां ॥ ११६ ॥
वंशाग्रलंबितश्याम—सितचामरकैतवात् ।
लग्नगंगायमीलक्ष्मं अंतरिक्षमजायत ॥ ११७ ॥
शकानां बाहुजानां च मिथोप्यथ निरीक्षणात् ।
अजागरीन्महावैरं दैत्यानां द्युसदामिव ॥ ११८ ॥
पदगः पदगं सादी सादिनं रथिनं रथी ।
निषादिनं निषादीचे—स्वृण्वन् सैनिका मिथः ॥ ११९ ॥
मा भूद्युद्धरसच्छेदो ऽस्माकं तापनतापनात् ।
इतीव प्राक् भटास्तेनु गगने कांडमंडपं ॥ १२० ॥
अंगे लगंतः प्रत्यर्थि–पत्रिणो वीरकुंजरान् ।
सुखयामासुरेणाक्षी—कटाक्षा इव कामिनः ॥ १२१ ॥
वीराः सर्वांगसंलग्नै रिपुक्षिप्तैः शिलीमुखैः ।
रेजु र्जयरमाश्लेष–सुखाद्रोमांचिता इव ॥ १२२ ॥
नीरंध्रप्रसृतैर्बाणैः कल्पिते मेघमंडले ।
युक्तमेवोददीयंत हंसा हृत्सरसोंऽगिनां ॥ १२३ ॥
वैरिवक्त्रसरोजेषु भ्रामयित्वा शिलीमुखान् ।
अपाययन्मनोहत्य तज्जीवितरसान्परे ॥ १२४ ॥
हर्षात्प्रनृत्यतां वीर—कोटीराणां रणांगणे ।
खाड्गाराः खड्गदंडानां कस्यासन्न मनोमुदे ॥ १२५ ॥

क्षणयायावरैः प्राणै श्चिरस्थास्नुयशोर्जनात् ।
भेजिरे भटकोटीरा दिव्यां व्यवहृतिक्रियां ॥ १२६ ॥
उत्प्लुत्योत्प्लुत्य धावंतः सादिशीर्षच्छिदेच्छया ।
जीवंतोपि यियासंत इव स्वर्गं बभुर्भटाः ॥ १२७ ॥
असृजारुणिता रेजु र्वीराणां तरवारयः ।
लोला इव पलादानां रणे कीलालपायिनां ॥ १२८ ॥
लग्नमात्रा अपि भटान् प्रापयंत्यो यमोदरं ।
यमदंष्ट्रनिजं नाम निन्यिरे चरितार्थतां ॥ १२९ ॥
खड्गलूनपतन्मुंड—दंतुरेपि रणांगणे ।
धावंतो नास्खलन्वीराः स्वशौर्यालंबिता इव ॥ १३० ॥
त्वत्कुचोन्नतिहृत्कुंभा कुंभिनोद्य हता रणे ।
इत्येके स्त्रीप्रतीत्यर्थं दंतिदंतानलासिषुः ॥ १३१ ॥
समप्रदेशमापन्नान् यवना वीक्ष्य बाहुजान् ।
अधावंत पुरस्कृत्य वारणान्वीरवारणान् ॥ १३२ ॥
चाहमानैरुरःपूरं पूरिता मर्मभिच्छरैः ।
तस्थुरूर्ध्वंदमा एव द्विट्गजा स्तंभिता इव ॥ १३३ ॥
तदा भटप्रकांडानां युद्धं किमिव वर्ण्यते ।
यदयुध्यत शस्त्राण्य—प्यन्योन्यास्फालनच्छलात् ॥ १३४ ॥
बलोच्छलितधूलीभि र्महाध्वांते प्रसर्पति ।
स्वान्योपलक्षणं जज्ञे केवलं स्वस्वभाषया ॥ १३५ ॥
एवं स्फुरति कीनाश—कोटिहृत्तर्पणे रणे ।
धानापेषं स्म पिंषंति चाहमाना द्विषद्बलं ॥ १३६ ॥
शत्रुभीत्या कबंधांत—र्निविष्टजनरक्षणात् ।
मृता अपि भटाश्चित्रं न शरण्यव्रतं जहुः ॥ १३७ ॥
दृढात्ततापतच्छत्रैः पर्यस्तै र्भटपाणिभिः ।
युयुत्सुरिव भाति स्म तदा समरभूरपि ॥ १३८ ॥

दंतिदंते पदं दत्वा प्रहरंतो निषादिनः ।
चेतांसि पातयामासुः सादिनां रथिनामपि ॥ १३९ ॥
निषादिनो न ते ते न सादिनो न च ते भटाः ।
उरःपूरमपूर्यंत चाहमानशरैर्न ये ॥ १४० ॥
हयान्केचिद्गजान्केचित् शस्त्राण्येके रथान्परे ।
हायं हायं स्म नश्यंति काकनाशं शकायुधाः ॥ १४१ ॥
केचित्तृणं दधुर्दद्भिर्निपेतुः केपि पादयोः ।
त्वद्गौरित्यवदन्केपि जीवं त्रातुं शकब्रुवाः ॥ १४२ ॥
इत्थं भंक्त्वा शतानीकं **भीमसिंहो** न्यवर्त्तत ।
अनुप्रतस्थे प्रच्छन्न **मुल्लूखानो** प्यमर्षणः ॥ १४३ ॥
बाहुजा लुंठितानेक—स्वर्णकोटीरकंकटाः ।
जितकाशितया **भीमं** पश्चात्त्यक्त्वाऽगमन्पुरः ॥ २४४ ॥
अद्रिघट्टान् विशन् **भीम—सिंहो**पि परया मुदा ।
आच्छिद्य स्वीकृतान्युच्चैः शकवाद्यान्यवीवदन् ॥ १४५ ॥
यत्र यत्र स्वकातोद्य—निर्घोषः प्रसरत्परं ।
तत्र तत्र जयं मत्वा गंतव्यं निखिलैरपि ॥ १४६ ॥
इति संकेतनाक्रांता मन्वाना जयमात्मनः ।
तदाभाव्यर्थभावेन मिमिलुर्यवना जवात् ॥ १४७ ॥
मिलितं स्वबलं वीक्ष्य शको योद्धुमढौकत ।
ववले **भीमसिंहो**पि तादृशाः किमु कातराः ॥ १४८ ॥
तत्र कृत्वा महायुद्धं शकान् हत्वा परः शतान् ।
कांडखंडितसर्वांगो **भीमसिंहो** व्यपद्यत ॥ १४९ ॥
जितकाशी शकेंद्रोपि शिबिरं प्राप्य सत्वरं ।
बाहुजेभ्यः पुनर्बिभ्यत् ववले स्वपुरं प्रति ॥ १५० ॥
अथ पूर्णव्रतो **धर्म—सिंह** मत्याद्रिघट्टकान् ।
हित्वा ऽगतं नृपो **भीम—सिंहं** मत्वा तमाह्वयत् ॥ १५१ ॥

स्फुटिते त्वद्दृशौ नूनं यन्नादर्शि शको बली ।
त्वयं पश्चाद्यदस्थासी स्तन्न पुंस्त्वमपि त्वयि ॥ १५२ ॥
साक्रोशमित्युपालभ्या—भिसभ्यं भूपतिर्मुहुः ।
मुष्कयुग्मच्छिदा पूर्वं तद्दृशौ निरचीकसत् ॥ १५३ ॥
पंडोर्विदुरवत्तस्य राज्ञोऽभूदनुजो जयी ।
भोजदेवाभिधः खड्ग—ग्राहीत्यपरनामभाक् ॥ १५४ ॥
धर्मसिंहपदं तस्मै तुष्टोथ प्रददे नृपः ।
तं च निर्वासयन् देशादमुनैव न्यषिध्यत ॥ १५५ ॥
अथापमानात्सोभ्येत्य गुप्तवैरः स्वमंदिरं ।
अधीतीभरते धारां देवीं नृत्यमशिक्षयत् ॥ १५६ ॥
तां च प्रेष्यानिशं नृत्य—च्छलात्पार्थिवपर्षदि ।
वेश्मस्थोपि विदामास स सर्वां नृपतिस्थितिं ॥ १५७ ॥
चिंताचितांगी सान्येद्यु रागता नृपपर्षदः ।
पृष्टांऽधेन जगौ चिंता—कारणं हृद्विदारणं ॥ १५८ ॥
ताताद्य वेधरोगेण मृताऽश्वश्रवणात् बिभोः ।
प्रीत्यै न गीतनृत्यादि चिंता तेनेयमुल्बणा ॥ १५९ ॥
श्रुत्वेत्यसाविमामाह चिंता मास्म कृथा वृथा ।
तं प्राप्तावसरं किंतु पार्थिवं प्रार्थयेरिति ॥ १६० ॥
आसाद्यते विभो धर्म—सिंहश्चेत्स्वपदं पुनः ।
मृतेभ्यो द्विगुणानश्वा न्तदसावानयेत्पुनः ॥ १६१ ॥
ओमिति प्रतिपद्यैषा गता राज्ञे तदूचिषी ।
लोभात्सोप्यंधमाहूया—ध्यकार्षीत्स्वपदे पुनः ॥ १६२ ॥
विवेकदीपो दीप्येत तावद्धृदि सतामपि ।
तृष्णाझंझामरुद्याव न्न भजेदुन्मदिष्णुतां ॥ १६३ ॥
तृष्णावल्लिरियं क्वापि नैवेव प्रतिभासते ।
सद्विवेककुठारोगा न्न वरं यत्र कुंठतां ॥ १६४ ॥

बिंदवोपि स्फुरल्लोभ—मदेनांधंभविष्णवः ।
सपत्नान्सोदरीयंति सपत्नीयंति सोदरान् ॥ १६५ ॥
प्रचिकीर्षन्नथामर्षा दंधो वैरप्रतिक्रियां ।
चक्रे तद्राज्यमुच्छेत्तुं स उपायान्दुरायतान् ॥ १६६ ॥
लोभदृष्टिं नृपं कृत्वा द्रविणादानवर्त्मना ।
स प्रजाः पीडयामास चंडदंडप्रपातनैः ॥ १६७ ॥
गृह्णन्नश्वधनेभ्योऽश्वान् धनवद्भ्यो धनानि च ।
क्रूरकर्मा स लोकानां क्षयकाल इवाभवत् ॥ १६८ ॥
द्रव्यैः संपूरयन्कोशं राज्ञोऽभूत् भृशवल्लभः ।
वेश्यानां च नृपाणां च द्रव्यदो हि सदा प्रियः ॥ १६९ ॥
प्रजादंडेन यत्तेन प्रत्तेने कोशवर्धनं ।
तत्किं स्वस्यैव मांसेन न स्वदेहोपबृंहणं ॥ १७० ॥
अथ स्वपदभोक्तृत्वात् बद्धवैरश्चिरं हृदि ।
स भुक्ताब्दव्ययादाय—शुद्धिं भोजमयाचत ॥ १७१ ॥
क्रुद्धोऽधस्फूर्तिमालोक्य **भोजदेवो**थ सत्वरं ।
गत्वा व्यजिज्ञपत् भूपं मौलिमौलीयितांजलिः ॥ १७२ ॥
देवस्य यदि मे प्राणैः कार्यं गृह्णातु तर्हि तान् ।
न सहे परमंधस्य वाक्यतोदकदर्थनां ॥ १७३ ॥
निजगाद नृपो यस्य मयि भक्तिरनश्वरी ।
न लुप्यतेऽत्र केनापि **धर्मसिंहस्य** शासनं ॥ १७४ ॥
स्वामीव स्वामिनां मान्यः सेवनीयो ऽनुजीविभिः ।
सुस्थिरस्थाणुसत्कारात् अनड्वान् किन्न पूज्यते ॥ १७५ ॥
भाषणेनामुना रौद्र—दृग्वक्त्रालोकनेन च ।
नृपं दुष्टाशयं ज्ञात्वा **भोजदेवः** स शुद्धधीः ॥ १७६ ॥
निरीहचित्तवत् तस्य सर्वस्वमपि दत्तवान् ।
मूलाद्विनष्टे कार्ये हि किं कुर्यात् बलवानपि ॥ १७७ ॥ युग्मं ॥

तथाप्येषोभिजातत्वा दजहन् स्वामिभक्तताम् ।
योगीव परमं ब्रह्म **भोजो** भूपमसेवत ॥ १७८ ॥
अन्येद्युर्नृपतिर्वैज—**नाथ**यात्रामुपागतः ।
दृष्ट्वा पृष्ठस्थितं **भोज** मन्योक्त्येदमभाषत ॥ १७९ ॥
संख्येवात्र पदे पदेपि बहवः क्षुद्रा निकामं खगा
नो कुत्रापि समोस्ति गर्ह्य इतरः काकाद्वराकात्परं ।
क्रोधाविष्ट पटिष्ट घूकनिकरास्याग्रोत्थकोटिक्षतै-
स्त्रुट्यत्पक्षचयोपि यस्तरुतटं नापत्रपः प्रोज्झति ॥ १८० ॥
अनयाऽन्योक्तिकौमुद्या **भोजो**ऽभोजमिवास्तरुक् ।
वेश्मागत्य रहः **पीथ—सिंहं** सोदरमब्रवीत् ॥ १८१ ॥
देवोद्यकल्प उत्पश्य वचनैर्दुर्मनायितः ।
सेवा हेवाकिनोप्यस्मा न्तृणान्यपि मन्यते ॥ १८२ ॥
अवाप्तामियसाम्राज्य—मदमोहितमानसाः ।
यदि वा पार्थिवा नैव क्वचिदेकांतवत्सलाः ॥ १८३ ॥
यात्राव्याजेन तद्यामो दिनानि कतिचित् बहिः ।
कालक्षेपोऽशुभे श्रेयान् नीतिविद्भि र्जगे यतः ॥ १८४ ॥
संमंत्र्य सोदरेणैवं भूपं गत्वा व्यजिज्ञपत् ।
**काश्यां** व्रजामि यात्रायै यद्यादिशति भूपतिः ॥ १८५ ॥
जगाद भूपति र्यासि परतः परतो न किं ।
विना भवंतमप्येवं पुरं संशोभते पुरा ॥ १८६ ॥
इत्याकुष्टोपि कौलिन्या क्ष्मामिव क्षमापतौ ।
बिभ्राणः प्रचचालैषो ऽनुकाशीं सपरिच्छदः ॥ १८७ ॥
तस्मिन् गते क्षितिपतिः प्रसरत्प्रमोद-
हृद्दंडनायकपदे **रतिपालवीरं** ।
युक्त्याभिषिच्य जगदेकहितत्रिवर्ग-
संसर्गतोतिसरसान् दिवसाननैषीत् ॥ १८८ ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीरांके हम्मीरदेवदिग्विजयवर्णनोनाम नवमः सर्गः ॥

---

## ॥ अथ दशमः सर्गः ॥

धरणीरमणापमानना दथ भोजः सशिरोहमागतः ।
परिभाव्य मुहुः स्वदुर्दशा मभिमानेन हृदीत्यचिंतयत् ॥ १ ॥
वितताम विनापि कारणं नरनाथो मम यां तिरस्क्रियां ।
विदधे यदि तत्प्रतिक्रियां न तदा केव मनस्विनां गतिः ॥ २ ॥
गुणवानपि वक्रतां गतः पुरुषश्चाप इवातिभीषणः ।
स शरैरिव दुर्जनैर्यतो गुणमुक्तैस्तनुतेऽतिपीडनं ॥ ३ ॥
अपमानपरेपि यो नरे शममेव प्रयतोऽवलंबते ।
अपि शूकशिखा ततो वरं व्यथयत्यंघ्रिमसौ तदाऽहता ॥ ४ ॥
अपकारपरान्सहोदरान् अपि हन्यात्किल नास्ति पातकं ।
अभिमानवतां नयोन्मुखैः स्थितिरेषा जगदे सनातनी ॥ ५ ॥
सुहृदां यदि वा विरोधिनां क्रिययैव क्रियते परीक्षणं ।
सुहृदप्यपकारकृत् द्विष न्नुपकारी तु सुहृद्विषन्नपि ॥ ६ ॥
सहतेऽरिकृतं पराभवं ननु यः क्लीबमना मनागपि ।
जनिरेव जनिष्ट तस्य मा जननी यौवनगर्वगर्हिणी ॥ ७ ॥
परिपृच्छ्य ततः सहोदरं **पिथमं** सन्मतिवासमंदिरं ।
अगमल्लघु**योगिनीपुरं** यवनानां समगच्छदीश्वरं ॥ ८ ॥
तादृकुलीनोपि तदा स **भोज**—**देवो**ऽधुनाऽहीकृतवान्यदेवं ।
तन्म्लेंछभूजृंभितमेव तस्मात् सतां न तद्धूरपि वासयोग्या ॥ ९ ॥
तत्समागमनहर्षवशात्मा **ऽल्लावदीन**नृपतिः स ततोऽस्मै ।
वस्त्रनिर्वपणपूर्वमयच्छ न्मुद्गलेशनगरीं **जगरां** तां ॥ १० ॥
तत्र चित्ररुचिभाजि स **भोजः** सोदरं स्वमदरं परिमुच्य ।
स्राग् स्वयं पुनरुपेत्य च **दिल्लीं** सेवतेस्म शकनायकमेव ॥ ११ ॥

प्रौढमानमनुघस्रममानैः कांतकांचनहयादिकदानैः ।
तं तथापुषदसावपि भूपो जायतेस्म स यथा निज एव ॥ १२ ॥
तं विपक्षमपि यत्तदकार्षीत् स्राक् शकस्तदुचितोचितमेव ।
अन्यथा कथमिवारिजयेऽसौ जागदीति निरपायमुपायं ॥ १३ ॥
आत्मनीनमधिगम्य तमुच्चै रन्यदेति यवनेंदुरपृच्छत् ।
ब्रूहि **भोज** कथमेष **हमीरो** जीयते युधि मया द्रुतमेव ॥ १४ ॥
सत्यमेव यदि पृच्छसि कार्य स्तर्हि नो मम गिरीश्वर कोपः ।
इत्युदीर्य गिरमाहितभारा माततान गतभीरथ **भोजः** ॥ १५ ॥
शैथिल्यं कुंतलेषु प्रसभमुपनयन् पीडयन्मध्यदेशं
स्थानभ्रष्टां च कांचीं विदधदुपचयन् काममंगेषु लीलां ।
यो भूमेश्चंचलाक्ष्याः पतिरिव तनुते भाग्यसौभाग्यलक्ष्मीं
सः **श्रीहम्मीरवीरः** समरभुवि कथं जीयते लीलयैव ॥ १६ ॥
दीपः पर्यायशेषः स्फुरदरुणमणीदीप्तिराकारशेषः
सूरोप्याख्यानशेषः प्रलयशिखिशिखाश्रेणिराभासशेषः ।
यस्य प्रौढप्रतापे प्रसरति नितमां क्षोणिपीठे क्षितींदोः
सः **श्रीहम्मीरवीरः** समरभुवि कथं जीयते लीलयैव ॥ १७ ॥
यस्मिन् शश्वन्निवासा ऋतव इव गुणा हायने षट् क्षितींदौ
श्रित्वा तिस्रोपि तस्थुः पुरुषमिव गुणा यं परं शक्तयोपि ।
अंगैः स्फीता यथोक्तैः प्रथयति पटुतां यस्य विद्येव सेना
सः **श्रीहम्मीरवीरः** समरभुवि कथं जीयते लीलयैव ॥ १८ ॥
यं व्यालोक्यापि खड्गग्रहणपटुकरं बिभ्यतां पार्थिवानां
निश्वासो नासिदंडो न च कुलममलं नापि शौर्यं न धैर्यं ।
किंचेकं तूर्णमेवापसरणमयते ध्यानमार्गेऽध्वगत्वं
सः **श्रीहम्मीरवीरः** समरभुवि कथं जीयते लीलयैव ॥ १९ ॥
अश्रांतस्राविदानोच्छलितपरिमलाकृष्टगुंजद्विरेफ-
श्रेणीद्विट्टुंभिकुंभस्थलदलनकलाकेलिकंडूलहस्तः ।

सोदर्यो यस्य वीरव्रजमुकुटमणिर्वीरमो विश्वजेता
सः श्रीहम्मीरवीरः समरभुवि कथं जीयते लीलयैव ॥ २० ॥
त्वङ्क्रातुलुंठितार्थोऽर्थननिबिडमते र्मानमुन्मूलयंतो
निःशंकं मेनिरे त्वां स्फुटसुभटतया ये तृणायापि नैव ।
औदीच्यास्तेपि सेवां विदधति महिमासाहिमुख्या यदीयां
सः श्रीहम्मीरवीरः समरभुवि कथं जीयते लीलयैव ॥ २१ ॥
देशो यस्यानुघस्रं कृतसुकृतजनाचारचारुप्रदेशो
दुर्गं दुर्ग्राह्यमेवाहितधरणिभुजां श्रेणिभिश्चेतसापि ।
अन्योन्यस्पर्धिवीर्यार्जितशुचियशसोप्याहवे वीरवाराः
सः श्रीहम्मीरवीरः समरभुवि कथं जीयते लीलयैव ॥ २२ ॥
अंगो नांगानि धत्ते कलयति न पुनर्युद्धलिंगं कलिंगः
काश्मीरः स्मेरमास्यं न वहति तनुते शौर्यसंगं न वंगः ।
गार्जि नो गुर्जरेंद्रः प्रथयति पृथुधीर्यस्य कौक्षेयकाग्रे
सः श्रीहम्मीरवीरः समरभुवि कथं जीयते लीलयैव ॥ २३ ॥
यस्याग्रे नैव किंचिद्र———पतिर्भीतिशुष्कोष्ठकंठो
यं नाथत्यश्वनाथः प्रथितकृपणधीर्जीवरक्षामभीक्ष्णं ।
आत्मक्षेमाय मंत्रं जपति गजपतिर्यत्कटाक्षेण दृष्टः
सः श्रीहम्मीरवीरः समरभुवि कथं जीयते लीलयैव ॥ २४ ॥
शूरः कश्चन कश्चनापि मतिमान्दाक्षिण्यवान्कश्चन
प्राज्ञः कश्चन कश्चनापि सुकृती दाता पुनः कश्चन ।
इत्येकैकगुणप्ररूढमहिमा जागर्ति भूयान् जनः
सर्वैः श्रेष्ठगुणैरधिष्ठिततनुर्हम्मीरवीरः परं ॥ २५ ॥
एतस्याधिपतेस्तथोन्नतकरांभोजप्रसादोदयात्
दोष्मंतः श्रियमाप्नुवंति तदिदं मंस्था स्म मात्यद्भुतं ।
किं चिंतामणयः स्फुरंति न नखाः किं कामधेनो स्तना
नांगुल्यस्तलमस्य वा किसलयाः कल्पद्रुमाणां न किं ॥ २६ ॥

संग्रामेस्य तुरंगनिष्ठुरखुरोत्खातैरजोभिः क्षणात्
पंकत्वं गमिते मिलद्रिपुशिरश्छेदोच्छलच्छोणितैः ।
व्योम्नो मध्यपथे रथस्खलनतामाशंकमानोर्यमा
ऽवाचीं कर्ह्यपि चंचरीति भगवान् कर्ह्यप्युदीचीमपि ॥ २७ ॥
दीपस्येव समीरणः सरसिजश्रेणेरिवांभोधरः
सूर्यस्येव दिनात्ययो यतिवरस्येवैणदृक्संगमः ।
देहस्येव गदोदयो गुणगणस्येवातिलोभाश्रयः
तद्राज्यस्य विनाशहेतुरधुनैकोधः परं दीव्यति ॥ २८ ॥
तदमुं जिगीषसि यदीश सर्वथा त्वरया तदा प्रवितर प्रयाणकं ।
यदमुष्य नीवृदधुना न वोल्लसत् सुमनप्ररोहहरितीकृतावनिः ॥ २९ ॥
ननु तेषु मंक्ष्वपि कथावशेषतां गमितेषु भूप भवदीयसैनिकैः ।
जहति प्रजा अमुमिता निराशतां गतनेत्रचंडतरदंडनात्पुरा ॥ ३० ॥
आचम्येत्थं तस्य वाचं शकाना मीशो **ग्युलूखान**माहूय सद्यः ।
दत्वा लक्षं सादिनः सादितारीन् देशं येनाचीचलच्चाहमानं ॥ ३१ ॥
**उलूखानः** पूरवत्सोथ वार्धे र्वृत्तिं शत्रून् प्रापयन् वैतसीं स्राक् ।
क्षत्रोत्तंसान्मन्यमानस्तृणांशान् हिंदूवाटं प्राप तीव्रप्रतापः ॥ ३२ ॥
चैरथोक्तारिसमागमोसौ **हम्मीरदेवः** क्षितिपालमौलिः ।
न्यपातयत्पर्षदि हर्षहेला—मयेषु वीरेषु दृशं सभावां ॥ ३३ ॥
राज्ञश्चेष्टासौष्टवं तद्विभाव्य हृष्यच्चित्ता वीरमाद्या अथाष्टौ ।
वीराः स्मेरास्यांबुजाम्लेछभूभृत्सेनामेनामन्वधावंत वेगात् ॥ ३४ ॥
दृष्ट्वा म्लेछान्मारितान्मत्प्रकाशे सूरीन् भूवन् क्वाप्यमी मावसन्नाः ।
इत्थं ध्यात्वेवास भास्वान् प्रतीची—भूभृच्चूलाचुंबिबिंबस्तदानीं ॥ ३५ ॥
जीवं लात्वा द्राक् शका यात रेरे प्राप्ता ह्येते बाहुजास्तीव्रकोपाः ।
व्याचक्षाणानामितीव प्रकामं व्यापे विश्वं कूजितैर्व्योमगानां ॥ ३६ ॥
गलद्विचारोल्लसितानि भास्वत् गवां विनाशे रुचिरद्युतीनि ।
तमांसि संगंतुमिव स्वबंधून् शकान्प्रसस्रुर्भुवनेभितोपि ॥ ३७ ॥

**श्रीवीरमेंद्रो** दिशि माघवत्यां दिशि प्रतीच्यां **महिमाख्य**साहिः ।
**श्रीजाजदेवो** दिशि दक्षिणस्यां दिश्युत्तरस्यामपि **गर्भरूकः** ॥ ३८ ॥
आग्नेयभागे **रतिपालवीरः** समीरभागे **तिचरः** शकेशः ।
ईशानभागे **रणमल्लमल्लः श्रीवैचरो** नैर्ऋतनामभागे ॥ ३९ ॥
इत्थं यथाशक्तिकृतप्रतिज्ञा वीरा रणोत्साहलसच्छरीराः ।
हम्मीर हम्मीर इति ब्रुवाणाः शकाधिपीये शिबिरे निपेतुः ॥ ४० ॥
द्रुतमेव केपि परिखामपूपुरन् अदहन्परे दलिकदुर्गमुच्छ्रितं ।
न्यविशंत चांतरितरेतिगतः पटवासरज्जुनिचयान्परेऽलुनन् ॥ ४१ ॥
धीरं धीरं यातरे माऽ कुलत्वं चापाग्रे नो बाहुजाः संतु केऽमी ।
दूर्वालावं मंक्ष्वपीमान् लुनीमः शब्दाद्वैतं जातमेवं शकानां ॥ ४२ ॥
केचित्कृपाणाँल्लगुडाँश्च केचि चापान्परे केचन मुद्गराँश्च ।
आक्रम्यमाणा नृपवीरवीरै स्तदाशकेंद्रा जगृहुर्जवेन ॥ ४३ ॥
श्रुत्वाखिलास्वपि ककुप्सु मृदंगनादान्
आतंककंपितहृदो यवना जवेन ।
संदेहमूर्जितमिताः किल जीवितव्ये
कर्त्तः किमद्य भवितेत्यवदन्सदैन्यं ॥ ४४ ॥
श्रावं श्रावं सिंहनादान् भटानां भीताश्चक्रुः सारसीं यामिभेंद्राः ।
तामाकर्ण्य त्रासवंतोतिजीवं लात्वा कापि कापि नेशुस्तुरंगाः ॥ ४५ ॥
कराग्रजाग्रन्निशितासिदंड—दीप्रप्रभाप्रज्वलितप्रदीपैः ।
उत्सारितध्वांतचया वितेनु वीरा यथेच्छं रणरंगलीलां ॥ ४६ ॥
निष्कासयामास रणाय यो यः शकः क्रुधांधो युधि यद्यदंगं ।
तत्तल्लुनानाः किल तस्य तस्य न **चाहमानः** कुतुकाय कस्य ॥ ४७ ।
भीता जीवाघातमाकर्ण्य सद्यो म्लेछा यावद्दिक्षु चक्षुः क्षिपंति ।
बाणास्तावत्प्रेरिताश्चाहमानै विंध्यंति स्मैवाशु मर्माणि तेषां ॥ ४८ ॥
चाहमानभटपाणिपंकजो-—न्मुक्तमार्गणगणैश्चितीकृताः ।
रेजिरे करिवरा रणांगणे पर्वता इव नवोल्लसच्छदाः ॥ ४९ ॥

सुभटप्रकांडघनकांडवर्षणा—तिकदर्थनेन भृशविक्लवाशयाः ।
यवना युगांतपवना इवास्फलन्नितरां मिथोपि समरांगणे तदा ॥ ५० ॥
शस्त्राशस्त्रि शराशरि कुंताकुंति गदागदि दंडादंडि ।
दंतादंति भुजाभुजि वीराः केपि परे विदधू रणलीलां ॥ ५१ ॥
खड्गक्षतारिकरिकुंभमंडलान् मुक्ताफलानि निपतंति रेजिरे ।
स्वेदोदबिंदुनिवहा जयश्रियां वीरोपगूहनसमुद्भवा इव ॥ ५२ ॥
विगतद्युतीकृतपराननांबुजाः परिखंडिताश्वतरवीचिसंचयाः ।
सुभटा गजा इव शकेशवाहिनीं सुतरां **हमीर**नृपतेर्जगाहिरे ॥ ५३ ॥
शंके शकानां रुधिरापगाभि र्वार्धिस्तदा रक्तमयो व्यधायि ।
तदंभसि स्नातविनिर्गतोसौ धत्तेऽरुणत्वं कथमन्यथेंदुः ॥ ५४ ॥
क्वचिच्छिरोभिः क्वचिदंघ्रिपद्मैः क्वचित्करैः क्वापिच बाहुदंडैः ।
आरेचिता संगरभूरराज न्निर्माणशालेव जगद्विधातुः ॥ ५५ ॥
रंगत्तुरंगोरुतरंगवीर—रसांबुपूर्णे रणपल्वलेऽस्मिन् ।
सितांबुजानीव विरेजुरात—पत्राणि कौक्षेयकपातितानि ॥ ५६ ॥
स्फूर्जद्वीर्यैर्बाहुजैर्दत्तदैन्यं दृष्ट्वा सैन्यं सर्वथामात्मनीनं ।
कांडैर्दंडैस्ताड्यमानोपि जीवं न्नुल्लूखानो नेशिवान् भाग्ययोगात् ॥ ५७ ॥
केचिन्मम्लुः केपि जग्लुः परेच त्रेसुर्नेशुः केचन म्लेछपाशाः ।
हाहारावं चक्रिरे केपि केचि ज्जीवं त्रातुं प्राविशन् गुप्तदेशं ॥ ५८ ॥
जितकाशिनोथ युधि **वीरमादयः** सुभटा वितीर्णरिपुराजिसंकटाः ।
रणशोधने च शकसैन्यलुंठने त्वरयांबभूवुरभितोपि सैनिकान् ॥ ५९ ॥
तुरगान्निपातिततुरंगिणः शिली—मुखलूनकेतुनिचयान् रथोच्चयान् ।
करिणः पलायितनिषादिनो वसू—न्यमितानि तत्र सुभटा ललुस्तमां ॥६०॥
तत्रैणनेत्रा यवनाधिपानां बध्वात्यमर्षाद्रतिपालवीरः ।
व्यचिक्रयत् ख्यातिकृते क्षितींदो स्तक्रं प्रतिग्राम ममूभिरेषः ॥ ६१ ॥
यवनाधिपसैन्यसागरं प्रविलोड्येति भटा मुकुंदवत् ।
परिरब्धजयश्रियो नृपं जयवार्त्ताभिरवर्धयन्नथ ॥ ६२ ॥

अथ क्षितीशो रतिपालशौर्यं अतीभमाकर्ण्य लसत्प्रमोदः ।
मत्तो ममायं गज इत्यमुष्य पादेऽक्षिपत्कांचनशृंखलानि ॥ ६३ ॥
परेष्वपि प्रीतिकृदंशुकादि दत्वा विसृष्टेष्वथ मानपूर्वं ।
नृपेण पृष्टा यवनास्तथैव स्थिताः स्थिते कारणमूचुरेवं ॥ ६४ ॥
अस्मासु जीवत्सु यदीह **भोज**—देवः कृतघ्नो **जगरां** भुनक्ति ।
वीरव्रतं तर्हि विलीनमेव संबीभवन् मा कतरो नरेश ॥ ६५ ॥
सहामहे यच्च दिनांस्तमेता—वतोऽत्र हेतुस्तव बंधुतैव ।
त्वद्देशमन्वानयतो ऽधुनाऽरि—बलं विभो का बत बंधुता ऽस्य ॥ ६६ ॥
तद्यात्रायै गंतुमेते नरेश प्रादिश्यंतां तेष्विति प्रोक्तवत्सु ।
भद्रा भद्रेण त्वरध्वं त्वरध्वं स्फीतप्रीतिस्तान्नृपो व्याजहार ॥ ६७ ॥
जयश्रियो मोहनमंत्रवत्त मादेशमासाद्य नृपस्य तेऽथ ।
भंक्त्वा पुरीं तां विनियम्य भोजबंधुं समागुः सकुटुंबमेव ॥ ६८ ॥
इतश्च तस्मात्समराद्विनष्टः खानः स उल्लूपपदः कथंचित् ।
समेत्य **दिल्लीं** निजगाद राज्ञे तच्चाहमानप्रकृतं समस्तं ॥ ६९ ॥
पलायितः कातरवद्भवान् किं ततः क्षितीशे गदतीति सोवक् ।
पलायनं चेन्नृप नाकरिष्यं कौतस्तुतस्तर्हि तवामिलिष्यं ॥ ७० ॥
निःशेषमिति तदुक्त्वा विरराम न यावदेव शकबंधुः ।
मन्यूत्पीडग्रहिलः समेत्य तावत्स **भोजदेवो**पि ॥ ७१ ॥
विस्तार्यसिचयमग्रे गतः सरस्तत्तदद्भुतमतीनां ।
कटुकं विरटन् तदुपरि सुतरां विलुलोठ भूतचांत इव ॥ ७२ ॥
किमरे किमरे जातं पृष्टः शकभूभुजा जगादैषः ।
मरणावध्यपि स्वामि न्न विस्मरेद्यत्तदद्य संपन्नं ॥ ७३ ॥
**हम्मीर**वीरनुन्नो **महिमासाहिः** स वीरकोटीरः ।
हत्वा **जगरां** बध्वा सपरिच्छदमेव सोदरमयासीत् ॥ ७४ ॥
लाभायततां पुंसामभाग्यतः क्वापि मूलनाशः स्यात् ।
अद्यप्रभृति जनोक्ति र्मदुदाहरणा प्रववृतेऽसौ ॥ ७५ ॥

तत्किं करोमि कं वा श्रयामि यामि क्व वा किमु वदामि ।
हृदयं वातांदोलित—तूलतुलां कलयतीदमनुवेलं ॥ ७६ ॥
लुठितोसि किमिह सिचयो—परीति पृष्टोमुना पुनः सोवक् ।
जानासि किं न निखिला मिलां जितां चाहमानेन ॥ ७७ ॥
रणभंगाकुलसोदर—परिदेवनदलिकसंकुले नितमां ।
नृपहृदि कोपहुताशे घृताहुतिर्भोजभणितिरभूत् ॥ ७८ ॥
तद्वाक्यश्रवणादथप्रसृमरक्रोधप्रकंपाधरो
वाहुष्टंभनमासनं प्रतिलवं सव्यापसव्ये नयन् ।
प्रत्युत्क्षिप्य शिरोवतंसमवनीपीठे तथास्फालयन्
चक्रे काव्यपरंपरामिति तदा म्लेंछावनीवल्लभः ॥ ७९ ॥
रेरे **भोज** विमुंच शोकमखिलं लज्जाकरं दोष्मतां
हे भ्रातस्ततकीर्तिकेलिसदनं स्थैर्यं त्वमप्याश्रय ।
दुःखेनैव सह क्षणेन युवयोरेतस्य सोहं बली
हम्मीरस्य समूलकाषमधुना मानं कषाम्युच्चकैः ॥ ८० ॥
निद्रामुद्रणसांद्रनेत्रयुगुलः सिंहः समुत्थापितो
निर्मोकोज्झनतीव्रकोपफणिनो लातुं मणिः कांक्षितः ।
सर्वांगं प्रचिकीर्षितं च हुतभुक्कीलापरिष्वंजनं
हम्मीरेण बताद्य कोपितवता म्लेंछावनीवल्लभं ॥ ८१ ॥
कः कंठीरवकंठकेसरसटां स्प्रष्टुं पदेनेहते
कुंताग्रेण शितेन कश्च नयने कंडूयितुं कांक्षति ।
कश्चाभीप्सति भोगिवक्त्रकुहरे मातुं च दंतावलीं
को वा कोपयितुं नु वांछति कुधीर**ल्लावदीनं** प्रभुं ॥ ८२॥
देशो यद्यस्ति चंचत्तरसुकृतजनोद्यत्प्रदेशस्ततः किं
दुर्गं यद्यस्ति दुर्गं प्रतिभटनिकरैः कोटिभिर्वा ततः किं ।
वीराश्चेत्संख्यनेके समरभुवि महावीर्यवंतस्ततः किं
कोपि**न्यल्लावदीने** सकलमपि भजेद्व्यर्थतामेव सद्यः ॥ ८३ ॥

तावद्गर्जंतु जाग्रन्मदभरतरलाश्वंचला **वीरमाद्या**
वीराः प्रत्यर्थिवीरावलिदलनकलाकेलिकंडूलहस्ताः ।
ज्यारावैर्विस्फुरद्भिर्जगदखिलमपि प्रापयन्नेडभावं
**यावन्नाल्लावदीनः** किरति शरभरं प्रावृषेण्यच्छटावत् ॥ ८४ ॥
पाताले प्रविशत्यसौ यदि तदा नूनं खनित्वा ददे
स्वर्गं चेत्समुपैति सैंद्रमपि तं संपातयाम्यग्रतः ।
दृग्भ्यां चेद्ददृशे न संगरभरे मद्दोर्द्वयीविक्रमः
कर्णाभ्यामपि शुश्रुवे किममुना तर्हि क्षितौ न क्वचित् ॥ ८५ ॥
रेरे **हम्मीर** वीरस्त्वमसि परमसौ सांप्रतं वीरता ते
नूनं व्यक्तीभवित्री मम नयनपथे प्राप्तपांथव्रतस्य ।
भ्राम्यत्युच्चैर्वनांते मदमलिनकपोलस्थलो हंत दंती
तावद्यावन्मृगेंद्रः पतति न पुरतो जृंभया व्यात्तवक्त्रः ॥ ८६ ॥
आसारः कमलाकरे मृगगणे सिंहः कुठारस्तरौ
भास्वान्संतमसे पविः क्षितिधरे दावानलः कानने ।
यत्कर्म प्रतनोति संगरभरं प्राप्तस्तदेवाधुना
कुर्वेहं भटसंकुलेपि निखिले श्रीचाहमाने कुले ॥ ८७ ॥
तत्कालं यवनावनीपतिरथ प्रोल्लासिमानान् स्फुरन्
मानान्स्वेन शयाप्सुजेन लिखितान् विश्राण्य संप्रेषितैः ।
देशेभ्यो निखिलेभ्य एव निखिलान् दूतैः प्रभूतैरसौ
वीरानाव्हयतिस्म विस्मयकरप्रोद्दामदोर्विक्रमान् ॥ ८८ ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीरांके अल्लावदीनामर्षणोनाम दशमः सर्गः समाप्तः ॥

---

## अथैकादशः सर्गः

**अंगस्तिलंगो मगधो मसूरः कलिंगवंगौ भटमेदपाटौ ।**
**पंचाल बंगाल थमीम भिल्ल नेपाल डाहाल हिमाद्रिमध्याः ॥ १ ॥**

इत्यादयोऽन्योन्यमहंयुताभिः संमेलितप्रौढपताकिनीकाः ।
शकाधिराजा निखिला अपीमां पुरीमथायुर्यवनेश्वरस्य ॥२॥ युग्मं ॥
वीरैर्जयश्रीकरपीडनाय लुंठाकवृंदैरपि लुंठनाय ।
व्रजद्भिरन्यैः कुतुकेक्षणाय शून्यीभवंतिस्म दिशां प्रदेशाः ॥ ३ ॥
याते मयीदं बलभारभुग्नां कः सासहिर्धर्त्तुमिमां धरित्रीं ।
इतीव शेषाहिरमुष्य सैन्ये न केवलं गंतुमना बभूव ॥ ४ ॥
साश्वद्विपेष्वेषु चलत्सु भूभृ—न्निदेशमात्रेण दिशो दशापि ।
दिग्दंतिनो दंतिषु यद्यतिष्ठन् भास्वद्रथाश्वाश्च तुरंगमेषु ॥ ५ ॥
पादातिकानां करिणां रथानां चया हयानां च तथा प्रसस्रुः ।
तलं तिलस्यापि तुषानुमेयं रिक्तं यथा न क्वचिदास भूमेः ॥ ६ ॥
ततोऽनुजौ स्फारभुजौ शकाना मधीश **उल्लूनिसुरत्तखानौ** ।
इदं महावीर्यि वितीर्य सैन्यं अचीचलत् जेतुममुं हमीरं ॥ ७ ॥
शकेश्वरोद्यापि समस्तिपश्चात् सृजन्निति क्षत्रकुलेषु भीतिं ।
शरीरमात्रः स्वयमत्र चास्थात् अहो शकानां नृपनीतिवित्त्वं ॥ ८ ॥
लब्ध्वा सहायं **निसुरत्तखानं** ज्वलन् क्रुधोल्लूपपदः सखानः ।
इयेष मूलादपि वैरिवंशान् दग्धुं बृहद्भानुरिवाहिकांतं ॥ ९ ॥
बलं किलैतत् व्रजतिस्म यत्र यत्रैष शेषोपि च तत्र तत्र ॥
महीतलध्वंसभिया प्रसर्पन्नासीच्छकाज्ञाप्रविलोपिधैर्यः ॥ १० ॥
पद्भिः पतद्भिर्ध्रुवमस्मदीयैः शेषो धरां धर्त्तुमसौ न शक्तः ।
तन्वीं भुवीतीव वितेनुरेते गतिं तुरंगा गगने तु गुर्वीं ॥ ११ ॥
धावद्धयालीपदपादजात—रेणूत्करैः पूरिषताब्धयो मा ।
हेतोरिवास्मात् द्विरदा असिंचन् मदांबुपूरैरभितोपि भूमिं ॥ १२ ॥
सहाभविष्याम पुरा वयं चेत् किं बाहुजास्तर्हि पराभविष्यन् ।
इत्यूचुषः कांश्चिदुपेतपूर्वानाद्यापि किंचित् गतमित्यवोचन् ॥ १३ ॥
गजाः कियंतस्तुरगाः कियंतो रथाः कियंतः कति वा भटाश्च ।
जनैर्जनानामिति वादितानां संख्या न हीत्युत्तरमेकमेव ॥ १४ ॥

सर्वांगसन्नेह निवेशलक्ष्य चक्षुर्द्वयीमात्रतयातिरौद्राः ।
प्रधावमानाः सुभटा विरेजु र्लोहस्य गोला इव विस्फुरंतः ॥ १५ ॥
क्षणात् शकानां कटकैर्निपीता—शेषांभसामध्वनि निम्नगानां ।
गभीरमप्यास तलं सुदर्शं जडात्मनां वा न दुरापमंतं ॥ १६ ॥
भुक्तिं व्यधाद्यत्र न तत्र सुप्तिं यत्रातनीतां न च तां च तत्र ।
अथेत्यविश्रांततरैः प्रयाणै र्लक्षीचकारैष विपक्षसीमां ॥ १७ ॥
सैन्यैः शकानां प्रसृतैः समंतात् देशः कृतः क्लेशवशंवदः सः ।
निर्नाथवन्मंक्षु पलाय्य जीव—ग्राहं प्रयातिस्म यतस्ततोपि ॥ १८ ॥
ततोद्रिघट्टान् प्रसमीक्ष्य पूर्वा—नुभूतभीसंस्मरणाद्भयालुः ।
आहूय खानो निसुरत्तखानं सहोदरं सुंदरमित्युवाच ॥ १९ ॥
भ्रातः प्रवेशे विषमा गिरींद्रा भटास्तदीयाः प्रकटौजसश्च ।
तदद्रिघट्टान् विशतो बलस्य भवन्नपायः खलु नो हिताय ॥ २० ॥
तद्बाहुजान् संधिमिषेण विप्र—तार्यादिघट्टेषु सुखं विशामः ।
उपायसाध्ये खलु कार्यबंधे न विक्रमं नीतिविदः स्तुवंति ॥ २१ ॥
मते मतेऽत्रानुमतेमुनापि **श्रीमोल्हणं** प्राग् विधिनानुशास्य ।
दिदेश संधानकृते हमीर—(राज्ञः स)मीपे कितवः प्रयातु ॥ २२ ॥
स्वयं च सन्नह्य बलान्यमुष्मि न्नेवं छलेनाविशदंतरद्रि ।
मध्ये प्रविष्टः सुखसाध्य एवा—स्माकं भटैरित्थमुपेक्षितश्च ॥ २३ ॥
मुख्यां प्रतोल्यामनुजस्य शस्य श्रीमंडपे दुर्गवरे निजं च ।
सरश्च जैत्रं परितः परेषा मतिष्ठिपत्सैन्यमपास्तदैन्यः ॥ २४ ॥
स मोल्हणः प्राप्य कथंचिदंत स्ततः प्रवेशो नृपशासनेन ।
दृष्ट्वा **रणस्तंभपुरं** तदुच्चै—र्बभूव चित्रार्पितनेत्रपद्मः ॥ २५ ॥
वप्रे यदीये स्फटिकोद्भवानां माला लसंत्यः कपिशीर्षकाणां ।
दिगंगनानां वदनश्रियं स्वां विलोकितुं दर्पणभावमीयुः ॥ २६ ॥
प्रदेशयोरप्युभयोर्मिलद्भि र्माणिक्यसोपानमयूखजालैः ।
विलासवापीषु पयश्चकासां—बभूव यत्रेव निबद्धसेतुः ॥ २७ ॥

यस्मिन्मृगाक्षीवदनेंदुभाभि र्विसारिणीभिर्विजितः शशांकः ।
खेयांबुपूरप्रतिबिंबदंभात् किमेष दुःखात्प्रददौ न झंपां ॥ २८ ॥
त्यागाय भोगाय विवेकभाजा जनेन शश्वद्विधृता कराब्जे ।
लेभेऽवकाशं चपलापि लक्ष्मीः पलायनं कर्त्तुमहो न यत्र ॥ २९ ॥
मरुत्तरंगप्रविकंपितायां ध्वजावलौ इभ्यतमालयेषु ।
लीनेव यत्रास्थिरता न जातु रमासु रामासु समुल्ललास ॥ ३० ॥
जालैर्मणीनामधिकुट्टिमोद्य—द्भासैः समंतात्प्रसरन्मयूखैः ।
प्रासादशृंगेषु दधौधनावली निन्येवकेशित्वमुषासु यत्र ॥ ३१ ॥
यत्रोज्वलत्स्फाटिकभित्तिभागे ऽप्येणीदृशो दृष्टनिजांगलक्ष्म्यः ।
मांगल्यहेतो र्नवरं निरीक्षां—चक्रुर्विभाते मुकुरेषु वक्त्रं ॥ ३२ ॥
यत्रेभदंतोद्भवचित्रजाल—वातायनस्थाः कृतदिव्यभूषाः ।
विनिद्रपाथोजदृशो विमान मधिश्रिता देव्य इव स्म भांति ॥ ३३ ॥
नृपालयोत्तंसितशातकुंभ—कुंभप्रभा यत्र समुल्लसंत्यः ।
अभ्युन्नतासन्नपयोधराणां वर्षासु संपासमतामगच्छन् ॥ ३४ ॥
अनारतं कौमुदमादधानाः संसेव्यमाना द्विजराजिभिश्च ।
मिष्टैः पयोभिः प्रतिभासमाना विभांति यागा इव यत्तडागाः ॥ ३५ ॥
वातायनाः किं किममी विमाना जनः समं तेष्विति संशयानः ।
अबोधि यस्मिन् मिथुनैस्तु तत्स्थै रेवाऽनिमेषैश्च निमेषिभिश्च ॥ ३६ ॥
विलासिवेश्मोदरदह्यमान—सुगंधिधूपोत्थितधूमसंगात् ।
व्यधायि यस्मिन्नपि किन्नरीभि रयत्नजन्या पटवासयुक्तिः ॥ ३७ ॥
मदृद्धिसंस्पार्धिविवर्द्धिकीर्त्ति परं पुरं किंचिदिहास्ति नो वा ।
इतीव यद्भूध्रशिरोधिरूह्य भुवं दृशा पश्यति गोपुरेण ॥ ३८ ॥
निवासवद्भिः सुमनोभिरेभि र्विमानतास्मासु कृतेति दुःखात् ।
नैवास्वपन्निश्यपि निर्निमेष—कपाटपक्ष्माणि गृहाणि यत्र ॥ ३९ ॥
विसारितत्कांतिचयाभिभूति—द्विरेफितस्वर्णतुलासु यत्र ।
स्त्रीणां मुखानि प्रतिबिंबितानि स्वर्णोत्पलानीव यमीषु रेजुः ॥ ४० ॥

सूर्याश्मकुड्यप्रतिबिंबिनारी—मुखानि यत्राब्जधिया वितर्क्य ।
दधुः सुकेश्यः पततो द्विरेफान् दशन् सखीवक्त्रमीस्समेति ॥ ४१ ॥
कुशेशयायासिदृशो निशायां रतौ ह्रिया यत्र निशम्य दीपान् ।
ध्वस्तेऽभवन् संतमसेऽवकेशि—यत्नाः स्फुरत्कुड्यमणिप्रभाभिः ॥ ४२ ॥
निशम्य यत्राविरतोत्सवेषु मृदंगनादान् ध्रुवमर्जितो यः ।
अद्याप्यमी गर्जिषु वारिवाहा विवृण्वतेऽभ्यासभरं तमेव ॥ ४३ ॥
दृग्मीलनाकेलिषु यत्र बाला सखीग्रहातंकसुनिश्चलांगी ।
पांचालिकानां वितनौ निलीना दृष्टापि नाग्राहि सखीजनेन ॥ ४४ ॥

महाकुलकं

निभालयन् लोचनलोभिलक्ष्मि क्रीडानिकेतं पुरमेतदुच्चैः ।
नृपालयश्रीकरकैरवेषु दृशं भृशं स भ्रमरीचकार ॥ ४५ ॥
स्तंबेरमाणां मदवारिभिन्न—कुंभस्थलीसंचरणप्रमत्ताः ।
झंकाररवै र्यत्र सदा द्विरेफा वसंतमाहुः स्म वसंतमेव ॥ ४६ ॥
क्रीडागिरींद्रैरिव वीरलक्ष्म्या यदेकतो राजत वारणेंद्रैः ।
गंगातरंगैरिव दत्तरंगै स्तथा न्यतोश्वैः पदखातविश्वैः ॥ ४७ ॥
भुजंगमाधिष्ठितचंदनद्रु मिवासिहस्तं प्रकृतिप्रशस्तं ।
पूर्वाद्रिचूलाश्रिततिग्मरश्मि मिवोरुसिंहासनसन्निविष्टं ॥ ४८ ॥
सिंहासनोंतर्गतबिंबदंभात् धराधिपैः शीर्ष इवोह्यमानं ।
रंगत्तरंगांगरुचीचयेने—व खर्वयंतं नवहेमगर्वं ॥ ४९ ॥
नक्षत्रचक्रेष्विव शीतरश्मि ममर्त्यचक्रेष्विव देवदेवं ।
नरेंद्रचक्रेषु विराजमान मनन्यजन्येन महामहिम्ना ॥ ५० ॥
निबद्धभूबिंबितसभ्यदंभान् सभामधस्तादिव कुर्वतीं गोः ।
अधिश्रितं तत्र सभां विभाव्य **हम्मीरदेवं** स हृदीति दध्यौ ॥ ५१ ॥
किमेषकामो न यतो ऽननंगः किमेष दस्रौ न यदद्वितीयः ।
किमेषविष्णुर्न यतो ऽद्विबाहुः किमेष वज्री न यतो द्विनेत्रः ॥ ५२ ॥

त्यक्त्वान्यकार्यैरथवीरवर्यै र्विलोक्यमानो वदतीति किं किं ।
प्रणम्य भूपं दरनम्रमौलिः प्रचक्रमे व्यक्तमिदं प्रवक्तुं ॥ ५३ ॥
"स्वतेजसैवारिगणं विजित्या—कुतोभयं संसृजतः स्वराज्यं ।
वृथैव वर्षासनमाददाना ललज्जिरे यस्य भटा निकामं ॥ ५४ ॥
दुर्गाणि दुर्ग्राह्यतराणि शाणो—ल्लीढानि शस्त्राणि भटा रणोत्काः ।
अभ्रंलिहाग्रा गिरयो यदग्रे न वास्तवीं वृत्तिमयुः कदाचित् ॥ ५५ ॥
दुर्गाणि दुर्ग्राह्यतराणि यः श्री—देवाद्रिमुख्यान्यपि मंक्षु भंक्त्वा ।
अपींद्रमुद्यद्दरदंतुराक्षी—चकार कारायमितारिचक्रः ॥ ५६ ॥
दुर्गाणि दुर्ग्राह्यतराण्यरीणां भजन्ननेकान्यपि लीलयैव ।
आजन्मभग्नत्रिपुरैकदुर्गे दुर्गापतौ योत्र घृणां बिभर्ति ॥ ५७ ॥
यद्यन्मनस्यप्यमुना नरेंद्र ! निधीयते तत्तदहो तदात्वं ।
संपादयन् सोपि विधिर्विशंके न शासनं यस्य विहंतुमीष्टे ॥ ५८ ॥
**अल्लावदीनस्य** नृपस्य तस्या—नुजौ किलो**ल्लूनिसुरत्त**खानौ ।
देशं तवाक्रम्य तदाज्ञयैव त्वामाहतुः स्मेति मदाननेन ॥ ५९ ॥
**हम्मीर** ! राज्यं यदि भोक्तुमीहा तत्स्वर्णलक्षं चतुरो गजेंद्रान् ।
अश्वोरसानां त्रिशतीं सुतां च दत्वा किरीटीकुरु नो निदेशं ॥ ६० ॥
इदं विमुक्तं यदि वा परंतु तथास्मदाज्ञाप्रविलोपिनो ये ।
स्वाग्मुद्गलांस्तांश्चतुरोपि दत्वा क्रोडीकृतां क्रीडय राज्यलक्ष्मीं ॥ ६१ ॥
त्यक्त्वा यथैतं तव दुर्गरोधं देशान् पुरः साधयितुं व्रजामः ।
न चेद्विधाता प्रतिधोचितं स्व–राभ्यां तु तत्तेनुभवोऽभिधाता ॥ ६२ ॥
इत्येतदीयानि वचांसि भूपः श्रुत्वाथ भीमां भृकुटीं दधानः ।
नवोल्लसत्क्रुद्विषवल्लिसून—द्विरेफलीलाक्षरमित्युवाच ॥ ६३ ॥
वशिष्टयुक्त्या यदि नाभविष्य दाजग्मिवानत्र भवान् कथंचित् ।
तदा त्वयोगादि ययेदमर्वाक् जिव्हां ध्रुवं तां निरकासयिष्यं ॥ ६४ ॥
दंतौ द्विपस्येव मणिं भुजंग—स्येवैणशत्रोरिव केशरालीं ।
**श्रीचाहमानस्य** धनं बलेन न जीवतः कश्चन लातुमीष्टे ॥ ६५ ॥

स्वर्णं गजा दंतितुरंगमानां पदे प्रदेया यदि खड्गघाताः ।
भवत्प्रभू सूकरमांसमेव सद्यः स्वदेतां यदि जातु यातः ॥ ६६ ॥
द्विषामपि स्याच्छरणागतानां रक्षासु मंदोपि निबद्धकक्षः ।
तन्मुद्गलान्नौ ननु याचमानौ न किं त्वदीशौ जडधीवतंसौ ॥ ६७ ॥
शतांशमप्येकविशोपकस्य न प्राणमोक्षेपि ददे बलेन ।
यद्रोचते नाम भवत्प्रभुभ्यां तत्तूर्णमेवाचरतां यथेच्छं ॥ ६८ ॥
एवं विनिर्भर्त्स्य मुहुर्मुहुस्तं वशिष्टपाशं गलहस्तयित्वा ।
निष्कासयामास पुराद्भटानां त्रातुं च दुर्गं ददिवान् विभज्य ॥ ६९ ॥
उत्तंभितान्युध्धतघर्ममर्म—छिदेधिशालंपटमंडपानि ।
दिवानिशं संगरजागरूकभुजैर्विरेजुर्निभृतं भृतानि ॥ ७० ॥
वंगोपलिप्तस्फुटलोहबंध—दृढोल्लसट्टिंकुलियाष्टिदंभात् ।
शालोपि युद्धाय विवृद्धमन्युः संवर्म्मयामास भुजानिव स्वान् ॥ ७१ ॥
रालाविलं तैलमयःकटाहे तप्तं प्रकामोत्कलिकाछलेन ।
दग्धुं युयुत्सून्प्रतिपक्षपक्षान् अलक्ष्यतौत्सुक्यमिवादधानं ॥ ७२ ॥
चेतश्चमत्कारिकलोत्सृतानि संश्चक्रिरे भैरवयंत्रकानि ।
व्यामोहहेतोः स्फुटमिंद्रजाला—नीवागतानां शकपुगवानां ॥ ७३ ॥
दूतः प्रभूतप्रतिघोथ गत्वा निजप्रभुभ्यामखिलं तदुक्तं ।
न्यवेदयत्तावपि निर्विलंबं युद्धाय सैन्यं गुणं व्यधत्तां ॥ ७४ ॥
ब्रह्मेव मध्ये पुरमाहवाय ससर्ज यान् यान् नृपतिः प्रयोगान् ।
तांस्तानमर्षात्कुशिकांगभूवत् सद्यः शकेंद्रोपि बहिस्ततान ॥ ७५ ॥
शकेषु वाद्येषु भृशाहतेषु दंडैः स्वना ये प्रकटीबभूवुः ।
प्रतिस्वनैः स्तांस्तिरयन् गिरींद्रो न स्वामिभक्तव्रतमुज्झतिस्म ॥ ७६ ॥
निषादिनो दंतिवरांस्तुरंगा नप्यश्ववारा रथिका रथांश्च ।
समंततो प्यारूरुहुः पदा (ति?) पूगा वितेनुः श्रममाहवाय ॥ ७७ ॥
महीध्रमभ्रंकषमप्यमुं स्व—वीर्याग्रतः क्षुद्रमिवेक्षमाणाः ।
ढुढौकिरे योद्धुमतिप्रवृद्धो—त्साहास्ततस्ते समरोत्कवाहाः ॥ ७८ ॥

समं स्फुटद्भिर्भटपाणिपद्मा द्बाणैस्तमिस्रं ककुभां बभूव ।
निर्घोषपूरैरपि कार्मुकाणां विश्वं समग्रं बधिरत्वमाप ॥ ७९ ॥
नीरंध्रमाकाशमनूज्झितेषु कांडेषु क्लृप्तांबुदतांडवेषु ।
आग्नेयबाणा भृशमुत्पतंत आकालिकीकेलिकिलीबभूवुः ॥ ८० ॥
आकर्षतां संदधतां रयेण विमुंचतां बाणगणान् भटानां ।
विलोकमानैरपि निर्निमेष मलक्षि नैवांतरमंबरस्थैः ॥ ८१ ॥
तपात्ययांभोदपटुच्छटावत् दुर्गादवर्षन् सुभटाः शरौघान् ।
कौक्षेयदाक्ष्येण मृणालनाल--वच्चिच्छिदुस्तान् यवना जवेन ॥ ८२ ॥
मिथोपि वीरव्रजपाणिमुक्त—पृषत्कवक्त्रास्फलनप्रभूताः ।
रेजुः पतंतोऽग्निकणाः प्रदग्धुं पलायितानामिव कीर्तिवल्लीं ॥ ८३ ॥
क्षत्रप्रकांडप्रविमुक्तकांड—पक्षोद्भवः कोपि स वायुरासीत् ।
यत्रोन्मदिष्णौ रिपुदर्पसर्पो—प्यासीत्क्षणं व्याकुलचित्तवृत्तिः ॥ ८४ ॥
आकर्णमाकृष्य भटैर्विमुक्तैरधोमुखैरूर्ध्वमुखैश्च बाणैः ।
उत्पातहेतोर्ववृषुः शकाना मधोमुखा ऊर्ध्वमुखाश्च मेघाः ॥ ८५ ॥
शिलीमुखौघैर्यवनप्रणुन्नै र्वप्रः समंताच्छुशुभे चितांगः ।
विगाहमानो रिपुदर्पसर्प—विनाशहेतोरिव जाहकत्वं ॥ ८६ ॥
भ्रमंभ्रमं वीरवरैर्निजांगो—परि प्रणुन्नाः प्रतिशत्रुवीरान् ।
कुंता विरेजु र्निशिताः पतंतः स्फुटाः कटाक्षा इव भानुसूनोः ॥ ८७ ॥
सद्यांत्रिकैर्भैरवयंत्रगोला मुक्ता मिथोप्यूर्ध्वमधः पतंतः ।
अपि द्वयानामरुचन् भटानां पीना उरोजा इव वीरलक्ष्म्याः ॥ ८८ ॥
दूरोन्नमट्टिकुलिकाग्रहस्ताः शौर्यश्रियः क्षत्रकुलोद्भवस्य ।
समुत्पतद्गोलकदंबदंभात् पंचेटकैः पर्यरमन्निवैताः ॥ ८९ ॥
प्रक्षिप्तरालाविलतप्ततैल—संगज्वलत्कुंतलकैतवेन ।
क्षत्रेषु कोपाग्निरमानिवांतः शंके शकानां बहिरुल्ललास ॥ ९० ॥
प्राकारभित्तेः खनने प्रवृत्तान् शकप्रवीरान् कुशटंकहस्तान् ।
विभिद्य शूलैर्वटकानिवोच्चै रुच्चिक्षिपुः क्षत्रकुलावतंसाः ॥ ९१ ॥

उत्प्लुत्य शाखामृगवद्गिरींद्र मारूढवंतः किल केपि वीराः ।
प्रचख्निरे शालतलं प्रविश्य केचिद्वराहा इव तीव्रकोपात् ॥ ९२ ॥
दुर्गस्थवीरव्रजमौलिमौली–नपाहरन् बाणगणाः शकानां ।
समीरगुंजा इव पादपानां पुष्पाणि शाखाशिखरोद्भवानि ॥ ९३ ॥
अचाक्षुषत्वं प्रगतांस्तनुत्वात् घटैकदेशीयभटप्रणुन्नान् ।
नालीकबाणान् प्रविभिन्नगात्रा न–क्–शकानां परिणाम एव ॥ ९४ ॥
उत्खाय शालस्य शिलां प्रविश्य तदंतरे बाहुजघातभीताः ।
स्थिता विरेजुर्यवनादिवांधा इवातपत्तापनरश्मिसन्नाः ॥ ९५ ॥
निजप्रहारव्रणजर्जरांगान् शकान् गिरेर्निष्पततो निरीक्ष्य ।
वीरा हसान् यान् व्यदधंस्त एव हम्मीरवीरस्य वशांस्यभूवन् ॥ ९६ ॥
श्रित्वा नगागान् गरूडासनेन ह्वष्टा निविष्टा यवनेशयोधाः ।
विद्धाः शरैर्वीरवरैस्तथैव चित्रं प्रयाता इव रेजुरूच्चैः ॥ ९७ ॥
निश्रेणिमालंब्य धृतासवोऽन्ये दंतैरथारोहणमाचरंतः ।
दुर्गे हता मूर्धनि मुद्गरेण दुर्गास्थितैः पेतुरमातयैव ॥ ९८ ॥
इत्थं सदाप्यौपयिकैरनेकैः परिस्फुरद्ढौकनसाहसस्य ।
अगाच्छकानां क्षयकालरात्रि रिव त्रिमासी यवनाधिपस्य ॥ ९९ ॥
प्रवर्तमाने समरेन्यदीथा—पस्फाल गोलः शकगोलकेन ।
प्रभ्रश्यता तच्छकलेन मूर्ध्नि हतो व्यनेशन्निसुरत्तखानः ॥ १०० ॥
अथ गतं सहसापि परासुता ममुमवेक्ष्य परिस्रवदीक्षणः ।
अविदितः परदेवनासवनं भृशमसौ शकपोऽतत मध्यमः ॥ १०१ ॥
प्रक्षिप्यैनं तदनु सहसा मध्यमोसौ शकाना-
मीशः स्वर्णस्फुटजटनतामंजुमंजूषिकांतः ।
ढिल्यां धृत्वा कथमपि धृतिं प्राहिणोत्प्राभृतं वा
क्षोणीभर्त्तुः स्वसकलकथाज्ञापनापत्रपूर्वं ॥ १०२ ॥
एतद्वीक्ष्याप्तशोकः श्रुतरिपुजनिताशेषतत्तन्निकारः
कृत्वा तस्यांतकृत्यं निखिलमपि यथा युक्तिकोपप्रकंपः ।

वेगादागादमुत्र स्वयमथयवनैकावनोल्लावदीनो
वीरंमन्या सहंते रिपुजनजनितं क्वापि किंवा निकारं ॥ १०२ ॥
इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीरांके निसुरत्तखानवधवर्णनो नामैकादशः सर्गः समाप्तः ॥

---

## अथ द्वादशः सर्गः

**अल्लावदीन**नृपतिं तमागतं श्रुत्वाथ जैत्रिरवनीवनीघनः ।
दुर्गोपरि प्रतिपदं मदादसौ शूर्पाण्यबीबधदुदारधीधनः ॥ १ ॥
दृष्ट्वा तदद्भुतमसौ शकेश्वरो विस्मेरविस्मयविकासिलोचनः ।
पप्रच्छ पाणितलचालसंज्ञये—त्येतत् किमंग वरणोपरि स्थितान् ॥ २
श्रुत्वाऽदसीयभणितिं **हमीरराट्** हर्षप्रकर्षमतिमानमुद्वहन् ।
प्रोदंच्यवक्त्रकमलं हसन्मनाक् प्रोवाच वाचमिति तं शकाधिपं ॥ ३ ॥
म्लेछावनीदयितचारुचारुभो चक्रे त्वयागमदमुत्र यद्भवान् ।
पूर्णे ऽनसि प्रचुरवस्तुसंचयै र्भाराय किं भवति शूर्पसंचयः ॥ ४ ॥
उक्तिं निशम्य स इमां शकाधिपो राज्ञोदितां समुचितामदो वदत् ।
तुष्टस्तवोपरि **हमीरभूपते** याचस्व वांछितमतुच्छविक्रम ॥ ५ ॥
क्षत्रोत्तमोथ निजगाद यद्यद स्तर्हि प्रयच्छ समरं दिनद्वयीं ।
आयोधनादपरमत्र दोष्मतां नो वांछितं किमपि वल्गु वल्गति ॥ ६ ॥
तद्वचः श्रवणतः शकोत्तमः क्षात्रव्रते स्तुतिमुखो मुहुर्मुहुः ।
प्रातस्तदेव भवितेति भाषुकः स्वावासमासददसादमानसः ॥ ७ ॥
प्रातर्भविष्यति कदेति सत्वरं निध्यायतामथ रणाय दोष्मतां ।
भास्वान्प्रियार्थमिव पूर्वपर्वत—स्योत्संगसंगसुभगं वपुर्दधौ ॥ ८ ॥
लक्ष्मीभराभिरमणीयतागुणं धर्तुं तदा प्रबलतामुपागमन् ।
पाथोरुहाणि सलिलाशयोदरे सैन्योदरे च सुभटाननेंदवः ॥ ९ ॥
दोषोदयस्फुरितमूर्त्तिविद्विषत्—ध्वांतव्रजोर्जिततिराश्चिकीर्षया ।
सूरप्रकाश उपमानमानभित् प्रादुर्बभूव गगने बलेपि च ॥ १० ॥

व्युष्टोचितां बलिक्रियां युक्त्या वितत्य स ततः क्षितीश्वरः ।
संग्रामसंगमविनोदहेतवे सैन्यान् रयेण समनीनहत्तमां ॥ ११ ॥
अल्पेतरद्युतिविकल्पिताहवाः कल्पप्ररूढरुचिरांगरोचिषः ।
षट्त्रिंशदायुधभृतो धृतोदया वीरा विनिर्ययुरजीर्यविक्रमाः ॥ १२ ॥
शृंगारतः समरसंभवो रसो नूनं विशेषमधुरत्वमंचति ॥
हित्वा प्रियांगपरिरंभणादरं वीरा रणाय यदमी प्रतस्थिरे ॥ १३ ॥
संग्रामसंगमविनोदहेतवे स्फातिं गतानि नितमां महीयसीं ।
अंगानि वीरनिकरस्य नो तदा मांतिस्म वर्मसु सुविस्तृतेष्वपि ॥ १४ ॥
कश्चिद्विलोक्य कबरीं भियोद्भ्रमत् सारंगशावकदृशः प्रकंपिनीं ।
ध्यानाध्वगीकृतरणांगणोल्लसत् खड्गश्चचाल करवालमुद्वहन् ॥ १५ ॥
अंगे लगंत इषवः किमंगना काक्षाः किमंग नितमां प्रियंकराः ।
एतत् विवेचनविधानकौतुकी कश्चिन्महीरणमहीमभूषयत् ॥ १६ ॥
पूर्वं त्वदेकहृदयामरालयं गच्छाम्यहं ज्वलनवर्त्मना ऽमुना ।
किंवा मदेकहृदयोसि वर्त्मना त्वं काप्यवोचदिति सस्मितं हितं ॥ १७ ॥
संभाव्य वैरिकरिणां रणांगणे कुंभान्मम स्तनधियातिकामुक ।
माभूरनंगरससंगकौतुकी-त्येकं जगाद सुमुखी हसोन्मुखी ॥ १८ ॥
प्रेयांस्तवास्मि यदि वल्लभा ततः स्वोत्खातदंतिरदजातकंकणैः ।
पाणी विभूषय ममाद्य कंचिदि—त्यूचे प्रियारचितसाचिलोचना ॥ १९ ॥
स्नेहातिरेकवशतः स्वपाणिना माताधिमौलितिलकं यदाकरोत् ।
शौर्यात्तदेव कवचाधिकं विदन् कश्चिच्चचाल किल वीरशेखरः ॥ २० ॥
कृत्वा करे दलिकखड्गमुद्गतं तात प्रहंतुमरिवीरकुंजरान् ।
एष्यामि नन्वहमपीति भाषुकं कश्चिच्चचाल तनयं हसन् मुहुः ॥ २१ ॥
पुत्राद्य संगरमवाप्य सत्वरं विस्तारये भुजपराक्रमं तथा ।
वीरप्रसूतिलकतां यथाश्रये कंचिज्जगाद जननी प्रमोदिनी ॥ २२ ॥
मेदस्विवीररससंगसंभव—द्रोमोद्गमत्रुटितवर्म्मसंहतिः ।
मूर्त्तो भयानकरसः स्फुरन्निवा चालीत्परो रुणितदारुणेक्षणः ॥ २३ ॥

विद्वेषिवीरजनमानदारणो माभूत्प्रवृत्त ऋत एव मारणः ।
संभावयन्निति निशम्य काहलां प्रायात् परः समरजित्वरत्वरः ॥ २४ ॥
गृध्रं भ्रमंतमुपरीत्यवक्परो संवर्म्मयन्नयमिह प्रतीक्ष्यतां ।
मूर्ध्नीतरस्य यदि वात्मनस्तनौ श्रद्धां तनोमि फलिनीं तवाधुना ॥ २५ ॥
स्याज्जीवता युधि यशो मृतस्य तु स्फीतं च तच्च सुरवल्लभा अपि ।
इत्यस्य वीरनिकरस्य निर्यतो जज्ञे न दुःशकुनमध्वनि क्वचित् ॥ २६ ॥
कुंभान्निधाय शिरसि प्रपूरितान् एलालवंगरसशीतलैर्जलैः ।
प्रीत्यानुयातुमसुवल्लभान्निजान् सज्जीबभूव निखिलो भटीजनः ॥ २७ ॥
**अल्लावदीन**विभुरप्यथोद्भट—द्विट्प्रोन्मिमंथिषुतयाऽकुलाशयः ।
संनह्य सैन्यमनुजादिभिर्वृतः स्थाने प्रतिश्रुतमशिश्रियन्मिथः ॥ २८ ॥
अन्योन्यवीक्षणवशोल्लसन्महा—कोपप्ररूढमहिमप्रसृत्वराः ।
वीरा रवाः प्रतिरवैश्व— दिभि र्योगैर्द्विरुक्तिमिव धातवो ययुः ॥ २९ ॥
अभ्रंकषोल्लसितचारुचामरे कुक्षिंभरिद्विरदबृंहिते दिशां ।
प्रस्पर्धयेव दधतुः परस्परां सैन्ये इमे श्रियमिहाधिकाधिकं ॥ ३० ॥
पुष्णंत्यरंविनमयेन संगरो—त्साहं हृदि प्रधनकारिणां नृणां ।
तूर्याणि पूरितहरिंति निस्वनैः सैन्यद्वयेपि नितरामराणिषुः ॥ ३१ ॥
भंक्तुं विपक्षकरिकुंभघर्षणैः कंडूलतां स्वभुजदंडयोरथ ।
चेलुर्भटा अपि बलद्वयाद्रणो—त्साहत्रुटत्त्रुटदशेषकंकटाः ॥ ३२ ॥
पत्तिः पदातिकमियाय सादिनं सादी रथस्थितमहो महारथी ।
मातंगयानगमनो निषादिनं द्वंद्वाहवोऽजनि तदेतिदोष्मतां ॥ ३३ ॥
ऊर्ध्वीभवंत उरुविक्रमैः शिर—स्त्राणानि वीरनिकरस्य मूर्धजाः ।
स्मोत्त्वासयंति घनकालसंभवा भूस्फोटका इव महीप्रदेशकान् ॥ ३४ ॥
अन्योन्यजातहठतो गतांतरं मुक्तैः पृषत्कनिवहै रणांगणे ।
पाणिग्रहाय विजयश्रियो भटा यत्नेन मंडपमिव व्यरीरचन् ॥ ३५ ॥
कोदंडचंडरुचिमंडलादतो दीप्राः क्षुरप्रकिरणाः प्रपातिनः ।
प्रत्यर्थिवीरतिमिराणि वेगतो—प्यानिन्यिरे युधि कथावशेषतां ॥ ३६ ॥

मत्पावनोद्य समरे तनुत्यजां भावी समागम इति प्रमोदतः ।
भ्रष्टांतरभ्रमदिषुव्रजच्छला द्रोमांचितांगमिव दिद्युते नभः ॥ ३७ ॥
वीरैः प्रकाममभिमुक्तपत्त्रिणां नीरंध्रमंबरतले प्रसर्प्पतां ।
अंतः प्रकर्त्तनभयादिव क्षमः क्षेप्तुं न तीव्रकिरणोप्यभूत्करान् ॥ ३८ ॥
वीरव्रतस्य ददतोंकपालिकां मास्मांतरायमिह कार्षुरेतके ।
सांद्रेपि बाणनिवहे निपेतुषि स्फारान् स्फरानिति न केप्यलासिषुः ॥ ३९ ॥
वायुं विजित्य तरसा पतत्स्विह श्वासैः पुरैव चलितं विरोधिनां ।
भित्वा तदंगमनवेक्ष्य तानि वै—तत्पृष्ठ एव चलितं शरैरपि ॥ ४० ॥
पार्श्वद्वयस्थकरिदंतभासुर स्तत्कुंभपीठविलुठत्करांबुजः ।
शौर्यश्रियो भुजलता स्तनद्वयी—संस्पर्शसौख्यमितरोऽन्वभूत्तमां ॥ ४१ ॥
प्रोतोऽरिणा सह शरेण वाजिनः पृष्ठे न शल्यभृशसंनिवेशनात् ।
संप्राप्तवानपि परासुतां परो नाश्वात्पपात युधि जीववानिव ॥ ४२ ॥
आरोढुमन्यसुभटे प्रलंबिते—कांघ्रौ रदस्थितपरांघ्रिभासुरे ।
क्रोधाद्भ्रमन् करिवरो रणांगणे शुंडाद्वयीं दधदिव व्यभाव्यत ॥ ४३ ॥
द्वैधीकृते शिरसि पाणिना धृते चोर्ध्वं निहंतुमहितस्य चिंतयन् ।
संधागतेन्यशरशल्यतः परो ह्यष्यन्नधावत नियोद्धुमुद्धतः ॥ ४४ ॥
ऊर्ध्वं विदारितमरातिना शिरो भ्रश्यन्नियोजितमपि द्विधाप्यधः ।
स्वेनैव भिन्नजठरादुपादृते रंत्रैर्निबध्य युयुधे पुनर्भटः ॥ ४५ ॥
विस्मेरमारचरितां विकंचुकां स्नेहाधिकां विशदकांतिधारिणीं ।
छित्वा करं प्रतिभटस्य कोप्यला—त्तद्वल्लभामिव कृपाणवल्लरीं ॥ ४६ ॥
आक्रम्य पादमुरुणैकमंघ्रिणा धृत्वा करेण च परं महाग्रहात् ।
लोकद्वयीमयमसाधयद्युधी—त्याख्यान्निव द्विरकृतेतरं करी ॥ ४७ ॥
याभ्यामहारि मम वल्लभास्तन—श्रीस्ताविमाविति परोह्यमर्षणः ।
कुंभौ गजस्य समरे विदारयन् आधोरणप्रहृतिमप्यजीगणत् ॥ ४८ ॥
अन्योन्यदत्तकरवालवल्लरी—प्रौढप्रहारपरिभिन्नहृत्तया ।
कौचिद्धतौ युधि भटौ परासुता मालिंगिताविव मिथोपि रेजतुः ॥ ४९ ॥

सद्वंशजोपनतकोटिभूषणा संलीनसायकसमुल्लसद्गुणा ।
दृष्ट्वा परस्य समरे धनुर्लता वेश्येव कंपमतनिष्ट कस्य न ॥ ५० ॥
कस्याप्यसिर्द्विरदकुंभमंडला त्पीत्वा भृशं समितिशोणितासवं ।
उन्मत्ततां गत इवाशु विद्विषां वक्षःस्थलीमभिनिपेतिवान्मुहुः ॥ ५१ ॥
लूनेऽग्रजन्मनि पदद्वयेऽरिणा दंतावलस्य पततः क्षितौ किल ।
उत्तंभनाय निजमेव दंतयो र्युग्मं बभूव किमिवान्यदीदृशं ॥ ५२ ॥
प्रत्यर्थिमुक्तशरभिन्नपुष्करो लेभे न घातसमयेऽपि तां किल ।
अग्रे स्फुरंतमपहर्त्तुमक्षमा लेभे त्रपां प्रतिभटं करी व्यथां ॥ ५३ ॥
दत्वा प्रहारमतिलाघवात्पुरः पृष्ठं श्रयत्यसकृदुद्भटे भटे ।
क्रुद्धो भ्रमन् समिति तज्जिघृक्षया वात्या विनोदमभजत्परो गजः ॥ ५४ ॥
भित्वाखिलांगमपि भूजुषेषुणा हत्वा करेणुमितरोऽभिपातुकं ।
वर्त्मेव हंसगमनाय तेनिवान् क्रौंचं पराशरसुतो गिरिं यथा ॥ ५५ ॥
कस्यापि कुंडलितचापमंडलां—तर्वर्त्तिवक्त्रकमलं बभौतमां ।
प्रत्यर्थिषु प्रबलबाणवृष्टये बिंबं स्फुरत्परिधिशीतगोरिव ॥ ५६ ॥
द्वैधीकृतस्य सुभटस्य कस्यचि—त्सव्येतरार्धमवलोक्य वर्ष्मणः ।
लब्धोद्य शंभुरुमयाविनेत्यधा—वंतामरेशदयितो दिशोदिशः ॥ ५७ ॥
जज्ञे तदा रणभृतां च रक्षसां यज्ञे महाहटभरः परस्परां ।
एके प्रथीयसितरामसृग्मदीं चक्रुः पराणि पपुरेव तत्क्षणात् ॥ ५८ ॥
नः संख्यसंख्यविवरातिथीभव—द्वीरातिथेयकरणैरिवातुरे ।
द्वीपांतरं व्रजति तिग्मदीधितौ सैन्ये उभे अपि ततो विरेमतुः ॥ ५९ ॥

इति प्रथमदिनं

---

## द्वितीयदिनयुद्धम्

स्वप्नप्रसंगसमरैरनेकधा रात्रिं व्यतीत्य सुभटाः कथंचन ।
प्रातः पुनर्निजनिजाधिपाज्ञया संग्रामसीमनि मनो व्यनोदयन् ॥ ६०

संनद्धयोरथ च सैन्ययोर्द्वयो रानद्धहेममयकंटकैर्भटैः ।
स्वस्मिंस्तदा समरभूरपि स्फुटं प्राचीव कांचनरूचं दधौतमां ॥ ६१ ॥
मूर्छामितोपि किल कोपि विद्विष—त्खड्गप्रहारवशतो रणांगणे ।
तं लातुमागतमरीकरामृत-- स्पर्शाद्विबुध्य युयुधे भृशं पुनः ॥ ६२ ॥
उत्प्लुत्य वीरकलशेन कोपिना मुक्तेन हस्तिपककुंभभूमिदा ।
कुंतेन भिन्न इतरः करी बभा—वालानलंबित इवाहवांगणे ॥ ६३ ॥
लग्नप्रतीभदशनद्वयीतया संरूढसिंधुमितदंतभासुरः ।
स्तंबेरमो रणभुवीतरो भ्रम—न्नैरावणेन सुलभां दधौ विभां ॥ ६४ ॥
लग्नारिबाणगणसंभवव्रण—श्रेणिप्रमत्तकरिकुंभमंडलात् ।
धारा निपेतुरसृजो मदस्य च स्पर्धां दधत्य इतरेतरामिव ॥ ६५ ॥
कस्याप्युदग्रतरवारिदारिता दंत्राणि रेजुरुदरात्पतंत्यधः ।
आदातुमेकपदमेव तं दिवः क्षिप्ताः सुरीभिरिव पाशपंक्तयः ॥ ६६ ॥
क्रुद्धे प्रधावणाय सिंधुरे वाहानुपर्युपरि वीक्ष्य पातिनः ।
देवैरहासि यदहो तदेव त—न्मौलौ बभूव सुमवृष्टिरुत्कटा ॥ ६७ ॥
उत्पाट्य बाहुमभिसन्निवेशनात् कुंतव्रणोच्छालितशोणितच्छटाः ।
वीरश्रियेव नवकुंकुमच्छटा दत्ता भटोरुषु विरेजिरेतमां ॥ ६८ ॥
स्वारोढुरुन्नततरान्निषादिनो हंतुं सुखेन वितरन् प्रवीणतां ।
श्रीवृक्षकी हयवरो रणांगणे स्वामुन्नतिं प्रविदधौ फलेग्रहिं ॥ ६९ ॥
उत्प्लुत्य भूत इभकुंभमाश्रितः स्वोजोर्जिताद्भुतयशःसितद्युतिः ।
मेघात्पयोभ्र इव तुंगभूभृतः शृंगाग्रलीन इतरो व्यराजत ॥ ७० ॥
संग्रामभूपतितवीरमर्दनात् पादांतलग्नलसदंत्रकैतवात् ।
क्रीडन्परः समरपल्वले करी सेवालजालमिव बिभ्रदाबभौ ॥ ७१ ॥
एकः करी समरसीम्नि सादिनं चिक्षेप कंदुकमिवाधिपुष्करं ।
धृत्वा करेण च कटौ परो हयं प्रास्फालयद्रजकवस्त्रवद्भुवि ॥ ७२ ॥
धाराप्रपातकृतलोककौतुक स्तेजोवितानविलसच्छतन्हदः ।
कस्याप्यसिर्युधि पयोधरायितो युक्तं द्विषामजनि हंसनाशकृत् ॥ ७३ ॥

कस्याप्यपाकृतगणोन्नमार्गणो लक्षाय धावति तदा स्म धावतु ।
कोटिद्वये सति ननाम यद्धनुः सद्वंशजस्य न तदस्य सांप्रतं ॥ ७४ ॥
ज्योतिर्मयीभिरिह मूर्त्तिभी रणे व्याप्तिभितोपि गगने समित्कृतां ।
नालक्षि दैवतगणैरपि क्षणं व्यक्तं सहस्रकिरणस्य मंडलं ॥ ७५ ॥
क्रोधारुणेक्षणरुचीचयाचितं कस्यापि कृष्टमरुचत् धनूरणे ।
कुंडं हविर्भुज इव स्फुरज्जय–श्रीकृष्टयेऽरिपुपशून् जुहूषतः ॥ ७६ ॥
क्रोधप्रधावितरथांघ्रिमर्दनात् त्र्युच्चत्करंकसविकाशशब्दितैः ।
जीवग्रहो मयि कथं भ्रमंत्यमी इत्यन्वशेत पतितः क्लितरः ॥ ७७ ॥
कुर्वद्भिरन्विह रणे पलायितान् धावद्रथस्खलनतां पदेपदे ।
वीरैर्जहे न बिरुदं पलायितप्राकार इत्यनुगतं मृतैरपि ॥ ७८ ॥
संग्रामसंगमविनोदिवारण–प्रोक्षिप्तवीरवृतिलोलचेतसां ।
स्वर्योषितामपि तदा परस्परा माविर्बभूव दिवि दारुणो रणः ॥ ७९ ॥
प्रागेव मास्म सुरवल्लभा अमुं वृण्वन्निति स्फुरितवेगविस्तराः ।
आलिंग्य वल्लभमपासुमप्युर स्तन्व्यश्चितां प्रविविशुर्भुजाभृतां ॥ ८० ॥
छत्रैः सितांबुजमयीव कुत्रचित् कुत्रापि पल्लवमयीव पाणिभिः ।
कुत्रापि शैवलमयीव कुंतलै भ्रंष्टै र्बभौ रणभृतां रणावनिः ॥ ८१ ॥
शस्त्रप्रहारभृशजातमूर्च्छया स्वारोहकेषु पतितेषु भूतले ।
हेषारवैः समिति जातगौरवै र्दुःखाद्विलापमिव वाजिनो व्यधुः ॥ ८२ ॥
द्विट्कुंभिकुंभविनिपातिमौक्तिक—श्रेणिप्ररूढरुचिराजिभू रभात् ।
वीरश्रियं प्रपरिरभ्य दोष्मतां शय्येव पुष्पखचिता सुषुप्सतां ॥ ८३ ॥
वीरैर्निहत्य विनिपातिता रण–क्षोणौ बभुः करिवराः पदेपदे ।
सेतोः कृते हनुमतैव चालिताः शैला इवार्धपथ उज्झिता भरात् ॥ ८४ ॥
जग्मुर्मृतिं दशशतानि भटा इहेति जल्पन्निवाऽतत करद्वितयांगुलीभिः ।
नृत्यक्रियामभजतैकतरः प्रवीरः काबंधिकी महितवीरविलूनमौलिः ॥ ८५ ॥
इति तिरस्कृतभारतसारते रणभरे स्फुरिते दिवसद्वयीं ।
दिनकरः प्रतिवक्तुमिवावधिं चरमभूमिधराग्रमसेवत ॥ ८६ ॥

शौर्येण प्रतिपक्षपक्षहृदयं स्वस्वामिभक्तव्रतै-
श्वेतांसि स्वविभोरसिप्रहृतिभिर्द्विट्कुभिकुंभानपि ।
अंगैरंगणमाहवस्य विलसत्कीर्या च लोकत्रयीं
वीरा व्यानशिरेऽत्र योद्धृविसरश्रेयस्करे संगरे ॥ ८७ ॥

एतस्मिन्समरे वीरा यवनानां महौजसः ।
पंचाशीतिसहस्राणि यमावासमयासिषुः ॥ ८८ ॥

म्लेंच्छानामथ दोष्मतामधीशितारावादत्तावधिकालपालनात्तचित्तौ ।
वीरेंद्रान्कथमप्यमून्निवार्य युद्धात् भेजाते शिबिरं निजं निजं रयेण ॥ ८९ ॥

इति श्रीजयसिंह० वीरांके दिनद्वयसंग्रामवर्णनोनाम द्वादशः सर्गः ॥

---

## अथ त्रयोदशः सर्गः

अन्यदाथ क्षमानाथः स्फारशृंगारभासुरः ।
अलंचकार शृंगारचंचरीं चतुराशयः ॥ १ ॥

निरीक्ष्य सहसा यत्रं भोभ्रांत्या स्फाटिकीः शिलाः ।
उत्संबभार वस्त्राणि प्रक्मूयनभयानकः ॥ २ ॥

रंभा ग्रावोद्भवा यत्र वीक्ष्य साक्षाज्जनं स्मरन् ।
फलेभ्यः स्पृहयन्नुच्चै नैकशः करमक्षिपत् ॥ ३ ॥

यत्र स्तंभेष्वराजंत विचित्राः शालभंजिकाः ।
देव्यो नृदेवमालोक्य तद्गुणैस्तंभिता इव ॥ ४ ॥

यत्रोत्कृत्तेषु पद्मेषु सिस्वादयिषवो मधु ।
भृंगा निपत्य व्यर्थत्वात् ह्रियेव शितितामगुः ॥ ५ ॥

यत्र स्फाटिकपांचाल्या—स्येष्वब्जाध्याश्रितालिषु ।
चकोराः शशभृद्दीक्षा—श्रद्धामह्नयप्यपूपुरन् ॥ ६ ॥

यत्कुट्टिमे पदप्रांता—रुणिमप्रतिबिंबनात् ।
रक्तं क्षौममिवास्तीर्णं पदन्यासाय भूभृतः ॥ ७ ॥

स्फारकर्पूरपारीकं चंदनक्षोदमेदुरं ।
मृगनाभिस्फुरन्नाभि यदंगणमराजत ॥ ८ ॥
नृपोरस्थेंद्रनीलाश्म—दाम यत्स्फाटिकाश्मसु ।
निरीक्ष्य बिंबितं सर्प—भ्रांत्या लोकाश्चकंपिरे ॥ ९ ॥
अधो निबद्धभूभाग—प्रतिबिंबिस्वतामिषात् ।
भोगींद्राणामपि सभां विजेतुं प्रस्थितेव या ॥ १० ॥
**वीरमो**भान्नृपात्तत्र दक्षिणे चारुलक्षणः ।
हासंहासं सृजन् गोष्टीं **रतिपालो** रतिं दधौ ॥ ११ ॥
परीतो **महिमासाहि**स्त्रिभिरप्यनुजन्मभिः ।
व्यक्ततामभजत्तत्र परमात्मा गुणैरिव ॥ १२ ॥
मार्दंगिका मृदंगानि वीणामपि च वैणिकाः ।
अपि वैणविका वेणुं यथातालमवीवदन् ॥ १३ ॥
रणद्वेणुझणत्कारा—नुकारिप्रसरत्स्वराः ।
गायना वीरहम्मीरकीर्तिस्फूर्तिमगासिषुः ॥ १४ ॥
मिथोपि स्पर्धया वर्धमानत्वादिव संयते ।
दृढं चोलांतरीयाभ्यां स्तनश्रोणीप्रबिभ्रती ॥ १५ ॥
वपुर्वल्लिविलासेन मूर्छयंतीव कामिनः ।
कूणिताक्षप्रपातेनोज्जीवयंतीव मन्मथं ॥ १६ ॥ त्रिभिर्विशेषकं
प्रविश्य तत्र सभ्यानां मनसीव प्रमोदिनी ।
प्रवृत्ता नर्तितुं धारा देवी सोत्पश्य नर्तकी ॥ १७ ॥
तस्या लास्येन वेल्लंतो रेजिरे पाणिपल्लवाः ।
मोहनव्रततेः कामं स्फुरंतः पल्लवा इव ॥ १८ ॥
गोलकत्रितयोच्छाल—च्छलेन भुवनत्रयीं ।
सा जगादेव लोकानां कृतां स्वशयशायिनीं ॥ १९ ॥
अंगुल्यग्रभ्रमच्चक्र—दंभेन युवतीजने ।
रूपलावण्यसौंदर्यैः सा दधौ चक्रितामिव ॥ २० ॥

कर्णोपांतभ्रमचक्र—व्याजात्समाहिव तां शशी ।
समोपमा तवास्यस्य भ्रम एव विपश्चितां ॥ २१ ॥
कर्पूरपरिमाणूनां व्याजाल्लग्नानि पादयोः ।
भ्रमिभिर्भ्रामयंतीव रेजे यूनां मनांसि सा ॥ २२ ॥
मयूरासनबंधेन नृत्यंती विलुलोप सा ।
वाच्यं विधेर्मयूरस्य दुःक्रमाधानसंभवं ॥ २३ ॥
अंगहारतयाहार—लता तस्यास्तनाग्रतः ।
रराज बिसवल्लीव चक्रचंच्वग्रसंस्थिता ॥ २४ ॥
लास्येन धनुषीवास्याः पश्चाद्वपुषि संनते ।
पार्ष्णिसंस्पर्शिनीवेणि र्जीवाभावमजीजिवत् ॥ २५ ॥
सभ्यानामसकृत्तस्यां दृष्टिरापादमस्तकं ।
चक्रेवरोहमारोहं व्रतत्यां वानरी यथा ॥ २६ ॥
तांडवं निर्मिमाणेति सा तालत्रुटनक्षणे ।
अधस्थाय शक्रेंद्राय पश्चाद्भागमदीदृशत् ॥ २७ ॥
शकेशस्तेन दूनात्मा सभाध्यक्षमदो वदत् ।
धनुर्धरः स कोप्यस्ति वेध्यमेनां तनोति यः ॥ २८ ॥
अवदत्सोदरो राजन् गुप्तौ क्षिप्तोस्ति यः पुरा ।
उड्डानसिंहस्तं हित्वा नान्येनात्र प्रभूयते ॥ २९ ॥
सद्यः शकेशोथानाय्य भंक्त्वा निगडसंचयं ।
द्विधापि स्नेहदानेन तं सज्जांगमचीकरत् ॥ ३० ॥
ततः स सज्जीभूतांगो ऽनन्यसाधारणं धनुः ।
आदायान्हाय तां पापो विव्याध व्याधवन्मृगीं ॥ ३१ ॥
मूर्छामतुच्छामृच्छंती बाणघातेन तेन सा ।
उपत्यकायां न्यपत द्विवो विद्युदिव च्युता ॥ ३२ ॥
नृपादयस्ततो लोकाः क्षणं वैलक्ष्यलक्षिताः ।
धानुष्कतां स्तुवंतोस्य मूर्धानं दुधुवुर्मुहुः ॥ ३३ ॥

तन्मर्म **महिमासाहि** बिभ्रत् हृदि परेदिवि ।
शकेशं वेदयतां नीत्वा हम्मीरमिदमब्रवीत् ॥ ३४ ॥
यद्यादिशति भूनाथो मामिदानीं तदा रिपुं ।
शरसात्तरसा कुर्वे धारामिव धनंजयः ॥ ३५ ॥
नृपोवग्भिहतेत्रामा रंस्येहं केन संगरे ।
हित्वा तं **महिमासाहि** जह्युड्डानं धनुर्धरं ॥ ३६ ॥
शकेशवेध्येनासाद्या देशं दूनमनास्ततः ।
हत्वा तं **महिमासाहि** धिगित्योज्झद्धनुः करात् ॥ ३७ ॥
चकितस्तद्विनाशेन सद्यः सोपि शकेश्वरः ।
त्यक्त्वा सरः पुरोभागं तत्पृष्ठे शिबिरं न्यधात् ॥ ३८ ॥
ढौकनानि ततोभ्येत्य दायंदायमनेकधा ।
खिन्नोसौ दापयामास सुरंगां समयागिरिं ॥ ३९ ॥
उपलैर्मृत्तिकापूरै र्दलिकैस्तृणपूलकैः ।
परिखां पूरयामास सोदरश्चान्यदेशतः ॥ ४० ॥
क्रियद्भिरप्यथो मासैः सिद्धेत्रौपयिकद्वये ।
शका दुढौकिरे योद्धुमादिष्टाः शकभूभुजा ॥ ४१ ॥
विज्ञाय चाहमानास्त त्परिखां वन्हिगोलकैः ।
अदहन् जतुतैलं च सुरंगायां प्रचिक्षिपुः ॥ ४२ ॥
तेन तैलेन पूर्णायां सुरंगायां द्विषद्भटाः ।
उदच्छलन् यथा मीनाः सरस्यां ज्वलदंभसि ॥ ४३ ॥
चीत्कारान्मुमुचुः केपि कंठस्थैर्भापिता भटैः ।
यष्टिलोष्ठकरैर्डिंभै रिव श्वानोंधुमध्यगाः ॥ ४४ ॥
तत्तैलदग्धसर्वांगा बभूवुर्द्विषतां भटाः ।
क्षणारुणक्रमश्याम—तप्तायोगोलसन्निभाः ॥ ४५ ॥
ज्वलदंगसमुद्भूतो—च्छलत्कीलावलिच्छलात् ।
तेजांस्यपि शकांगेभ्यो नेशुर्दाहभयादिव ॥ ४६ ॥

शकाधीशः शकैरेतां सुरंगां यैरचीखनत् ।
अपूपुरन् द्राग्दोष्मंत स्तेषामेव कलेवरैः ॥ ४७ ॥
इत्थं दुर्गजिघृक्षायै यान्यान्यत्नान् शकेश्वरः ।
असृजत्सततं तांस्ता नवकेश्यकरोन्नृपः ॥ ४८ ॥
ततो दुर्गं शकेंद्रोसौ हातुमादातुमक्षमः ।
दिने दिनेप्यवासीद दुरगो गिरिकामिव ॥ ४९ ॥
दिवानिशं स योगीवा—शेषसौख्यपराङ्मुखः ।
दृष्टिमेकां ददौ दुर्गे परां च क्षितिमंडले ॥ ५० ॥
दुर्गाग्रहणदुःखाग्निप्लुष्टमस्याथ मानसं ।
प्रसेक्तुमिव पाथोदः प्रोन्ननाम नभोंगणे ॥ ५१ ॥
बर्हिणो व्यदधन्केका उन्नीयोन्नीय कंधरां ।
आव्हयंत इवांभोदं मिलितुं चिरमागतं ॥ ५२ ॥
वीक्ष्याभ्युन्नतमंभोदं केकाव्याजेन केकिनः ।
कदा गामीति पप्रच्छु हर्षादर्धोक्तिभंगिभिः ॥ ५३ ॥
उद्गीते केकिभिर्गीते तूर्यते घनगर्जिते ।
ननर्त्त नर्त्तकीवोच्चै स्तडिद्गगनमंडपे ॥ ५४ ॥
सांद्रोद्गमोल्लसन्नील—तृणश्रेणिच्छलात्क्षितिः ।
मेघप्रियागमप्रीता पर्यधादिव कंचुकं ॥ ५५ ॥
दधत्यंबुनिधेः स्पर्धां सरांसीह रराजिरे ।
त्रुटित्वा वारिभारेणा—भ्राणीव पतितान्यधः ॥ ५६ ॥
वियोगिनीनां नेत्राणि व्योम्न्यभ्रपटलानि च ।
मिथः स्पर्धां दधंतीव वर्षंतिस्माऽधिकाऽधिकं ॥ ५७ ॥
किरत्यसूचीसंचारा—धारावारिधरे भृशं ।
वियोगिनीनां लावण्यं जगालेति किमद्भुतं ॥ ५८ ॥
शंभोः परिभवात्त्यक्त—मधुचापोऽधुना स्मरः ।
वर्षासखस्ताडिद्दंभा दसिश्रममिवातनोत् ॥ ५९ ॥

वारिदेन तदासिक्ता रराजे भूरि भूरियं ।
कांतकांतोपभुक्तायाः छायान्यैव मृगीदृशः ॥ ६० ॥
अंभोधरस्य ग्रीष्मर्त्तुं निर्जित्य विशतः सतः ।
स्फूर्जद्गर्जिच्छलात्प्रादु—रासंस्तूर्यस्वना इव ॥ ६१ ॥
अंगानि कानि सिक्तानि कानि सेच्यानि वा भुवः ।
इति विद्युत्प्रकाशेन ददर्शेव घनाघनः ॥ ६२ ॥
मालतीकुटजामोद—हारी स्पृष्टपयःकणः ।
लतालास्यकलाचार्यो ववौ वर्षासमीरणः ॥ ६३ ॥
क्षेत्रप्रं च सरःप्रं च गात्रस्नायमपि क्वचित् ।
चेलक्नोपं तदा वर्षं न्नाहो वंध्यं व्यधाद्धनः ॥ ६४ ॥
यथा यथा जगर्जायं स्तनयित्नुस्तथा तथा ।
प्रियाः शकानां चक्रंदुर्बाहुजैर्विधवीकृताः ॥ ६५ ॥
इलामधःकर्दमिलां धारा उपरिपातिनीः ।
विलोक्य यवनाः सेवा—व्रते वैराग्यमासदन् ॥ ६६ ॥
अमुंचंस्तुरगारंग मगच्छन्कृशतां द्विपाः ।
अक्षुभ्यन् स्यंदना धात्र्यां जनान्दंशा उपाद्रवन् ॥ ६७ ॥
इत्यालोक्यांबुमुकालं साक्षात्कालमिवागतम् ।
यथाकथंचित्संधान मचिकीर्षच्छकाधिपः ॥ ६८ ॥
आजुहाव ततो दूतै **रतिपालं** शकाधिपः ।
शकेशः किंकिमाहेति **हम्मीरो**प्यलमन्यत ॥ ६९ ॥
**रतिपाले** गते जाते संधाने चलिते शके ।
वृथा नो दोष्मतेत्याप **रणमल्ल**स्तदा रुषं ॥ ७० ॥
आयाते **रतिपाले**ऽथ स मायावी शकेश्वरः ।
उपावीविशदेतं स्वा—सनेभ्युत्थानपूर्वकं ॥ ७१ ॥
अरंजयच्च कूटेन मानैर्दानैरनेकधा ।
कूटोपजीविनः किंवा कूटे मुह्यंति कुत्रचित् ॥ ७२ ॥

अपवार्य सभास्तारान् भ्रातृमात्रद्वितीयकः ।
**रतिपालं** जगादैष विस्तार्याग्रे सिचोंचलं ॥ ७३ ॥
**अल्लावदीन** इत्याख्यः सोहं शककुलाधिपः ।
दुर्गाण्यनेकशो येन दुर्ग्राह्याण्यपि जिग्यिरे ॥ ७४ ॥
इदानीमस्वसात्कृत्वा यदि दुर्गं व्रजाम्यदः ।
ज्वलदग्न्युप्तवल्लीव तन्मे कीर्तिः कियच्चिरं ॥ ७५ ॥
स्वसात्कर्तुं बलेनैतत्सहस्राक्षोपि न क्षमः ।
परं भाग्यात् त्वमायासीः सिद्धमस्मत्समीहितं ॥ ७६ ॥
तद्यतस्व तथा तूर्णं यथा स्यां सत्यसंगरः ।
एतद्राज्यं तवैवास्तु जयेच्छुः केवलं त्वहं ॥ ७७ ॥
दुराचारो यदाचारो माया यत्सहचारिणी ।
अनृतं यत्पदं न्यासः क्रोधो यत्पारिपार्श्वकः ॥ ७८ ॥
अत्रांतरे कलिर्नाम लोभं कृत्वा तमग्रतः ।
विविशे **रतिपालस्य** मनोदुर्गं सुदुर्ग्रहं ॥ ७९ ॥ युग्मं
**रतिपाल**मनोदुर्गं बलाद्गृह्णंस्तदा कलिः ।
शकुन्यभूच्छकेशस्य **रणस्तंभं** जिघृक्षतः ॥ ८० ॥
अंतरंतःपुरं नीत्वा शकेशस्तमभोजयत् ।
अपीप्यत्तद्भगिन्या च प्रतीत्यै मदिरामपि ॥ ८१ ॥
प्रतिश्रुत्य शकेशोक्तं ततः सर्वं स दुर्मतिः ।
विरोधोद्बोधिनीर्वाचो गत्वा राज्ञे न्यरूपयत् ॥ ८२ ॥
देवाहंकारलंकेशो निजगाद शकेश्वरः ।
**हम्मीरः** किमयं मूढः पुत्रीं मे न प्रयच्छति ॥ ८३ ॥
यद्वा मादादसौ किं **त्व—ल्लावदीनोस्मि** नो तदा ।
पुत्रीमयच्छतोमुष्य नाददे यदि वल्लभाः ॥ ८४ ॥
किंजातं यद्यगुर्वीरा भूयांसोपि परासुतां ।
किं द्वित्रिपदभंगेपि खर्जूरो याति खंजतां ॥ ८५ ॥

किं जातं नीयते कोशो यदि निःकोशतां व्ययैः ।
किं शुष्यति समुद्रोपि वारिभिर्वारिदाहृतैः ॥ ८६ ॥
त्वरे प्रयाहि यत्कर्त्ता कर्त्ता तद्भविता ध्रुवं ।
भर्त्सनापरमेवं तं निर्भर्त्स्याहमपीयिवान् ॥ ८७ ॥
विशंके **रणमल्लो**सौ रुष्टः केनापि हेतुना ।
तेनाज्ञायि ध्रुवं येन दृढां प्रौढिं वहत्यसौ ॥ ८८ ॥
तत्पंचषैर्जनैर्युक्तो गत्वा सायं तदालयं ।
तं प्रसादय सद्योपि किंमात्रोसौ शकेश्वरः ॥ ८९ ॥
त्वरयित्वेति भूकांतं **रणमल्ला**नुरंजने ।
**वीरमं** निकषाभूय **रतिपालो** विनिर्ययौ ॥ ९० ॥
तदा चास्य मुखाद्गन्धः प्रससार मदोद्भवः ।
अंगादन्यप्रियाश्लेषसंशीत्वर्या इवानिलः ॥ ९१ ॥
दाक्ष्यात् विज्ञायते नैनं संगतं शत्रुभूपतेः ।
नृपं विज्ञापयामास **वीरमो** रहसि स्थितं ॥ ९२ ॥
निर्यतोस्य मुखाद्राजन् मदगंधस्तथा ययौ ।
जाने यथैष पापीयान्निश्चितं संगतो द्विषः ॥ ९३ ॥
कुलं शीलं मतिर्लज्जाऽभिमानः स्वामिभक्तता ।
सत्यं शौचं च न क्वापि जृंभते मद्यपायिनि ॥ ९४ ॥
अकृत्यकरणागम्य—गमनाभक्ष्यभक्षणात् ।
मद्यं विशेष्यते यस्मादस्मात्संपद्यते त्रयं ॥ ९५ ॥
तथा हि स ऋषिः पीत्वा मधु वेश्यामरीरमत् ।
असिस्वदच्च गोमांसं लिंगभंगमरीरचत् ॥ ९६ ॥
असिसात् क्रियते स्वामिंस्ततो यद्येवमेव तत् ।
स शकेशो निष्फलांभःसद्यस्तर्हि प्रयात्यसौ ॥ ९७ ॥
वाचमाचम्य तस्येत्थं विश्रम्य क्षणमायतौ ।
उपाददे नृपो वाचं वंचितामृतचंचुतां ॥ ९८ ॥

उदेति काले कस्मिंश्चित्प्रतीच्यामपि भास्करः ।
भज्यमानं परं दुर्गं न तिष्ठेदिति मे मतिः ॥ ९९ ॥
तदस्मिन्निहते जाते दुर्गभंगे च दैवतः ।
लोकानिति प्रजल्पाकान्निरोद्धुं कतमः क्षमः ॥ १०० ॥
ध्रुवं सपरिवारोपि दुर्मतिर्विभुरेष नः ।
यदेवमविमृश्यैव रतिपालं प्रजघ्निवान् ॥ १०१ ॥
जीवत्यत्र दुर्गेस्मिन् विलसंतीति किं शकाः ।
पारींद्रे सति किं तस्य गुहायां कोपि दीव्यति ॥ १०२ ॥
हनूमदयनं यद्व दभविष्यज्जितेऽमुना ।
हतेत्र भविता तद्व द्रतिपालायनं क्षितौ ॥ १०३ ॥
विरम्यतां तदेतस्मा द्वाच्यमस्ति यदस्तु तत् ।
रावणादिभिरप्युग्रै र्न भाव्यं रुरुधे यतः ॥ १०४ ॥
उक्त्वेति विरते राज्ञि प्रससार पुरांतरे ।
वार्ता नृपं शकाधीशो यत्पुत्रीमेव याचते ॥ १०५ ॥
इतश्च राजपत्नीभि रनुशास्य प्रणोदिता ।
पुत्री देवल्लदेवीति नत्वा भूपं व्यजिज्ञपत् ॥ १०६ ॥
हाहा तात मदर्थं किं राज्यं विप्लावयस्यदः ।
किं कीलिकार्थं प्रासादं प्रपातयति कश्चन ॥ १०७ ॥
प्रभूता अपि पुत्राः किं कुर्युः पूर्वं तमोंगजाः ।
परार्थमेव वर्धेत या क्षुद्रश्रीरिवान्वहं ॥ १०८ ॥
मत्प्रदानेन साम्राज्यं चिरं यत्क्रियते स्थिरं ।
तत्काचखंडदानेन रक्षा चिंतामणेर्न किं ॥ १०९ ॥
परासोर्यत्र कुत्रापि जीवंति तनुजा वरं ।
दृष्टाहि पुनरावृत्तिर्जीवतां न गतायुषां ॥ ११० ॥
नीतिः स्वहितमालोच्य व्ययं कुर्याद्विचक्षणः ।
तत्तात मयि दत्तायां किं किं भावि न ते हितं ॥ १११ ॥

जामाता भूपतिस्तादृग्सुखं स्वक्षितिरक्षणं ।
खलूक्त्वा बहु सर्वेषां वयमेव किलोपरि ॥ ११२ ॥
त्यजेदेकं कुलस्यार्थे नीतिरित्याह वाक्पतिः ।
त्रातुमावधित क्ष्मां मां ददतस्तव का क्षतिः ॥ ११३ ॥
तन्निधेहि धियं तत्वे विधेहि समयोचितं ।
पिधेहि मा च मद्वाक्यं शकेंद्राय प्रदेहि मां ॥ ११४ ॥
अयशःपटनिर्माणतुरीं तच्चातुरीमिति ।
श्रुत्वा भृशं स जज्वाल नृपतिस्तर्पिताग्निवत् ॥ ११५ ॥
जगाद च सुते नैत त्धुवं त्वन्मतिवल्गितं ।
अस्पृष्टपापपंकानां कुमारीणामधीरिति ॥ ११६ ॥
शिक्षयित्वेति पापिन्या त्वमिह प्रेषिता यया ।
छिनद्मि रसनां तस्या बिभेमि स्त्रीवधान्न चेत् ॥ ११७ ॥
त्वद्दानेन यदिप्स्येत प्राज्यराज्यसुखासिका ।
त किं न जीवितव्याशा पुत्रकालेयभक्षणैः ॥ ११८ ॥
त्यजेदेकं कुलस्यार्थे इति नीतिं यदभ्यधाः ।
शैशवात्तन्न तेद्यापि तत्परार्थे समर्थता ॥ ११९ ॥
त्याज्य एकः कुलस्यार्थे तस्माद्धीनतरः स चेत् ।
अहिदष्टो यथांगुष्ठः छेद्यो जिव्हापि किं तथा ॥ १२० ॥
सत्यामप्यासमुद्रोर्व्यां कुले सारं त्वमेव नः ।
न चेच्छकोपि तां हित्वा कथं त्वामेव याचते ॥ १२१ ॥
यदूचे मयि दत्तायां किंकिं भावि न ते हितं ।
तदेतदपि ते बाल—लीलोन्मीलितमंगजे ॥ १२२ ॥
सर्वात्मना निकृष्टाय प्रकृष्टाय गवाशिने ।
शकाय त्वयि दत्तायां कुतो हंत हितार्जनं ॥ ॥ १२३ ॥
अयशःपटहो लोके परलोके च दुर्गतिः ।
स्वकुलाचारविध्वंसो धिक् नृणां जीवितं ततः ॥ १२४ ।

दुर्लभं नृभवं प्राप्य द्वयमेवार्जयेत्सुधीः ।
कीर्तिं धर्मं च तौ सम्य—कुलाचारप्रपालनात् ॥ १२५ ॥
पूर्वाचारं निहत्योच्चैः सुखं हंत चरंति ये ।
आज्ञालोपान्न किं पापैं र्हतास्तैः पूर्वजा निजाः ॥ १२६ ॥
आचाहमानमप्याद्यै र्यन्नाकृत्यं कृतं पुरा ।
तत्कुर्वन्नधुनाहं तान् कथं वक्ता स्वपूर्वजान् ॥ १२७ ॥
[यतः]पितर्युपरते यस्तु नोद्वहेत्पैतृकीं धुरं ।
तेन नैवोपदेष्टव्याः स्वस्य वंशस्य पूर्वजाः ॥ १२८ ॥
बद्धवाचं विधायेति प्रतीपोक्तितरंगितैः ।
स्वावासं प्रेषयामास सद्यस्तां क्षितिवासवः ॥ १२९ ॥
इतः स **रतिपालो**पि तूर्णं गत्वा तदालयं ।
कलयन्नाकुलीभावं **रणमल्ल**मभाषत ॥ १३० ॥
भ्रातः किं सुखमासीन स्त्वरस्व प्रपलायितुं ।
सेवाहेवाकिनां शत्रुर्बद्धुमभ्येति यद्विभुः ॥ १३१ ॥
सुधांशौ विषवत्तस्मि न्नेतत्संभाव्यते कथं ।
इत्याक्षिप्तवचास्तेन **रतिपालः** पुनर्ज्जगौ ॥ ॥ १३२ ॥
स पंचषैर्जनैर्युक्तो यदि सायं त्वदालयं ।
एति तन्मे वचः सत्य मित्युक्त्वासावगाद्गृहं ॥ १३३ ॥
अथ दृष्ट्वा यथादिष्ट मायांतं स क्षितीश्वरं ।
जातप्रतीतिरुत्तीर्य दुर्गाद्धीत्यामिलद्रिपोः ॥ १३४ ॥
उत्तीर्य **रतिपालो**पि दुर्गात् स्वर्गादिवोच्चकैः ।
शिश्राय निरयावासमिवावासं शकेशितुः ॥ १३५ ॥
तयोस्तच्चेष्टितं दृष्ट्वा कलिं धिक्कलयन्नयं ।
कोशेऽन्नं कियदस्तीति नृपः पप्रच्छ **जाहडं** ॥ १३६ ॥
वदामि यदि नास्तीति तदा संधिर्भवेद्ध्रुवं ।
भाव्यर्थभावाद्ध्यात्वेति जगौ न कियदित्यसौ ॥ १३७ ॥

कुर्वन्नपि हितं मूर्खोऽहितायैव प्रगल्भते ।
अत्रोदाहरणं व्यक्तं किन्न पश्यत **जाहडं** ॥ १३८ ॥
तद्गिरा चिंतयाचांतो भूकांतोऽभ्येत्य मंदिरं ।
उच्चंद्रे विगलत्तंद्र श्चेतसीति व्यचिंतयत् ॥ १३९ ॥
अमानैरपि सन्मानै दानैस्तैस्तैरनेकधा ।
पूजितौ सत्कृतौ शश्व द्यौ मया भ्रातराविव ॥ १४० ॥
यदि तावप्यहो स्वामिद्रोहमेवं प्रचक्रतुः ।
तदा स्वभावनीचानां परेषां गणनास्तु का ॥ १४१ ॥
साजात्यात्तस्य संगम्य रिपोश्चेन्मुद्गला अमी ।
परः प्रेममदुस्तस्य महद्भावि विडंबनं ॥ १४२ ॥
यथा कथंचिदर्हास्त द्विसृष्टुं स्वपुरादमी ।
परः प्रेमपरोप्युच्चैः परत्वं यन्न मुंचति ॥ १४३ ॥
एतस्मिन्नंतरे द्वास्थो विदग्धः कोपि मागधः ।
प्रत्यूषोन्मेषकं काव्य–द्वयमेतदपीपठीत् ॥ १४४ ॥
कोकीनिश्वासवातज्वलिततमतमोगारवैभातरागा-
र्चिष्मत्स्थव्योमभूषाजठरविनिहितेपास्तनिःशेषदोषे ।
क्षिप्त्वा प्रत्यूषकल्कं शशभृति विशदे पारदे कालयोगी
भास्वंतं निर्मिमीते नवमिव कनकं भूषणार्थं दिनस्य ॥ १४५ ॥
आयातेन वितन्वता हृदि करस्पर्शं भृशं प्रेयसो-
न्निद्रत्वं गमितापि तिग्मरुचिना यांतीव निद्रालुतां ।
अप्रौढेव सरोजकोशविगलद्भृंगावलीझंकृतैः
सोत्कंपं वितनोति पश्य नलिनी प्रौढाप्यहो हुंकृतिं ॥ १४६ ॥
प्रीतस्तदर्थचारिण्णा नृपस्तत्पारितोषिकं ।
दत्वा क्षणमुपाक्रांस्त ब्राह्ममौहूर्तिकीं क्रियां ॥ १४७ ॥
अथ प्रातरधिश्रित्य सभां स क्षितिवल्लभः ।
स्वतत्सहोदराध्यक्षं **महिमासाहि**मब्रवीत् ॥ १४८ ॥

प्राणानपि मुमुक्षामो वयमात्मक्षितेः कृते ।
क्षत्रियाणामयं धर्मो न युगांतेपि नश्वरः ॥ १४९ ॥
स एव क्षत्रियः प्राणां–तेपि यो हुंकृतौ क्षमः ।
किं नोदाह्रियते व्यक्त मिह राजा सुयोधनः ॥ १५० ॥
यूयं वैदेशिकास्तद्वः स्थातुं युक्तं न सापदि ।
यियासा यत्र कुत्रापि ब्रूत तत्र नयामि यत् ॥ १५१ ॥
नृपस्य वचसा तेन प्रासेनेव हतो हृदि ।
मूर्छया प्रपतन्नुच्चै रवष्टब्ध इव क्रुधा ॥ १५२ ॥
एवमस्त्विति जल्पाको **महिमाभ्येत्य** मंदिरं ।
कुटुंबमसिसात्कृत्वा नृपं गत्वेदमब्रवीत् ॥ १५३ ॥
पाणिगृहीती त्वद्भ्रातु र्गंतुमुत्कंठिताप्यसौ ।
इलविलासिनी कांतं मामाहेति सगद्गदं ॥ १५४ ॥
कांतैतावंति वर्षाणि तस्थिवांसो यदोकसि ।
अप्यात्तानुभवं नैवा स्मार्ष्म शत्रुपराभवं ॥ १५५ ॥
यस्य प्रसादैः संप्राप्त—सौख्यलक्षैर्निरंतरं ।
अबोधि नापि तिग्मांशुरुदितोस्तमितोपि वा ॥ १५६ ॥
तमिदानीमदृष्ट्वैव यद्येवं नाथ गम्यते ।
पश्चात्तापहतं तर्हि मनः केनोपशाम्यति ॥ १५७ ॥
प्रसाद्यागत्य तत्सद्यो मंदिरं मेदिनीपते ।
स्वदर्शनामृतैः पश्चा त्तापतप्तां निषिंचतां ॥ १५८ ॥
एवमभ्यर्थितस्तेन **महिमासाहिना** विभुः ।
आलंब्य तद्भुजादंडं सादरं सानुजोचलत् ॥ १५९ ॥
आसाद्य तद्गृहं भूपो यावदंतर्विशत्यसौ ।
कुरुक्षेत्रमिवाद्राक्षी त्तावत्सर्वं तदंगणं ॥ १६० ॥
असृक्पूरे शिरांसीह शिशूनां योषितामपि ।
तरंत्यवेक्ष्य मूर्छालः क्ष्मापालः क्ष्मातलेऽपतत् ॥ १६१ ॥

बंधूनां वीरमादीनां विमूर्छोथाशुसेवनैः ।
लगित्वा महिमासाहेः कंठे व्यलपदित्यसौ ॥ १६२ ॥
हा कंबोजकुलाधार हा कीर्तिकुलमंदिर ।
हानन्यजन्यसौजन्य हा धन्यतमविक्रम ॥ १६३ ॥
हा क्षत्रैकव्रतागार हा विश्वजनवत्सल ।
कथंकारं भविष्यामि प्राणदोप्यनृणस्तव ॥ १६४ ॥
मत्तो नैवाधमः कोपि त्वत्तो नैवोत्तमः परः ।
अध्यायं मंदधी स्तादृगीदृग्प्रेम्ण्यपि यस्त्वयि ॥ १६५ ॥
प्रातिकूल्याद्विधेर्जाता ममेयं यदि दुर्मतिः ।
आश्वक्रिथैतत्त किं त्वं यदा भाव्यं हि नान्यथा ॥ १६६ ॥
पुमानात्महितं कर्तुं धियं---त्वनेकधा ।
सा सतीव पतिं क्वापि भवितव्यं जहाति न ॥ १६७ ॥
अन्यथैव विचार्यंते पुरुषेण मनोरथाः ।
दैवादाहितसद्भावा कार्याणामन्यथा गतिः ॥ १६८ ॥
विनिवृत्तस्ततो मान मन्नमालोक्य कोष्ठगं ।
किमेतदिति पप्रच्छ जाहडं जगतीपतिः ॥ १६९ ॥
उक्तायामथ तेनात्म-बुद्धौ प्रोवाच पार्थिवः ।
त्वन्मतौ पतताद्वज्रं यया जज्ञे कुलक्षयः ॥ १७० ॥
ततः प्रदाय पौराणां मुक्तिद्वारं स युक्तिवित् ।
प्रवेष्टुं ज्वलने शिष्टमतिरादिष्टवान् प्रियाः ॥ १७१ ॥
स्वयं च कृतदानादि-धर्मोर्ऽचितजनार्दनः ।
क्षणं पद्मसरस्तीरे निषसाद विषादमुक् ॥ १७२ ॥
आरंगदेविप्रमुखो अथ ता दिव्यभूषणाः ।
तत्र स्नात्वा नृपं नत्वा तस्थुरूर्ध्वंदमाः पुरः ॥ १७३ ॥
कस्याश्चित् कर्णयोः स्वर्ण---कुंडले रेजतुस्तमां ।
चक्रे इव जगज्जैत्रे रतितत्प्राणनाथयोः ॥ १७४ ॥

बभौ परस्याः कस्तूरी—तिलकं कलिकाकृति ।
स्मरेण त्रिदिवं जेतुं संहितं धनुषीष्विव ॥ १७५ ॥
नासावंशाग्रतोऽन्यस्या मुक्तं मुक्ताफलं बभौ ।
तिलपुष्पाग्रतो यस्या वारिबिंदुरिव स्फुरन् ॥ १७६ ॥
कस्याश्चिदुरसि स्फारा मुक्ताहारलता बभौ ।
वितता हासधारेव निर्याता सृक्किणीद्वयात् ॥ १७७ ॥
रेणुसंगभयात्काम—स्पंदनांगमिवावृतं ।
बभौ नीलदुकूलेन कस्याश्चिच्छ्रोणिमंडलं ॥ १७८ ॥
करद्वयांगुलीयानां मयूखैर्वृत्तवर्तिभिः ।
परीता हरिचापाभ्या मिव काचिदराजत ॥ १७९ ॥
आच्छिद्याहितचक्रांग—याननाशभयादिव ।
रेजे नियंत्रणान्यस्याः पादयोर्नूपुरच्छलात् ॥ १८० ॥
ततस्तुष्टो नृपश्छित्वा कबरीं स्वां वरीयसीं ।
मूर्त्तशृंगारसर्वस्व मिव तासां व्यशिश्रणत् ॥ १८१ ॥
पुत्रीं देवल्लदेवीं च दोर्भ्यामालिंग्य निर्भरं ।
नितरां निःश्वसन् क्रंदन् कष्टेन महता जहौ १८२ ॥
ऊचे च चेद्भवेत्पुत्री भूयात्तर्हि भवादृशी ।
परां कोटिं ययानायि गौर्येव जनको निजः ॥ १८३ ॥
स्वर्नारीरूपलुब्धोसौ यदि न स्वीकरोति नः ।
तदास्मै प्राक् प्रतीत्यर्थ मिमां दर्शयितास्महे ॥ १८४ ॥
इति ध्यात्वेव तां वेणीं हृदि विन्यस्य सुभ्रुवः ।
ज्वलद्धनंजयज्वालां—करालां प्राविशंश्चितां ॥ १८५ ॥
स्वःस्त्रीरूपवशीकृतो यदि कदाप्यस्मानयं स्वप्रियाः
स्वीकर्त्ता न तदा प्रतीतिमनयास्योत्पादयिष्यामहे ।
ध्यात्वेवेति निधाय तां स्वहृदये वेणिं विभोस्ता ज्वलत्-
श्रीखंडाऽगरुसारचंदनचितां सद्योप्यविक्षंश्चितां ॥ १८६ ॥

विसृष्टोंत्यांजलीन् तासां दत्वा **जाजः** सभूभुजा ।
अगात् छित्वा द्रुतं क्षिप्ता—ष्टव्येकां गजमस्तकः ॥ १८७ ॥
किमेतदिति राज्ञोक्ते सोवक्राजन् यथा पुरा ।
रावणः शंभुमानर्च तथात्वामर्चयाम्यहं ॥ १८८ ॥
तच्छिरांसि नवैतानि रक्षोहस्तपदे पुनः ।
शिरो ममेदमित्युक्त्वा स्वं च शीर्षमदीदृशत् ॥ १८९ ॥
राज्यार्थी सोदरं हित्वा **वीरमः** स्थितवानिति ।
जनापवादभीतेन **वीरमेण** तिरस्कृतं ॥ १९० ॥
वितीर्य **जाजदेवाय** ततो राज्यं मुदा नृपः ।
द्रव्यं क्व निक्षिपामीति चिंतयन् निद्रयादृतः ॥ १९१ ॥
तदा पद्मसरः स्वप्ने ऽभ्येत्य भूपमदो वदत् ।
म्लेंछा धनं मयि क्षिप्तं लप्स्यंते नाप्यसुव्यये ॥ १९२ ॥
सर्वेपि **रतिपालाद्या** नीचा द्रोहमयासिषुः ।
एते भटा अहं दुर्गस्तुभ्यं द्रुह्यंति नो पुनः ॥ १९३ ॥
अथापनिद्रभूपाला—देशात्सर्वं स **जाहडः** ।
प्रक्षिप्य सारं कासारे तमूचे किं करोम्यहं ॥ १९४ ॥
उक्तो निदेशं देहीति **श्रीहम्मीरेण वीरमः** ।
कूष्मांडवच्छिरस्तस्य छित्वा भूमौ व्यलोडयत् ॥ १९५ ॥
अथ श्रावणमासस्य सितषष्ठ्यां रवौ निशि ।
दिवि कीर्तिं कलंतीं स्वां विलोकितुमिवोत्सुकः ॥ १९६ ॥
अहंकारैरिवाध्यक्षै मूर्त्तैर्वीररसैरिव ।
अन्वितो नवभिर्वीरै रणं शिश्राय पार्थिवः ॥ १९७ ॥
आगाद्धम्मीर इत्युक्ति—श्रुत्या व्यंजितविक्रमः ।
ससैन्यः शकराजोपि भेजे तत्राभ्यमित्रतां ॥ १९८ ॥
एकस्तस्य नृपस्याग्रे वीरमौलिः स **वीरमः** ।
बभौ चंपाधिपः प्रौढः कौरवाधिपतेरिव ॥ १९९ ॥

विशिखान् विकिरन् भूरीन् ध्वानयंश्चापमंडलं ।
क्षणात्स वीरकोटीरो व्याकुलं द्विट्कुलं व्यधात् ॥ २०० ॥
क्ष्वेडानादैर्द्विषच्चक्रं त्रासयन्नेणयूथवत् ।
सिंहः सिंह इवाध्यक्षो जज्ञे यज्ञेत्र वैरिणां ॥ २०१ ॥
नयन्नग्निशिरोल्काभिः प्रतिवीराननंगतां ।
टाको गंगाधरः स्वाख्यां सत्याख्यामिह तेनिवान् ॥ २०२ ॥
चत्वारोपि व्यराजंत मुद्गलास्ते स्फुरद्बलाः ।
चतुरंगमपि द्वेषि—बलं जेतुमिवोद्यताः ॥ २०३ ॥
परान् परः शतान् प्रेत—पतेरतिथितां नयन् ।
परमारान्वयं चक्रे **क्षेत्रसिंहो**त्र सार्थकं ॥ २०४ ॥
रिपुप्राणापहाराय दंडभृत् दूतिकास्विव ।
क्ष्वेडासु वीरैर्मुक्तासु चकितं दधिरे शकाः ॥ २०५ ॥
सा कीदृगस्ति स्वःश्री यां नृपः परिणिनीषते ।
इति द्रष्टुमिवायासी**द्वीरमः** प्राग् नृपात् दिवं ॥ २०६ ॥
वीराः परेपि हम्मीरा निर्विण्णा इव जीविते ।
प्रभोः पूर्वं ययुः स्वर्गं स्थितिरेषा भुजाभृतां ॥ २०७ ॥
मूर्छितं **महिमासाहिं** विभाव्य रिपुपत्रिभिः ।
युद्धाय स्वयमुत्तस्था—वथ **हम्मीर**भूपतिः २०८ ॥
अतिधारानिषूनस्य वर्षतः शुचिनाऽमुना ।
शंके द्वेषो भवेन्नोचे त्कथमस्यायमंतकृत् ॥ २०९ ॥
संयत्येकोपि **हम्मीरः** परो लक्षत्वमाश्रयन् ।
व्योमासिकृत्तैर्द्विट्वक्त्रैः पद्माकरमिवाकरोत् ॥ २१० ॥
हम्मीराग्निशरश्रेणिपरीताः परितः शकाः ।
अमंसत प्रविष्टं स्वं मंडलं चंडदीधितेः ॥ २११ ॥
एकोप्यसौ जिगायाशु प्रभूतानपि वैरिणः ।
एणव्यूहं जयन् सिंहः किं सहायमपेक्षते ॥ २१२ ॥

निषादी पदगः सादी रथी वा यो यथाऽमुना ।
निहतः स तथैत्रास्थात् चित्रन्यस्त इवोच्चकैः ॥ २१३ ॥
वरीवर्षन् शरासारै स्तपात्ययपयोदवत् ।
नृपः कदर्थयामास वक्त्रांभोजानि वैरिणां ॥ २१४ ॥
भृशं शरप्रपातेना–कुलयन्मत्तवारणं ।
तदारोढुश्च तस्यापि मदं स उदतीतरत् ॥ २१५ ॥
रतिपालवदेतेपि जाता इत्यपवादतः ।
भीता इवास्यारात्यंगं भित्वा दूरं ययुः शराः ॥ २१६ ॥
अत्यर्जुनं धनुर्विद्याविदिनामपि विद्विषां ।
कोदंडस्थं करस्थं च गुणं चिच्छेद पार्थिवः ॥ २१७ ॥
धनुर्गुणटणत्कार—श्रुत्वैव त्यक्तजीविताः ।
द्विषो नान्वभवँस्तस्य शरप्रहरणव्यथां ॥ २१८ ॥
नृपेण मध्यतश्छिन्नै र्भूगताग्रैर्द्विषच्छिरैः ।
रणांगणमभाल्लून–तिलक्षेत्रमिवांतकं ॥ २१९ ॥
शरौघान् क्षिपतस्तस्य शकराजवरूथिनी ।
वसुहीनस्य वेश्येव क्षणेनासीत्पराङ्मुखी ॥ २२० ॥
नृपः कांश्चिदुरःपूरं पूरयामास सायकैः ।
दूर्वालावं लुलावोच्चैः कांश्चित्खड्गेन मध्यतः ॥ २२१ ॥
वीरोसौ समरेऽरीणां तथात्र कदनं व्यधात् ।
यथामीभिर्यमस्यापि संकीर्णमभवद्गृहं ॥ २२२ ॥
सध्वजान् खंडयन् दंडान् व्यध्यन्नश्वान् ससादिनः ।
द्विधापि विग्रहं भिंदन् सोऽरेश्चक्रे चिरं रणं ॥ २२३ ॥
अतिधारानिषून्वर्षन् रिपुक्षेत्रेषु भूरिषु ।
चाक्षुषः श्रावणो जज्ञे चित्रं हम्मीरभूपतिः ॥ २४ ॥
श्रीहम्मीरोथ वीरव्रजमुकुटमणिर्म्लैंछबाणप्रहारैः
सर्वांगेषु प्ररूढैः क्षितितलमभितो भावितो भीष्मकर्म्मा ।

जीवंतं ग्राहिषुर्मां क्वचिदपि यवना मामिति ध्यातबुद्धिः
कंठं छित्वात्मनैव स्वमटति च दिवं स्मात्तसूरातिथित्वः ॥ २२५ ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीरमहाकाव्ये वीरांके हम्मीरस्वर्गगमनवर्णनो नाम त्रयोदशः सर्गः ॥ १३ ॥

---

## अथांतिमश्चतुर्दशः सर्गः

तादृक्षस्य विभोरथ प्रतिभटत्रासैकदीक्षागुरो-
र्हम्मीरावनिवासवस्य जगतीलोकं पृणप्रोन्नतिं ।
श्रुत्वा केचन केचनापि सुतरामाकर्ण्य मृत्युं बुधा-
श्चक्रुः काव्यपरंपरामिति तदा कष्टैकमुष्टिंधयाः ॥ १ ॥

धर्मः शर्मपदं मुमोच करुणारण्यं शरण्यं यया
वौदार्यं विजगाल बालललितं शिश्रीय वीरव्रतं ।
नीतिर्भीतिमुपाजगाम कमला वैधव्यमुद्रां दधौ
श्रीहम्मीर नृपालभालतिलक स्वर्गं गतेऽद्य त्वयि ॥ २ ॥

भूदेवानिदमादिकांचनचयैः कः पूजयिष्यत्यहो
को वा नाम करिष्यति प्रतिपदं षट्दर्शनोपासनां ।
को वा पास्यति गोकुलं शककुलैराहन्यमानं रुषाऽ
स्माकं का गतिरस्तु निस्तुषमते हम्मीर हा त्वां विना ॥ ३ ॥

गीर्वाणद्रुमधेनुकुंभमणयः काले कराले कलौ
नैव क्वापि किल स्फुरंति धरणावेवं यदाहुर्बुधाः ।
तत्सर्वं निरवद्यमेव नितमां मन्यामहे सांप्रतं
श्रीहम्मीर महीमहेंद्र भवति प्राप्ते यशःशेषतां ॥ ४ ॥

पाताले भुजगेश्वराः सुमनसां व्यूहाः सुपर्वालये
पुष्पौघाः प्रतिकाननं प्रतिसरस्ते राजहंसादयः ।
एणाक्ष्यः प्रतिमंदिरं प्रतिपुरं प्रेमातुरा नागराः
शोचंत्येकमहो हमीरनृपतिं हाहा त्रिलोकीपतिं ॥ ५ ॥

धैर्यं मेरुगिरिं मतिः सुरगुरुं गंभीरता सागरं
सौम्यत्वं शशिनं प्रतापसरणिः सूरं हरिं शूरता ।
चिंता रत्नमुदारता सुभगता शिश्राय कामं क्षणात्
हम्मीरे सुरसुंदरीस्तनमहाशैलस्खलच्चक्षुषि ॥ ६ ॥
किं कुर्वीमहि किं ब्रुवीमहि विभुं कं चानुरुंधीमहि
व्याचक्षीमहि किं स्वदुःखमसमं कं वा बभाषेमहि ।
यन्निःकारणदारुणेन विधिना तादृग्गुणैकाकरं
हम्मीरं हरताऽञ्जसा हृतमहो सर्वस्वमेवावनेः ॥ ७ ॥
लक्ष्मीर्याति ससत्वरं मुरारिपोर्देवस्य वक्षस्थले
वीरश्रीरपि वीरवेश्मनि हरे स्तास्ताः समस्ताः कलाः ।
पौलोमीकुचकुंभपत्ररचनाचातुर्यचिंतामणौ
श्रीहम्मीर नरेश्वर त्वयि निराधारा हहा भारती ॥ ८ ॥
संति क्षोणिभुजः क्षितौ कति न ते ये स्वप्रियाप्रीतये
वाहं वाहमनेकबाहनिवहान् प्रौढिं दृढां तन्वते ।
म्लेंछातुच्छकिरीटकोटिघटनैर्यो दंतुरं सत्वरं
चक्राणः क्षितिमंडलं स तु परं हम्मीर एकः कलौ ॥ ९ ॥
एधंतां प्रबलैर्बलैः स्वबिरुदान्यध्यापयंतां जनान्
गाहंतां नयवर्त्म मध्यमसमं स्फीतां वहंतां मुदं ।
बाधंतां युधि बाहुजेशनिकरान् प्रौढिं भजंतां तमां
एकस्मिंस्त्वयि वीर नाक मयिते स्वैरं वराकाः शकाः ॥ १० ॥
भोक्तुं ध्वांक्षमियेष विक्रमविभुः पंगुः स जैत्रो जले
मज्जद्राग्मलयैणराट्रिपुपुरो मार्दंगिकत्वं दधौ ।
इत्थं स्वंस्म विडंबयंति कतिनो हम्मीरराजन् परं
यत्त्वं चक्रिथ तच्चकार कुरुते कत्तथवा कः कलौ ॥ ११ ॥
संध्यावंदनकर्मकर्मठधियो माद्यन्मराला इवा-
मज्जन् पद्मसरोवरे श्रितमुदो यत्रानिशं वाडवाः ।

निःशंकं यवना विगंधिवसनास्तत्र प्रविश्याधुना
कूर्दंते महिषा इव क्षितिपते **हम्मीर** हा त्वां विना ॥ १२ ॥
ईदृक्षं नरमौलिमंडनमणिं हत्वा हहा हेलया
दुःसाधं यदसाधि नाम भवता धातस्तदाचक्षतां ।
नीचानां यदि वेदृशी स्थितिरहो यत्ते प्रयोगं विना-
प्यन्येषां हितवस्तुराहतिविधौ शश्वद्यतंतेतमां ॥ १३ ॥
नेत्रे निष्कशतां नितांतबधिरीभावं भजेतां श्रुती
नो कार्यं युवयोरतःपरमहो किंचित् क्वचिद्वल्गाति ।
याभ्यामेष समीक्षितो गुणगणस्तस्याथ वा संश्रुतो
लज्जेतामितरं हहा किमु न ते श्रोतुं तथा वीक्षितुं ॥ १४ ॥
लोको मूढतया प्रजल्पतुतमां यच्चाह**मानः** प्रभुः
श्री**हम्मीर**नरेश्वरः स्वरगमत् विश्वैकसाधारणः ।
तत्त्वज्ञत्वमुपेत्य किंचन वयं ब्रूमस्तमां स क्षितौ
जीवन्नेव विलोक्यते प्रतिपदं स्तैस्तैर्निजैर्विक्रमैः ॥ १५ ॥
धिक्धिक् त्वां **रतिपाल** याहि विलयं श्रीसूरवंशाधम
द्राग्वक्त्रं **रणमल्ल** कृष्णय निजं पापिंस्त्वमप्युच्चकैः ।
एको नंदतु **जाज** एव जगति स्वाभाविकप्रीतिभृत्
येनात्रायि दिवंगतेपि नृपतौ दुर्गं किलाहर्द्वयीं ॥ १६ ॥
राधेयः कवचं ददौ शिबिरहो मांसं बलिर्मेदिनीं
जीमूतोर्धवपुस्तथापि न समा **हम्मीरदेवेन** ते ।
येनोच्चैः शरणागतस्य **महिमासाहे**र्निमित्तं क्षणा-
दात्मा पुत्रकलत्रभृत्यनिवहो नीतः कथाशेषतां ॥ १७ ॥
द्वौ नञौ प्रस्तुतार्थं प्रवदत इतिवत् क्ष्माभृता द्विः प्रयुक्ता-
मौचित्याद्याहि याहीति वचनरचनां स्वार्थसंस्थां विधाय ।
यस्तिष्ठन्नप्यलुंपन्न खलु निजविभोः शासनं स्वामिभक्तः
ख्यातस्तेनैव नाम्नापि च जयतु चिरं **चाहमानः** स**जाजा** ॥ १८ ॥

श्रीकांबोजकुलाब्धिवर्धनविधुर्निर्व्याजवीरव्रतो
हंकारैकनिकेतनं स **महिमासाहिः** कथं वर्ण्यते ।
हित्वैकं तमलक्ष्यमक्षितनयं **हम्मीर**वीरं तथा
प्राणांतेपि पुरः परस्य न पुनर्यो नानमत्स्वं शिरः ॥ १९ ॥
नैव स्वं स्वेन हन्यादिति कुलचरितं पालयन् यो गृहीतो
जीवन् म्लेंछाधिपाग्रे सदसि पदतलं दर्शयंश्च प्रविष्टः ।
कर्त्ता त्वं जीवितः किं मयि च तदुदितः प्रोक्तवान् यद्ध**म्मीरे**
कार्षीस्त्वं तेन साम्यं कलयति **महिमासाहिना** कोत्र वीरः ॥ २० ॥
आजौ पादतलेन दर्शितवतो **हम्मीर**भूभृच्छिरः
पृष्टस्तेन तदर्पितांश्च गदतस्तांस्तान् प्रसादानपि ।
खङ्गेते **रतिपाल** यच्छकपतिर्निष्कासयामासिवान्
तद्युक्तं त्वमिवान्यथा कतिपुनर्द्रुह्यंति न स्वामिने ॥ २१ ॥
जयति जनितपृथ्वीसंमदः **कृष्णगच्छो**
विकसितनवजातीगुच्छवत् स्वच्छमूर्तिः ॥
विविधबुधजनालीभृंगसंगीतकीर्तिः
कृतवसतिरजस्रं मौलिषु छेकिलानां ॥ २२ ॥
तस्मिन्विस्मयवासवेश्मचरितश्रीसूरिचक्रे क्रमात्
जज्ञे श्री**जयसिंह**सूरिसुगुरुः प्रज्ञालचूडामणिः ।
षट्भाषाकविचक्रशक्रमखिलप्रामाणिकाग्रेसरं
सारंगं सहसा विरंगमतनोद्यो वादविद्याविधौ ॥ २३ ॥
श्रीन्यायसारटीकां नव्यं व्याकरणमथ च यः काव्यं ।
कृत्वा **कुमार**नृपतेः ख्यातस्त्रैविद्यवेदिचक्रीति ॥ २४ ॥
तदीयगणनायकः क्रमनमज्जनत्रायकः
प्रसन्नशशभृत्प्रभुर्जयति वादिभेदिप्रभः ।
यदीयपदपंकजे भ्रमिरभृंगलीलायितं
श्रयंति महतामपि क्षितिभृतां सदा मौलयः ॥ २५ ॥

तत्पट्टांभोजचंचत्तरखरकिरणः सर्वशास्त्रैकबिंदुः
सूरींदुः श्रीनयेंदुर्ज्जयति कविकुलोदन्वदुल्लासनेंदुः ।
तेने तेनैव राज्ञा स्वचरिततनने स्वप्रनुन्नेन कामं
चक्राणं काव्यमेतन्नृपतितितिमुदे चारुवीरांकरम्यं ॥ २६ ॥
पौत्रोप्ययं कविगुरोर्जयसिंहसूरेः
काव्येषु पुत्रतितमां **नयचंद्र**सूरिः ।
नव्यार्थसार्थघटनापदपंक्तियुक्ति-
विन्यासरीतिरसभावविधानयत्नैः ॥ २७ ॥
**श्रीहर्षामरयोः** कविप्रवरयोर्वाक्कल्पवल्लीं निजा-
मुद्यांतीमभिवर्षतोर्नवनवैः पीयूषधारारसैः ।
मद्भाग्यानिलखेलनैरपहृता या विप्रुषः काश्चिद-
प्यासामेष निषेकशाद्वलतमः सोयं मदुक्तिश्रमः ॥ २८ ॥
जल्पंत्येके कवींद्राः सरसमनुभवादेव कुर्वंति काव्यं
तन्मिथ्या हंत नोचेत्तदिह विदधतां तद्व्रतां येपि धुर्याः ।
एषोस्माकं प्रसादः सततमपि गिरां देवताया – – –
धत्ते लालित्यमुच्चैः खलु चपलदृशां पुण्यतारुण्यमेव ॥ २९ ॥
काव्ये काव्यकृतां न चास्त्यनुभवः प्रायः प्रमाणं नचेत्
प्राहुस्ते कविधर्म एष इति किं प्रत्याहतास्तार्किकैः ।
को नामानुबभूव चंद्रसुरभिं कुंदोज्वलां कौमुदी
सीतां कीर्तिंमतोन्यथोदितगुणस्फीतामकीर्तिं च कः ॥ ३० ॥
वाणीनामधिदेवता स्वयमसौ ख्याता कुमारी ततः
प्रायो ब्रह्मवतां स्फुरंति सरसा वाचां विलासा ध्रुवं ।
कुक्कोकः सुकृती जितेंद्रियचयो हर्षः सवात्स्यायनो
ब्रह्मज्ञप्रवरो महाव्रतधरो वेणीकृपाणोमरः ॥ ३१ ॥
शृंगारेनुभवो व्यतर्क्यततमां मूढैरिहोच्चैर्यकः
सुप्तः किंतु स कः परेषु यदयं नैकप्रकाशीप्रमा ।

तद्वंध्यासुतलालनामिव वृथा वैकल्पिकीं कल्पना-
माकल्पं परिकल्प्य जल्पततमां धैर्यं धियां केवलं ॥ ३२ ॥
ये शृंगारकथां प्रथां विदधते वाचां विलासैरस-
प्रोल्लासोत्र समस्तितेष्वनुभवो येष्वस्ति तेन्ये पुनः ।
वर्ण्या ये वदनेषु कुंदविशदास्तंबेरमाणां रदा
नैते चर्वणसाधनं तदिह ये दुर्लक्ष्यरूपास्तु ते ॥ ३३ ॥
काव्यं काव्यप्रकाशादिषु रसबहलं कित्तयंत्युत्तमं यत्
तन्नोभावैर्विभावप्रभृतिभिरनभिव्यक्तमुक्तैः कदाचित् ।
तेनेति व्यक्तमुक्तं सरसजनमनःप्रीतये काव्यमेतत्
कश्चिच्चेन्नीरसोस्मिन् भजति बत मुदं नो तदा कस्य दोषः ॥ ३४ ॥
वदंति काव्यं रसमेव यस्मिन्निपीयमाने मुदमेति चेतः ।
किं कर्णतर्णर्णसुपर्णपर्णाभ्यर्णादिवर्णार्णवडंबरेण ॥ ३५ ॥
रसोस्तु यः कोपि परं स किंचिन्नास्पृष्टशृंगाररसो रसाय ।
सत्यप्यहो पाकिमपेशलत्वे न स्वादु भोज्यं लवणेन हीनं ॥ ३६ ॥
कविता वनिता गीतिः प्रायो नादौ रसप्रदाः ।
उद्गिरंति रसोद्रेकं गाह्यमानाः पुरः पुरः ॥ ३७ ॥
प्रायोपशब्दादिकृतोपि दोषो नचात्र चिंत्यो मम मंदबुद्धेः ।
न कालिदासादिभिरप्यपास्तो योऽध्वा कथं वा तमहं त्यजामि ॥ ३८ ॥
प्रायोपशब्देन न काव्यहानिः समर्थतार्थे रससेकिमा चेत् ।
वादेप्यसौ नो विदधीत किंचित् यदि प्रतिज्ञा विरमेन्न विज्ञः ॥ ३९ ॥
वाणी वाणीविलासात्प्रसरति विदुषां तेन शब्दापशब्दौ
प्रायश्चेतोविकल्पः कविमतवशगा शब्दशास्त्रेपि सिद्धिः ।
मत्वैवं मापशब्दं वदत सहृदया प्रौढकाव्यप्रयुक्ता
द्वित्राश्चेत्तेन वृद्धिं भजति कथमसौ तर्हि वाग्ब्रह्मकोशः ॥ ४० ॥
भवंति काव्येषु महाकवीनां यत्रैवभावा अशुभाः शुभा वा ।
प्रदर्शितास्ते कतिचित्ततीह नचेन्महाकाव्यमिदं कथं तत् ॥ ४१ ॥

क्षंतव्य एव कविभिः कृपया प्रमादात्
काव्येत्र कश्चिदपि यः पतितोपशब्दः ।
प्रीतिर्यथास्तु सुहृदामथवा सुशब्दैः
किं सा तथास्त्वसुहृदामपि मापशब्दैः ॥ ४२ ॥
काव्यं पूर्वकवेर्न काव्यसदृशं कश्चिद्विधाताधुने
त्युक्ते तोमरवीरमक्षितिपतेः सामाजिकैः संसदि ।
तद्भूचापलकेलिदोलितमनाः शृंगारवीराद्भुतं
चक्रे काव्यमिदं हमीरनृपतेर्नव्यं नयेंदुः कविः ॥ ४३ ॥
हंसाः संतः क्व येषां गुणपयसि रतिर्नो रतिर्दोषवारि-
ण्यादर्शाः संतु किंतु प्रतिफलति गुणो दूषणं वापि येषु ।
तेमी तिष्ठंतु दूरे क्वचन तितअवोदूषणं कीकशं ये
बिभ्रत्युच्चैरधश्चोज्वलगुणसमिता संचयं चिक्षिपंति ॥ ४४ ॥
राजानो युधिबद्धविक्रमरसाः कुर्वंतु राज्यं मुदा
तेषां विक्रमवर्णने च कवयः शश्वद्यतंतांतमां ।
अश्रांतं च समुल्लसंत्विह रसैर्वाचः सुधासेकिमाः
स्वादुंकारमिमाः पिबंतु च रसास्वादेषु ये सादराः ॥ ४५ ॥
पीत्वा श्रीनयचंद्रवक्त्रकमलाविर्भाविकाव्यामृतं
कोनामामरचंद्रमेव पुरतः साक्षान्नपश्येद्ध्रुवं ।
आदावेव भवेदसावमरता चेत्तस्य नो बाधिका
दुर्वारः पुनरेष धावतुतमां हर्षावलीविभ्रमः ॥ ४६ ॥

इति श्रीजयसिंहसूरिशिष्यमहाकविश्रीनयचंद्रसूरिविरचिते श्रीहम्मीर-महाकाव्यें वीरांके कविवाक्यवर्णनोनाम चतुर्दशः सर्गः ॥ समाप्तमिदं श्रीहम्मीरमहाकाव्यं ॥

कार्यात्कारणसंविदं विदधते नैकांतमुत्सृज्य य-
त्तत्तेषामिव नोपि कर्हिच न किं चेतश्च मत्ताचिकीः ।

नैवं चेन्नयचंद्रसूरिसुकवेर्वाणीं विधायामृतं
श्रीहर्षं तमथामरं तमपि तत्किं संस्मरेयुर्बुधाः ॥ १ ॥
काव्यानां त्रितयीं व्यरीरचदिमां यां कालिदासः कलां
सृष्टौ गाधिसुतस्य सार्हति न चेत्कानाम तत्रास्तु सा ।
चक्रुर्यां कवयो **नयेंदुरमरौ** हर्षश्च नानारसैः
सर्गे ब्रह्मण एव सा तु घटते तस्यैव संवादतः ॥ २ ॥
**नयचंद्र**कवेः काव्यं रसायनमिहाद्भुतं ।
संतः स्वदंते जीवंति **श्रीहर्षाद्याः** कवीश्वराः ॥ ३ ॥
लालित्य**ममर**स्येव **श्रीहर्ष**स्येव वक्रिमा ।
**नयचंद्र**कवेः काव्ये दृष्टं लोकोत्तरं द्वयं ॥ ४ ॥
काव्यं काव्ययशोर्थिनां रचयतां सम्यक् कृतत्वस्य नो·
मीयेतोपचयो नचाप्युपचयः कश्चित्कवीनां स्फुटं ।
यस्माच्छुद्धमशुद्धमाहुरनयोर्विज्ञापनाकारणं
तत्तेषां मनसैव रुद्धमभितः कुत्रावकाशस्तयोः ॥ ५ ॥
यशोर्थिनां काव्यकृतां कवीनां पुण्यंच पापं च न किंचिदेव ।
पुण्यस्य पापस्य च यन्निदानं मनस्तदेषां यशसैवरुद्धं ॥ ६ ॥

संवत् १५४२ वर्षे श्रावणे मासि श्रीकृष्णर्षिगच्छेश्रीश्रीजयसिंहसूरिशिष्येण नयहंसेनात्मपठनार्थं श्रीपेरोजपुरे हम्मीरमहाकाव्यं लिलिखे कल्याणमस्तु भद्रंभूयात्संघस्य ग्रंथाग्रः १५६४

---